

सप्तशती चण्डी

(नवमीसिंहपरिमार्जिता सप्तशतश्लोकसुसङ्ख्यका, तेनैव विरचिता चण्डीभक्तिविनोदिनीयुता)











यथाऽश्वमेधः क्रतुषु
देवानाञ्च यथा हरिः ।
स्तवानामपि सर्वेषां
तथा सप्तशतीस्तवः ॥
-वाराहीतन्त्रम्



लम्बकर्ण भट्ट तन्त्रविद्या संस्था ग्रन्थमाला-१

सप्तशती चण्डी

(नवमीसिंहपरिमार्जिता सप्तशतश्लोकसुसङ्ख्यका, तेनैव विरचिता चण्डीभक्तिविनोदिनीयुता)

ग्रन्थसम्पादकः
प्रा.विद्यानाथ उपाध्याय भट्ट

सम्पादकसन्दोहः
उप.प्रा.माधवप्रसाद लामिछाने
उप.प्रा. दुर्गामणि सिग्देल
उप.प्रा. केशव कोइराला

प्रकाशकः
लम्बकर्ण भट्ट तन्त्रविद्या संस्था
काठमाडौं

सप्तशती चण्डी

(नवमीसिंहपरिमार्जिता सप्तशतश्लोकसुसङ्ख्यका, तेनैव विरचिता चण्डीभक्तिविनोदिनीयुता)

प्रकाशक : लम्बकर्ण भट्ट तन्त्रविद्या संस्था, काठमाडौं

आर्थिक सहयोग : अन्नपूर्णा उपाध्याय भट्ट

प्रथम संस्करण : वि. सं. २०७०

प्रति : १०००

मूल्य : रु २००/-

ISBN No : 978-9937-2-7188-2

आवरण : टच क्रिएसन, बागबजार

मुद्रक : शारदा प्रिन्टिङ प्रेस, पुतलीसडक, काठमाडौं

प्रकाशकीय

तन्त्रको शास्त्रीय परम्परा एवं नेपाली समाजमा विद्यमान तन्त्रपरम्पराका विषयमा अध्ययन–अनुसन्धान गर्ने तथा तत्सम्बन्धी वातावरणको सिर्जनाका लागि विभिन्न प्राज्ञिक एवं चेतनामूलक कार्यकलापका माध्यमबाट बौद्धिक जागरण ल्याउने उद्देश्यले तन्त्रपरम्परासँग सम्बद्ध धर्म एवं दर्शन र तत्सम्बन्धी वाङ्मयको अध्ययन, अनुसन्धान, अनुवाद तथा प्रकाशन गर्ने उद्देश्यले "लम्बकर्ण भट्ट तन्त्रविद्या संस्था" स्थापना भएको हो ।

विक्रमको सत्रौं शताब्दीमा महेन्द्र मल्लका छोरा शिवसिंह मल्लको शासनकालमा दक्षिण भारतबाट द्रविड वंशका मूर्धन्य विद्वान् नारायण भट्टको काठमाडौं उपत्यकामा प्रवेश भएको थियो । तिनै नारायण भट्टको कृपा र तन्त्रसिद्धिका कारण शिवसिंह मल्लले पाटन, दोलखा, सिन्धुली, लिस्ती, केरुङ, मकवानपुर र पश्चिममा गण्डकीपारिसम्मको क्षेत्रलाई कान्तिपुर राज्यमा मिलाएका थिए । चापागाउँको अभिलेखमा नारायण भट्टको सौन्दर्य, विद्वत्ता र सिद्धिका विषयमा यसरी प्रकाश पारिएको छ–

सत्कीर्तिः शरदिन्दुसुन्दररुचिर्मूर्तिः शिवस्याकृतिः ।
विद्या यस्य समस्तशास्त्रनिचयव्याख्यातिभूमिं गता ।
सिद्धिर्यस्य दिनेऽपि चन्द्रकरणे रात्रौ च सूर्योद्गमे,
सोऽयं सद्द्रविडान्वयोद्भवतनुः श्रीभट्टनारायणः ॥
येनश्रीशिवसिंहनामनृपतेर्नेपालदेशाखिला–
धीशत्वं परिकल्प्य भूतिरखिला स्वस्यापि सम्पादिता ॥

नारायण भट्टका छोरा महादेव भट्ट भए । महादेव भट्टका छोरा लक्ष्मीनारायण भट्ट अथवा लम्बकर्ण भट्ट नेपालको इतिहासमा र तन्त्रसम्बन्धी किंवदन्तीहरूमा चमत्कारी पुरुषका रूपमा प्रसिद्ध हुन पुगे । लम्बकर्ण भट्ट राजा प्रताप मल्लका गुरु थिए । यिनकै सहयोग र सल्लाहमा राजा प्रताप मल्लले फर्पिङ नजिक दक्षिणकाली र

हनुमानढोकामा हनुमानको मूर्ति स्थापना गरेको र पशुपतिस्थित वासुकि मन्दिरको जीर्णोद्धार गरेको ऐतिहासिक प्रमाण पाइन्छ। यिनै लम्बकर्ण भट्टको वंशपरम्परामा कालान्तरमा तन्त्रविद्यानिष्णात महान् साधक विष्णुरमण भट्ट र तिनका पुत्र वासुदेव भट्ट भए। तिनै वासुदेव भट्ट र कर्मादेवीका सुपुत्रका रूपमा आफ्नो पुर्ख्यौली थलो नरदेवीमा जन्मनुभएका प्रा. विद्यानाथ उपाध्याय भट्टको सत्प्रेरणा र सल्लाहबाट यस संस्थाको स्थापना हुनु गौरवपूर्ण विषय हो।

लम्बकर्ण भट्टकै वंशपरम्परामा जन्मनुभएका इन्जिनियर प्रकाश जोशी लगायत अन्य व्यक्तित्व एवं महानुभावहरूसँगको सम्पर्क र तन्त्रसाधकहरूसँगको सल्लाह एवं सुझावका माध्यमबाट आगामी दिनहरूमा तन्त्रसम्बन्धी नवीन खोज-अनुसन्धान एवं प्रकाशन गर्ने लक्ष्य यस संस्थाले राखेको छ। सोही अनुसार उक्त संस्थाले पहिलो प्रयासस्वरूप "सप्तशती चण्डी" प्रकाशन गरी सार्वजनिक गरेको छ।

महाकाली-महालक्ष्मी-महासरस्वतीस्वरूपा "सप्तशती चण्डी" उपासनाको परम्पराले ओतप्रोत नेपाली संस्कृति शाक्ततन्त्रको आधारभूमि हो। यहाँका शक्तिपीठहरू, चण्डी-पूर्णिमा, नवरात्री (दशैं), कोजाग्रत-पूर्णिमा, लक्ष्मीपूजा जस्ता कतिपय चाडपर्वहरू तथा कैयन् जात्रा-उत्सवहरू उक्त शक्ति उपासनाका अभिव्यक्ति हुन्। त्यही सिलसिलामा "सप्तशती चण्डी" शक्तिस्वरूपा भगवतीको वैखरी वाङ्मय भएर परापूर्वकालदेखि नै यहाँ अवतरित भएको छ। त्यसै वाङ्मयका आधारमा खासखास चाडपर्व र जात्रा-उत्सवमा यहाँका शक्तिपीठहरूमा र घरघरमा समेत चण्डिका देवी भगवती दुर्गाको आराधना, उपासना, स्तुति, जप, पाठ गर्ने संस्कृति प्रवाहित छ। नेपाली परम्परा र संस्कृतिमा भिजेको यस्तो "सप्तशती चण्डी" भित्र पसेर त्यसमा रहेका श्लोकहरूलाई केलाउँदै सप्रमाण विश्लेषण गर्नु, वैदिक, तान्त्रिक, पौराणिक वा अन्य कुनै पनि प्रामाणिक ग्रन्थहरूबाट सप्तशतीका बारेमा लेखिएका तथ्यहरूलाई सङ्कलन सम्पादन गरेर केलाउनु, निष्कर्ष निकाल्नु अनि त्यस निष्कर्षलाई सार्वजनिक गर्नु वाञ्छनीय भएको परिप्रेक्ष्यमा मल्लकालका प्रसिद्ध तन्त्रसाधक एवं राजा भूपालेन्द्र मल्लको शासनकालमा महामात्य पदमा रहेका नरसिंह भण्डेल "चण्डीभक्तिविनोदिनी" लेखेर तत्कालीन

अपरिहार्य आवश्यकता परिपूर्ति गर्न अग्रसर भएको बुझिन्छ । त्यस कार्यले एकातिर परम्परादेखि चलिआएको सप्तशती चण्डीको उपासना पद्धतिलाई परिमार्जन गर्न चाहेको बुझिन्छ भने अर्कोतर्फ विद्यमान सांस्कृतिक विधि-नियम, आराधनापद्धतिलाई निष्क्रिय अवलम्बन गर्नुभन्दा ती कुराभित्रका रहस्य खोतल्दै खोज-अनुसन्धान, अध्ययन गरेर वास्तविक तथ्य पत्ता लगाउन प्रेरित गरेको पाइन्छ ।

काठमाडौंको नःघ (नवघट)टोलमा जन्मेका नवमीसिंह भण्डेलले ज्यादै गोप्यतापूर्वक अध्ययन गरिने तन्त्रपरम्परा भएको समाजमा सार्वजनिक ग्रन्थहरूको रचना गरेर नयाँ तरङ्ग ल्याइदिएका थिए । सोही तरङ्गले अध्ययन, विश्लेषण, मनन, खोज-अनुसन्धान गर्ने र रहस्यपूर्ण विषयलाई खोतल्ने परिपाटीको बीजारोपण त्यतिबेला भएको थियो । "चण्डीभक्तिविनोदिनी" पनि त्यसै सिलसिलाको उपज हो । नेपाली संस्कृति र भावनाको उद्घोषिका, साधना र उपासनाको उद्दीपिका, तान्त्रिक संस्कृतिको महत्त्वपूर्ण पाटो सप्तशती चण्डीमा भएको यस्तो खोजले ल्याएको तरङ्गलाई पक्रेर सम्पादन गरी प्रकाशन गर्नु अहिलेको सन्दर्भमा अपरिहार्य भएको हुनाले तन्त्रसाधनानिष्णात प्रा. विद्यानाथ उपाध्यायले त्यस चण्डीभक्तिविनोदिनीको प्रारम्भिक सम्पादन गरी परिष्कृत सम्पादनका साथ प्रकाशनमा ल्याउने जिम्मा सम्पादकसन्दोहका सदस्यहरू माधवप्रसाद लामिछाने, दुर्गामणि सिग्देल र केशव कोइरालालाई दिएबमोजिम परिश्रमपूर्वक सम्पादन गरी तयार पारिएको अन्तिम पाण्डुलिपि यस संस्थामा प्राप्त भएपछि प्रकाशनको मौका मिलेको हो ।

यसलाई प्रकाशन गरिदिँदा उक्त चण्डीभक्तिविनोदिनीका लेखक नवमी सिंहको खोज, अनुसन्धान तथा ग्रन्थसम्पादक र सम्पादकहरूको सिलसिलेवार रखाइसहितको कार्यसम्पादनबाट उवाच आदि विना नै ७०० श्लोकले युक्त सप्तशती चण्डी सार्वजनिक भएको छ । यस सप्तशती चण्डी प्रकाशित भएबाट हाम्रो सांस्कृतिक अङ्ग बनेका कतिपय रहस्यात्मक रीतिरिवाजहरू पुनर्मूल्याङ्कित हुने, परिमार्जित हुने, सही साधना र उपासना अवलम्बित हुने अनि साधना विशेष फलीभूत हुने एवं साधकहरूलाई अध्ययन-अनुसन्धान, खोज, विश्लेषण, मनन र

चिन्तनपछि पत्ता लागेको अन्तिम रहस्यमा गहिरिएर साधना गर्ने सोच विकसित हुने कुरालाई समेत दृष्टिगत गरी यस संस्थाले प्रस्तुत ग्रन्थ प्रकाशन गर्ने निर्णय गरेको हो।

प्रस्तुत ग्रन्थको प्रकाशनका सन्दर्भमा लम्बकर्ण भट्टकै कुलपरम्पराकी कुलवधू श्रीमती अन्नपूर्णा उपाध्याय भट्टबाट संस्थालाई आर्थिक सहयोग प्राप्त भएको छ। जसका लागि यो संस्था उहाँप्रति हार्दिक कृतज्ञता ज्ञापन गर्दछ।

अन्त्यमा तन्त्रसम्बन्धी खोज-अनुसन्धानका लागि विद्वान् विदुषीहरूबाट प्राप्त हुने अमूल्य सुझाव र सहयोगको यस संस्था सदैव स्वागत गर्दछ।



सम्पादकीय

नवमीसिंहले रचना गरेको चण्डीभक्तिविनोदिनी तथा उनैले परिष्कार गरेको सप्तशती चण्डीको आफूले अत्यन्त मिहिनेतसाथ सम्पादन गरेको पाण्डुलिपि हामीलाई हस्तान्तरण गर्दै आदरणीय गुरु प्रा. विद्यानाथ उपाध्यायले यसमाथि थप अनुसन्धान गरी प्रकाशमा ल्याउने जिम्मेवारी सुम्पेअनुरूप हामीले कार्य आरम्भ गऱ्यौँ। सप्तशती चण्डीको प्रचलित पाठभन्दा केही भिन्न र थप पाठहरू पनि यस ग्रन्थमा भएको तर त्यसको स्रोत उल्लेख नभएकाले त्यसको खोजी गर्नुपर्ने आवश्यकता हामीलाई बोध भयो। सोही आवश्यकता बमोजिम खोजी गरिएका र प्राप्त भएसम्मका थप र भिन्न पाठहरूको स्रोत प्रस्तुत पुस्तकमा पादटिप्पणीमा दिइएको छ। अझै पनि यस ग्रन्थमा थप भएका केही श्लोकहरूको स्रोत पत्ता लगाउनुपर्ने आवश्यकता विद्यमान छ अतः यस दिशामा विद्वान्हरूको ध्यान आकर्षित हुने र थप अनुसन्धानको कार्य अघि बढ्ने विश्वास गर्न सकिन्छ।

नवमीसिंहले परिमार्जन गरेको सप्तशती चण्डी उहाँकै वंशज श्रीकेशरबहादुर राजभण्डारीले वि. सं. २०४३ मा प्रकाशित गर्नुभएको थियो। नेपालको विशिष्ट तन्त्रसाधकको यस कृतिलाई सार्वजनिक गर्ने उहाँको कार्य अत्यन्त प्रशंसनीय कुरा हो। तर उहाँले प्रकाशित गर्नुभएको कृतिमा भाषागत त्रुटि रहन गएको र सप्तशती चण्डीको प्रचलित पाठपरम्परा अनुरूप रात्रिसूक्त, देव्यथर्वशीर्ष, नवार्णविधि, सप्तशतीन्यास, देवीसूक्त समावेश नगरिएकाले सप्तशतीको अनुष्ठान गर्ने साधकसाधिकाहरूका लागि उक्त कृति अपूर्ण जस्तो देखिएको हुनाले अनुसन्धानमा रुचि राख्ने पाठक एवं साधकसाधिकाहरूका लागि पनि उत्तिकै महत्त्वपूर्ण हुन सकोस् भन्ने उद्देश्यले सम्पूर्ण पाठहरू समावेश गरी यस ग्रन्थको सम्पादन गरिएको छ। अतः यस ग्रन्थको उपयोगबाट साधकसाधिकाहरूलाई भगवती चण्डीको कृपापूर्ण दृष्टि प्राप्त भइरहने र

अनुसन्धित्सु पाठकले पनि अनुसन्धानको भोक मेटाउने विश्वास लिइएको छ ।

यस ग्रन्थको सम्पादनका क्रममा आवश्यक सुझाव प्रदान गरी सहयोग पुऱ्याउनुहुने विद्वान् महानुभावहरू तथा साधकसाधिकाहरूप्रति हार्दिक कृतज्ञता प्रकट गर्न चाहन्छौँ ।

अन्त्यमा अज्ञानतावश अथवा प्रमादवश मुद्रणसम्बन्धी कुनै त्रुटि रहन गएका भए दयाशील विद्वान्‌विदुषी एवं साधकसाधिकाहरूले त्यसलाई संशोधनपूर्वक ग्रहण गर्नुहुने नै छ, धन्यवाद !

सम्पादकसन्दोह

चण्डीभक्तिविनोदिनीको सङ्क्षिप्त परिचय

प्रा. विद्यानाथ उपाध्याय भट्ट

सप्तशतीको विशेषता

मार्कण्डेय पुराणअन्तर्गतको सप्तशती ज्यादै प्रसिद्धि प्राप्त ग्रन्थ हो। यसको अर्को नाम चण्डी र देवीमाहात्म्य पनि हो। शाक्त परम्परामा आस्था राख्ने हिन्दुधर्मावलम्बीहरू बडो आदरका साथ सप्तशतीको पाठ गर्दछन्। सप्तशती एउटा सिद्ध ग्रन्थ हो जसको प्रत्येक श्लोक, प्रत्येक अक्षर मन्त्र मानिन्छ। यसको सामान्य पाठदेखि लिएर शतचण्डी, सहस्रचण्डी, अयुतचण्डी आदिको विधान पुराण तथा तन्त्रग्रन्थहरूमा यत्रतत्र पाइन्छ। शाक्तपरम्परा रहेका घरहरूमा, देवीमन्दिरहरूमा तथा शक्तिपीठमा यसको विधिपूर्वक पाठ गरिन्छ, यसैद्वारा पनि शक्तिको उपासना गरिन्छ।

सप्तशतीका आराधक नवमीसिंह

काठमाडौंका प्रसिद्ध मल्ल राजा प्रताप मल्लका नाति भूपालेन्द्र मल्लका महा अमात्य नवमीसिंहले चण्डीभक्तिविनोदिनीको नाममा सप्तशती ग्रन्थरत्नको सम्पादन गरेका थिए। खोजका दृष्टिले उक्त ग्रन्थ त्यतिबेला पनि ज्यादै महत्त्वपूर्ण र उपयोगी मानिएको थियो त्यसैले यसको महत्त्व जान्ने व्यक्तिले उक्त ग्रन्थ सार्न लगाएर प्रतिलिपि आफ्नो घरमा सुरक्षित राखे। राष्ट्रिय अभिलेखालय, केशर पुस्तकालय र घरघरमा पनि यसका सारिएका हस्तलिखित प्रतिहरू धेरै सङ्ख्यामा उपलब्ध छन्। कति परिवारमा त यसैको पाठ गर्ने परम्परा पनि चलेको पाइएको छ। नेपालका यी विद्वान्का खोजले आवश्यक प्रचार पाउन नसकेकाले यस ग्रन्थले व्यापकता पाउन सकेको छैन। अनुसन्धानको आजको युगमा पनि यसको समुचित शोधकार्य हुन सकेको छैन। यो नेपालका प्रतिभाको देन हो। यसको अंगीकारले देशको गौरव वृद्धि हुन्छ, विद्याको क्षेत्र समृद्ध हुन्छ। यसका साथै जगज्जननी

भगवती दुर्गाको माहात्म्य पाठमा यसले महत्त्वपूर्ण योगदान पुऱ्याउँछ।

चण्डीभक्तिविनोदिनीको विशेषता

महा अमात्य नवमीसिंह आफ्नो ग्रन्थमा सर्वप्रथम बाला अर्पणाको मङ्गलपरक स्तुति गरेपछि भन्छन् - "सप्तशती" समस्त भुवनमा प्रसिद्ध छ। नाम यसको सप्तशती (सात सयको सङ्ग्रह) भन्ने छ तर आजसम्म उपलब्ध कुनै ग्रन्थमा सात सय श्लोक सङ्ख्या पूर्ण भएको पाइएको छैन । यसैले मलाई (यसको पूर्णताबारे) सन्देह भयो । मैले अनेकौं ग्रन्थहरूको अध्ययन गरेर निर्णय गरें। ग्रन्थ (आठ अक्षरको एक पाउ र चार पाउको एक श्लोकलाई यौटा ग्रन्थ भनिन्छ।) सातै सय हुनुपर्दछ। यसमा प्रमाण पाइयो र मैले सातै सय श्लोक फेरि लेखें (लेखाएँ) त्यसकारण "सप्तशती" (सात सय श्लोक भएको ग्रन्थ) को पाठमा अब कुनै असङ्गति छैन।"यसरी श्रीभूपालेन्द्र मल्ल राजाको राज्यकालमा, नेपाल राष्ट्रमा अनेकौं देवताका पीठहरूले सुशोभित, कान्तिपुर शहरमा चण्डी भगवतीका भक्तिले प्रेरित भएर महा अमात्य नवमीसिंहले समस्त तन्त्रहरूबाट झिकेर भक्तिविनोदिनी ग्रन्थ तयार पारे भन्ने कुरा प्रस्ट हुन आउँछ।

यसै सन्दर्भमा ग्रन्थकारले "शम्भु-नित्यातन्त्र"को प्रमाण दिएर लेखेका छन्

"सावर्णिः सूर्यतनयोः" (सप्तशतीको आरम्भको श्लोकांश) देखि "सावर्णिर्भविता मनुः" (सप्तशतीको आखिरीको श्लोकांश)सम्म "उवाच" आदिलाई छाडेर सात सय श्लोकसङ्ख्या पूर्ण छन्। मार्कण्डेयकै वाक्य एकदेखि तेह्र अध्यायसम्ममा क्रमशः ८६, ७१, ४७, ४१, १४७, २०, २६, ६६, ४०, २८, ७१, ३९ र १८ श्लोकहरू छन् । यिनीहरूको सम्पूर्ण सङ्ख्या ७०० हुन्छ । "अथर्वशिरस्" उपनिषद् अन्तर्गत रहेको यो सप्तशती तीनै लोकमा गुप्त र दुर्लभ छ, जसले यसको विधिपूर्वक साधना गर्दछ, उसले चाँडै नै सिद्धि प्राप्त गर्दछ।"

यसदेखि अतिरिक्त आजसम्म जति पनि सप्तशती (चण्डी)को ग्रन्थ लिखित वा प्रकाशित रूपमा भेटिएका छन्, कुनैमा पनि नवमीसिंहले भनेझैं सात सय श्लोकसङ्ख्या पूर्ण छैन । "सप्तशती" यस नामको अर्थ सात सय मन्त्र (सात सय श्लोक होइन) भन्ने लगाएर "मार्कण्डेय उवाच, राजोवाच, देवी उवाच" आदि वाक्यहरूलाई र "नमस्तस्यै

नमस्तस्यै नमस्तस्यै नमो नमः" यस एउटै श्लोकको आधा भागभित्र पनि

तीनवटा मन्त्रहरू मानेर सात सय मन्त्र विद्वान्हरूले पुऱ्याएका छन् । टीका-टिप्पणीकार विज्ञहरूले पनि यसैलाई ठीक मानेर तदनुसार साधना गर्ने व्यवस्था दिएका छन् ।

मार्कण्डेय पुराणकै पनि उपलब्ध भएसम्म पुराना हस्तलिखित प्रतिहरू हेर्दा समेत चण्डीभक्तिविनोदिनीमा सम्पादन भएझैं सात सयवटा श्लोक पूरा पाइँदैनन् ।

चण्डीभक्तिविनोदिनीको स्वरूपसमीक्षा

चण्डीभक्तिविनोदिनीमा अरु ग्रन्थहरूमा नभएका श्लोकहरूमध्ये पहिलो अध्यायमा ८, दोस्रोमा साढे २, तेस्रोमा ६, चौथोमा साढे ४, पाँचौंमा ७३, सातौंमा १, आठौंमा साढे ४, नवौंमा १, दशौंमा आधा, एघारौंमा साढे २०, बाह्रौंमा १ र तेह्रौंमा आधा गरी जम्मा साढे १२३ श्लोकहरू (१४७ पङ्क्तिहरू) थप भएका छन् । अधिकांश स्तुतिपरक भएका यी श्लोकहरू सम्भवतः प्रस्तुत ग्रन्थमा मात्र देख्न पाइन्छन् ।

विषयका दृष्टिले कतिपय श्लोकहरूले प्रचलित ग्रन्थहरूमा रहेका श्लोकहरूद्वारा व्यक्त भावनाका अन्तरलाई जोड्ने प्रयत्न पनि गर्दछन् भने कतिपय श्लोकहरू पूर्वापर शैलीसँग अलि मेल नखाएजस्ता पनि देखिन्छन् । तर, कतिपय स्तुतिपरक श्लोकहरू भने अरुसँग पूरापूर मिल्नु उचित र स्वाभाविक पनि हो ।

यतिमात्र होइन प्रस्तुत ग्रन्थमा अन्य प्रचलित पुस्तकमा भएका श्लोक पनि नभएर तिनीहरूका ठाउँमा नयाँ श्लोकहरूले स्थान पाएको देखिन्छ । विभिन्न मातृकाहरू (हस्तलिखित प्रतिहरू) मा शब्द र श्लोकको पाठभेद त हुने नै भयो सन्निवेश पनि केही अघिपछि मिलाइएको देखिन्छ ।

चण्डीभक्तिविनोदिनीमा पाठ गरिने केवल मूल श्लोकहरूमात्र होइनन्, साधनाविधिको पनि सन्निवेश गरिएको छ । मूलपाठ सुरु हुनुभन्दा अगि ग्रन्थपरिचय, प्रसङ्ग, सप्तशतीश्लोकसङ्ख्या व्यवस्था, पाठक्रम, पाठव्यवस्था, अर्गलास्तुति, कीलकस्तुति र कवचको सन्निवेश गरिएको छ। यसै ग्रन्थमा होमविधि, पुरश्चरणविधि, आवृत्तिफल, नवचण्डीविधान, शतचण्डीविधान, सहस्रचण्डीविधान, कालादिव्यवस्था, कुमारीपूजा,

दीपदानविधि र सप्तशती धारणविधि समेत उल्लेख गरिएको छ । फेरि

मूल पाठको लगत्तै पछि रहस्यत्रयको सन्निवेश छ ।

अर्गला, कीलक, कवच, मूलपाठ र रहस्यत्रयपाठबाहेक अमात्य नवमीसिंहले विभिन्न स्रोतग्रन्थहरूको नाम दिंदै उनीहरूको उद्धरणपूर्वक प्रामाणिक रूपमा अन्य विषयहरू समेत सङ्कलन गरी व्यवस्थित रूपमा सन्निवेश गरेको देखिन्छ ।

ग्रन्थकारले मार्कण्डेय पुराणका अतिरिक्त मारीचकल्प, शम्भुनित्यातन्त्र, मेरुतन्त्र, सप्तसतीकल्प, हादिमत, महाकालसंहिता, वाराही तन्त्र, महाहाटकतन्त्र, तन्त्रराज, हरगौरीतन्त्र, हरगौरीसंवाद, क्रोडतन्त्र आदिलाई आधार ग्रन्थका रूपमा लिएको कुरा उनले दिएका नाम र उद्धरणबाट स्पष्ट हुन्छ ।

उपसंहार

लेखक नवमीसिंहले "अनेकौं मन्त्रहरूको अवलोकन गरेर विद्वान्हरूसँग परामर्श गरी श्रीमहादेव (महेश) द्वारा प्रणीत तथ्यहरूलाई आफ्नो भएको बुद्धिले भगवती चण्डीकाको भक्तिले प्रेरित भएर मैंले यो ग्रन्थको रचना गरें" भन्दै यसमा अनेकौं ग्रन्थहरूको प्रमाणहरू दिइएका छन् । "ठीक-बेठीक केकस्तो छ, राम्ररी बुझेर, विचार गरेर बुद्धिमानले यसको शोधन गर्नु उचित छ" भन्ने धारणा पनि उल्लेख गरेका छन् । पुष्पिका वाक्यमा "इति नवमीसिंहले बनाएको "चण्डीभक्तिविनोदिनी"मा पहिलो (दोस्रो, तेस्रो) पटल समाप्त भयो" भन्ने संस्कृतवाक्य लेखिएको छ ।

उपर्युक्त चण्डीभक्तिविनोदिनीका मातृकाहरू (हस्तलिखित) अर्वाचीन नेवारी लिपिमा वा देवनागरी लिपिमा लेखिएका पाइन्छन् । यिनीहरूमध्ये स्वयं नवमीसिंहले आफ्ना हातले लेखेको कुनै ग्रन्थ छ वा छैन ? छ भने कुन हो ? कहाँ छ ? आदि कुराहरू व्यापक अनुसन्धानका क्रममा पत्ता लाग्ने कुराहरू हुन् । तर, स्वयं नवमीसिंहको सन्तति नःघल टोल काठमाडौंका राजभण्डारी परिवार हुन् भन्ने विश्वास गर्नुपर्ने ऐतिहासिक र परम्परागत आधारहरू छन् । यो पनि नवमीसिंहको जीवनीसम्बन्धी खोजबाट प्रमाणित हुन सक्तछ ।

अन्त्यमा, जाज्वल्यमान शक्तिपीठहरू विद्यमान शक्तिक्षेत्र नेपालमा, जसको सुरक्षा नित्य निरन्तर प्रबल शक्तिहरूले नै स्वयं गरिरहेको कुरा प्राचीन इतिहास एवं संस्कृतिका आधारहरूले प्रमाणित गर्दछन्, अनन्त

तन्त्रग्रन्थहरू शोध, खोज केही नभई अज्ञानको आवरणभित्र प्रच्छन्न भएर रहेका छन्, रहन बाध्य छन् – यो खुसी र गौरवको कुरा कदापि होइन ।

ठूलाठूला पुस्तकालयहरूमा मात्र होइन, घरघरै नेपालमा खास गरेर कान्तिपुर, ललितपुर र भक्तपुरमा यस्ता ग्रन्थहरू छरिएर रहेका छन् । अनुसन्धान हुँदैन, अनुसन्धान गर्ने वा गर्नसक्ने व्यक्तिहरूलाई वर्तमान भौतिकवादका अजिङ्गरले निलिसक्न आँट्यो । प्राचीन धार्मिक परम्परा लुप्त हुँदै जान थाले । अलि दिनमा खोज गर्ने चिह्नसमेत पनि मेटिएर जाने भयावह आशङ्का छ ।

यस स्थितिमा यस्ता ग्रन्थहरूको शोधकार्य संस्थागतरूपमा गर्ने, गराउने काममा राष्ट्रले चाख लिनु ज्यादै आवश्यक छ । विलम्ब भैसक्यो । राष्ट्रको गौरव विदेशी शिक्षाले ल्याएको विदेशी संस्कृतिले बढाउँदैन, बरु मेट्दै लैजान्छ । राष्ट्रको गौरव बढाउने लक्ष्य लिने हो भने यस्तै कामको योजना र कार्यक्रमहरू बन्नु, कार्यान्वित हुनु र यस कार्यमा राष्ट्रको ध्यान जानु अत्यावश्यक छ ।

यौटा प्राचीन तन्त्रसाधक नेपालीले बडो श्रद्धा र भक्तिपूर्वक विद्वत्तापूर्ण ढङ्गले शोध-खोज गरी परम्परागत क्रम र शैलीको मान्यता प्राप्त रेखाबाट अलि माथि उठेर सम्पादन गरेको सप्तशती, त्यसमा रहेको वैशिष्ट्य, पाठ सङ्गति, प्रयोगविधि समाविष्ट भएको चण्डीभक्तिविनोदिनी सहित रचना गरिएको प्रस्तुत ग्रन्थ "लम्बकर्ण भट्ट तन्त्र विद्या संस्था"ले आफ्नो प्रथम पुष्पका रूपमा प्रकाशन गरेको यो कार्य श्रीमहाकाली, श्रीमहालक्ष्मी, श्रीमहासरस्वती यी त्रिशक्तिकै कृपापूर्ण अनुग्रहको फल हो । यसमा आधारित साधनापद्धतिले उपासना भएमा भगवती प्रसन्न भई फल प्रदान गर्ने कुरामा विश्वस्त हुनुपर्दछ ।

यसको प्रकाशनबाट नेपालको सप्तशती साधना परम्परामा गौरवपूर्ण क्रान्ति आउने छ । अरु परम्परावादी साधकले पनि यसैलाई भविष्यमा अपनाउँदै जाने आशा राख्न सकिन्छ । त्यसैले प्रस्तुत प्रकाशनले सम्बद्ध तन्त्रसाधना परम्परामा श्रीवृद्धि भएको म मान्दछु ।



पुरोवाक्

नवमीसिंहको परिचय

नवमीसिंहको पूरा नाम नवमीसिंह भण्डेल हो। तिनै भण्डेलहरू पछि भण्डारी, आजकल राजभण्डारी र नेवारी परम्परामा "भनी" पनि भनिन्छन्। यिनको जन्ममितिका सम्बन्धमा ठोस प्रमाण फेला परेको छैन तर यिनको जन्म वि. सं. १७०४ देखि १७०९ को आसपासमा भएको अनुमान भने गरिएको छ।[1] यिनको जन्म काठमाडौँको नघलटोलमा रामनवमीका दिन भएको थियो। रामनवमीमा जन्मेकाले यिनको नाम नवमीसिंह भन्ने रह्यो। नवमीसिंह भण्डेल वि.सं. १७५२ मा तत्कालीन काठमाडौँ राज्यका महामात्य पदमा नियुक्त भएका देखिन्छन्। त्यतिखेर काठमाडौँमा भूपालेन्द्र मल्ल राजा थिए। वि.सं. १७५२ मा भास्कर मल्ल राजा हुँदा राज्यव्यवस्था हेर्ने प्रमुख व्यक्ति नवमीसिंह नै देखिन्छन्। यिनको मृत्यु वि.सं. १७६० मा भयो।

नवमीसिंह तन्त्रशास्त्रका मर्मज्ञ एवं दीक्षित साधक थिए। यिनका केही तन्त्रसम्बन्धी रचनाहरू पनि देखिन्छन्। ती हुन् -

१) तन्त्रचिन्तामणि

२) कुलमुक्तिकल्लोलिनी

३) चण्डीभक्तिविनोदिनी

४) पुष्परत्नाकर ।

---

१ विद्यानाथ उपाध्याय भट्ट, तन्त्रचिन्तामणि, (दाङ : ने.सं.वि.) वि. सं. २०५४, भूमिका पृ. ८ ।

चण्डीभक्तिविनोदिनीको विषयवस्तु

नवमीसिंहको चण्डीभक्तिविनोदिनी मौलिक ग्रन्थ नभएर सङ्ग्रह ग्रन्थ हो। यसमा भगवती चण्डीको पूजनविधिदेखि लिएर मन्त्रोद्धार तथा पाठविधान आदि विभिन्न विषयका सम्बन्धमा विभिन्न तन्त्रहरूको वचनलाई सङ्ग्रह गरिएको छ। यस कृतिमा तीन पटल रहेका छन्। ती तीनै पटलमा रहेको विषयवस्तुलाई यहाँ सङ्क्षेपमा निर्देश गरिएको छ।

क) प्रथम पटल

आफ्नो भक्तको सङ्कल्पलाई कृपापूर्वक तत्क्षण पूरा गर्ने बाला अपर्णादेवीको आश्रय ग्रहण गर्दछु भन्ने मङ्गलाचरण श्लोकबाट प्रथम पटल आरम्भ भएको छ। सप्तशती भनेर संसारमा विख्यात भए तापनि सात सय श्लोकसङ्ख्या पूरा नभएकोमा मलाई संशय भयो त्यसैले अनेक तन्त्रग्रन्थहरूको अध्ययनबाट सातै सय श्लोक हुनुपर्ने प्रमाणपूर्वक निश्चय गरी श्लोकहरूको पुनर्लेखन मैले गरें त्यसैले अब यस विषयमा कुनै असङ्गति छैन भन्ने ठोकुवा नवमीसिंहले गरेका छन्। समस्त पीठहरूले युक्त सुखको सागरस्वरूप नेपालमण्डलअन्तर्गत रहेको कान्तिपुर नामक नगरमा राजा भूपालेन्द्र मल्लका मन्त्री चण्डीभक्तिपरायण नवमीसिंहद्वारा समस्त तन्त्रहरूको वचन सङ्ग्रह गर्दै चण्डीभक्तिविनोदिनी तयार गरियो भन्ने भाव ६ वटा श्लोकमा व्यवस्थित गरिएको छ। त्यसपछि मारीचकल्पको अगस्त्य र ब्रह्मा तथा देवी र ईश्वरको संवाद उद्धृत गर्दै कलियुगमा वाममार्ग र दक्षिणमार्ग दुवैबाट फलप्रदान गर्ने चण्डीसदृश सिद्धिदायक विद्या अर्को नभएको प्रसङ्ग उल्लेख गरिएको छ। त्यसपछि शम्भुनित्यातन्त्रले दिएको प्रमाणका आधारमा उवाच आदि विना नै दुर्गासप्तशतीमा सात सय श्लोकको व्यवस्था उनले स्पष्ट्याएका छन्।

जसअनुसार -

प्रथम अध्याय	- ८६ श्लोक	चतुर्थ अध्याय	- ४१ श्लोक
द्वितीय अध्याय	- ७१ श्लोक	पञ्चम अध्याय	- १४७ श्लोक
तृतीय अध्याय	- ४७ श्लोक	षष्ठ अध्याय	- २० श्लोक

सप्तम अध्याय - २८ श्लोक	एकादश अध्याय - ७१ श्लोक
अष्टम अध्याय - ६६ श्लोक	द्वादश अध्याय - ३९ श्लोक
नवम अध्याय - ४० श्लोक	त्रयोदश अध्याय - १८ श्लोक
दशम अध्याय - २८ श्लोक	जम्मा- ७०० श्लोक

सप्तशती चण्डीको प्रथम, मध्यम र उत्तर चरित्रको ऋषि, छन्द, देवता, तत्त्व, विनियोग आदिका बारेमा मेरुतन्त्रमा उल्लिखित वचनलाई यसै पटलमा सङ्ग्रह गरिएको छ। त्यसैगरी दक्षिणमार्गबाट उपासना हुने लक्ष्मी, ललिता, गायत्री आदि सात सती (देवी) तथा वाममार्गबाट उपासना हुने काली, तारा, छिन्नमस्ता आदि सात सती (देवी) हरूको चरित्र र मन्त्रको प्रतिपादन भएकाले सप्तशती वा चण्डीलाई सप्तसती पनि भन्न सकिने मेरुतन्त्रको वचन यहाँ उद्‌धृत गरिएको छ। यसै पटलमा शम्भुनित्यातन्त्र, सप्तसतीकल्प र मेरुतन्त्रमा भएको चामुण्डाको मन्त्रोद्धार र मन्त्रको बीज तथा वर्णको स्वरूपलाई उद्‌धृत गरिएको छ। त्यसैगरी महाकालसंहिता, वाराहीतन्त्र, महाहाटकतन्त्र र तन्त्रराजतन्त्रमा प्रतिपादित दीक्षाको महत्त्व र दीक्षापूर्वक नै जप, न्यास, अर्चन आदि गर्नुपर्ने विधानलाई यहाँ समेटिएको छ। यसै पटलमा शम्भुनित्यातन्त्र, सप्तसतीकल्प, मेरुतन्त्र, मार्कण्डेयपुराण र हादिमतमा उल्लिखित चण्डीपूजनविधिलाई उद्‌धृत गरिएको छ। वाराहीतन्त्र र मत्स्यसूक्तमा उल्लिखित सप्तशती पाठनियमको उल्लेखका साथ प्रथम पटल समाप्त भएको छ।

ख) द्वितीय पटल

पाठविधान नामक द्वितीय पटलमा चण्डीपाठको महत्त्व बुझाउने एवं नित्यचण्डीपाठविधान र हवनविधिका विषयमा प्रकाश पार्ने शम्भुनित्यातन्त्र, सप्तसतीकल्प, मेरुतन्त्र, हादिमत र वाराहीतन्त्रका वचनहरूको सङ्ग्रह गरिएको छ

ग) तृतीय पटल

यस अन्तिम पटलमा चण्डीपुरश्चरणविधि, चण्डीपाठफल, विभिन्न काम्यकर्ममा चण्डीको प्रयोगविधि, नवचण्डीविधान,

शतचण्डीविधान, सहस्रचण्डीविधान, चण्डीपाठका लागि उत्तम स्थान, काल, मण्डपनिर्माणविधि, कुमारीपूजनविधि, सप्तशतीधारणविधि र समय आदि विषयवस्तु समेटिएको छ । यस सन्दर्भमा ती विषयवस्तुहरूमाथि प्रकाश पार्ने वायवीयसंहिता, वीरचूडामणि, मेरुतन्त्र, मारीचकल्प, वाराहीतन्त्र, मार्कण्डेयपुराण, हरगौरीतन्त्र, शम्भुनित्यातन्त्र, हादिमत आदि तन्त्रका वचनहरूको सङ्ग्रह यस पटलमा भएको छ ।

नवमीसिंहले परिष्कार गरेको सप्तशती चण्डीको विशेषता

नवमीसिंहले सप्तशती चण्डीको भूमिकास्वरूप रचना गरेको चण्डीभक्तिविनोदिनीमा आफूले विभिन्न तन्त्रग्रन्थहरूको अध्ययन गरेर सप्तशती चण्डीमा उवाच आदि विना नै सात सय श्लोक हुनुपर्ने सप्रमाण निर्णयमा पुगेको र श्लोकहरूको पुनर्लेखन गरेको उल्लेख गरेका छन् । त्यसैले उनले परिष्कार गरेको सप्तशती चण्डी नामअनुरूप सातै सय श्लोकले युक्त हुनु यसको प्रमुख विशेषता हो ।

सप्तशती चण्डीका विभिन्न टीकाहरू पाइन्छन् । तीमध्ये श्रीभास्करराय मखिन्प्रणीत गुप्तवती, श्रीचतुर्धर मिश्रविरचित दुर्गावबोधिनी देवीमाहात्म्यतात्पर्यटीका, श्रीशन्तनु चक्रवर्तीविरचित श्रीचण्डिका माहात्म्यटीका, श्रीनागोजी भट्टकृत सप्तशतीव्याख्यान, श्रीभगीरथविरचित जगच्चन्द्रचन्द्रिका नामक टीकाहरू प्राचीनता र प्रसिद्धिका हिसाबले बढी महत्त्वपूर्ण मानिन्छन् । ती टीकाहरूमा उपलब्ध र व्याख्यात पाठहरूका आधारमा के कुरा ज्ञात हुन आउँछ भने रथक्रान्ता, विष्णुक्रान्ता र अश्वक्रान्ता भूमिपिच्छे ६४ तन्त्रहरू फरक भएझैं स्थानविशेषले सप्तशती चण्डीका पनि पाठभेद रहेका हुन सक्छन् । यस कुराको सङ्केत गुप्तवती टीकाको उपोद्घातमा पाइन्छ ।[२] त्यसैले नवमीसिंहले विभिन्न तन्त्रग्रथहरूका आधारमा ठोस निर्णयमा पुगी उवाच आदि विना नै सात सय श्लोकले युक्त सप्तशती चण्डीको पुनर्लेखन गरेको अनुमान गर्न सकिन्छ । उनले परिमार्जन गरेको सप्तशती

---

२ यानि तु क्वचिद्देशे सार्धानि षट्शतानि क्वचित्तधिकान्यपि श्लोकानां पठ्यन्ते तानि कात्यायनी भगवत्येव जानाति .... । दुर्गासप्तशती (गुप्तवत्यादिसप्तटीकासंवलिता), मुम्बई : खेमराज श्रीकृष्णदास प्रकाशन, सन् १९९८, उपोद्घात, पृ. ८ ।

चण्डीका थप पाठहरू मौलिक नभएर विभिन्न तन्त्र एवं पुराणका प्रचलित पाठ हुन सक्छन्, त्यसको थप खोज गरिनु आवश्यक छ। त्यसो हुन सके यस ग्रन्थको प्रामाणिकतामा अझै वृद्धि हुनेछ। अस्तु ॥

माधवप्रसाद लामिछाने
उपप्राध्यापक, नेपाल संस्कृत विश्वविद्यालय
वाल्मीकि विद्यापीठ, प्रदर्शनीमार्ग, काठमाडौं।



विषयसूची



श्रीगणेशाय नमः । ॐ नमश्चण्डिकायै ॥

स्वभक्तसङ्कल्पितचित्तवृत्तिं संपूरयन्तीं कृपया क्षणेन ।
तपोलतामिन्दुविभूषणस्य बालामपर्णामहमाश्रयामि ॥
ख्याता सप्तशती समस्तभुवने सङ्ख्या न पूर्णा क्वचित् ।
सम्यक् संशयशालिना ननु मया ग्रन्थैः कृतो निर्णयः ॥
ज्ञात्वा सप्तशतं प्रमाणमधुना श्लोकाः पुनर्लेखिता-
स्तस्मात्सप्तशतीति पाठविषये नासङ्गतिः काचन ॥
सप्तशतीति तालव्यो दन्त्योऽप्युक्तः प्रमाणतः ।
सन्देहो नात्र कर्तव्यः प्रमाणमुभयं मतम् ॥
भूपालेन्द्रमहीश्वरेण वलिते नेपालभूमण्डले ।
कान्तिनामपुरे सुखैकनिलये पीठैः समस्तैर्युते ॥
चण्डीभक्तिपरेण चारु नवमीसिंहेन संमन्त्रिणा ।
तेने भक्तिविनोदिनी च सकलान्याहृत्य तन्त्राण्यहो ॥

मारीचकल्पे-

ब्रह्मलोके सुखासीनं सुरासुरगुरुं प्रभुम् ।
अगस्त्यः परिपप्रच्छ साष्टाङ्गं प्रणिपत्य च ॥
अगस्त्यश्च पुलस्त्यश्च दुर्वासाऽऽरण्यकादयः ।
एवमादिमुनीन्द्राणां वृन्दमध्ये पितामहम् ॥
पप्रच्छ तं मुनिश्रेष्ठो ह्यगस्त्यश्च माहात्म्यवान् ।

अगस्त्य उवाच

केनोपायेन देवेश! महदैश्वर्यसम्भवः ॥
शास्त्रज्ञानं कवित्वञ्च शत्रुनिग्रहणं तथा ।
वश्याऽऽकर्षणविद्वेषस्तम्भनोच्चाटनादिकम् ॥
स्तम्भनं परसैन्यस्य स्वसैन्यस्य च रक्षणम् ।
एतत्सर्वं सुनिश्चित्य वद मे सुरपूजित ॥

ब्रह्मोवाच

साधु पृष्टं त्वया विप्र! वक्ष्यामि सकलं तव ।
पार्वत्यै परमप्रीत्या शम्भुना कथितं पुरा ॥
कैलासे शिखरे रम्ये पार्वत्या सह संस्थितः ।
सर्वलोकोपकारार्थं प्रोवाच वृषभध्वजः ॥

श्रीदेव्युवाच

कैलासपीठमध्यस्थं वीरेशं परमं प्रभुम् ।
उक्तम् या तु महाविद्या मूलमन्त्रं त्वया प्रभो! ॥
एष मे संशयो देव! वक्तुमर्हसि शूलभृत् ।

ईश्वर उवाच

साधु देवि! महाप्राज्ञे! अपूर्वं परिपृच्छसि ।
प्रवक्ष्यामि न सन्देहो येन सिध्द्यन्ति साधकाः ।
सप्तशत्यास्तु सकलं तत्त्वं वेद्म्यहमेव हि ॥
पादोन श्रीहरिर्वेत्ति वेत्त्यर्धं तु प्रजापतिः ।

व्यासस्तूर्यांशकं वेत्ति कोट्यंशमितरे जनाः ॥
कलौ न चण्डीसदृशी सिद्धिदा भुवनत्रये ।
वामदक्षिणमार्गाभ्यामधिकारिफलप्रदा ॥

अथ सप्तशतीश्लोकव्यवस्था

शम्भुनित्यातन्त्रे –

आद्यं तन्त्रं विजानीहि सप्तशत्याः शुभावहम् ।
सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः ॥
उवाचादि विना सप्तशतश्लोकसुसङ्ख्यकम् ।
मार्कण्डेयस्य वाक्यानि प्रथमाध्यायके भवेत् ॥
त्रयोविंशतिसङ्ख्या स्यान्नागसङ्ख्या तयोः पृथक् ।
विधेर्वाक्यं कलासङ्ख्या विष्णोश्चैकं तथा मधोः[1] ॥
मुनेस्त्वेकोनत्रिंशत्स्यात्षडशीतिरितीरिताः ।
द्वितीये तु सुरेशानि! एकसप्ततिरिष्यते ॥
तृतीये तु महादेवि! देव्याश्चैकमुदाहृतम् ।
मुनेः षट्चत्वारिंशत्स्यादन्येषां कथनं न हि ॥
सप्ताधिचत्वारिंशत्[2] स्यादेकाधिकं चतुर्थके ।
देव्याश्चैकं मुनेस्त्वेकं देवानां सर्वमेव हि ॥
पञ्चमेऽध्यायके सप्तचत्वारिंशत्शतोत्तरम् ।
ऋषेस्तु मातृकासङ्ख्या देवानामष्टसप्ततिः ॥
देव्यास्तु ऋतुसङ्ख्या स्याद्दूतस्य च त्रयोदश ।

---

१ मधोरित्यनेन मधुकैटभौ बुध्येते ।

२ अत्र अधि पदं अधिकार्थपरम् ।

षष्ठे तु विंशतिः प्रोक्ता सप्तमे रसविंशतिः ॥
अष्टमे रसषष्ठिः स्याच्चत्वारिंशच्च रत्नके ।
दशमेऽष्टाविंशतिरेकादशे तु भूमिसप्ततिः ॥
नवत्रिंशद् द्वादशे स्यात्ततो ह्यष्टादश स्मृतः ।
एवं सप्तशती प्रोक्ताह्यथर्वशिरसि स्थिता ॥
त्रैलोक्येऽन्येषु तन्त्रेषु गोपितं तेषु दुर्लभम् ।
एवं भूत्वा महाचण्डी ह्यचिरात् सिद्धिदा भवेत् ॥
सप्तशत्याश्चरित्रे तु प्रथमे ब्रह्मभूमुनिः ।
छन्दो गायत्रमुदितं महाकाली तु देवता ॥
वाग्बीजं पावकं तत्त्वं धर्मार्थे विनियोजनम् ।
प्रयोगाणां तु नवतिर्मारणे मोहनेऽत्र तु ॥
मध्यमस्य चरित्रस्य मुनिर्विष्णुरुदाहृतः ।
उष्णिक् छन्दो महालक्ष्मीर्देवता बीजमद्रिजा ॥
वायुस्तत्त्वं धनप्राप्त्यै विनियोग उदाहृतः ।
उच्चाटे स्तम्भने चात्र प्रयोगाणां शतद्वयम् ॥
उत्तरस्य[३] चरित्रस्य मुनिः शंकर उच्यते ।
महासरस्वती देवी त्रिष्टुप्छन्द उदाहृतम् ॥
कामो बीजं रविस्तत्त्वं कामाप्त्यै विनियोजनम् ।
महाविद्येत्यादिसप्तशत्यः कल्पे तथाऽऽदिमे ॥
ब्रह्मेन्द्रगुरुशुक्राणां विष्णुरुद्रसुरद्विषाम् ।
उपास्या देवता जातास्ताश्चात्र ब्रह्मणा स्तुताः ॥
तस्मात्सप्तशतीत्येवं व्यासेन परिकीर्तिता ।

---

३ उत्तमस्य इत्यपि पाठोऽन्यत्र।

सौम्यानि यानि रूपाणीत्यत्रापि परिकीर्तितम् ॥
उपास्या दक्षिणे मार्गे लक्ष्म्याद्याः सप्तशक्तयः ।
लक्ष्मीश्च ललिता काली दुर्गा गायत्र्यरुन्धती ॥
सरस्वती चेति सप्त उपास्या वाममार्गतः ।
काली तारा छिन्नमस्ता सुमुखी भुवनेश्वरी ॥
बाला कुब्जेति मनवः सूचिता अत्र कीर्तिताः ॥
नाम्ना सप्तशती चेति मध्यमे चरिते द्विधा ॥
तत्तत्तन्त्रोक्तसङ्केतैर्मन्त्रशक्तिः प्रजायते ।
एवं स्तवादियुक्तानामित्यारभ्य तृतीयके ॥
चरिते सप्तशत्यास्तु चामुण्डान्ताः प्रकीर्तिताः ।
हंसयुक्तविमानाग्रे इत्यारभ्य प्रकीर्तिताः ॥
ब्रह्माण्याद्याः सप्तसत्यो वर्तमानास्तु तत्र च ।
वैवस्वतेऽन्तरे प्राप्ते इत्यारभ्य च सप्त च ।
सत्यः प्रोक्ताः स्वयं देव्यास्तस्मात्सप्तसती मता ।

शम्भुनित्यातन्त्रे-

अथातः संप्रवक्ष्यामि चण्डिकां भक्तवत्सलाम् ।
योनिद्वयं कला-बिन्दु-नाद-नादान्तसंयुतम् ॥
लज्जाबीजं कामराजं ङेऽन्तं चामुण्डिकापदम् ॥
विच्चे नवार्णकं त्वेकं श्रीमायाकालिकाद्वयम् ।

मेरुतन्त्रे -

अथातः संप्रवक्ष्यामि चामुण्डाया महामनुम् ।
नवदुर्गात्मकं त्वस्य सेवनाद् भुक्तिमुक्तयः ॥

सप्तसतीकल्पे-

येन विज्ञानमात्रेण परमैश्वर्यवान् भवेत् ।
ऐं-बीजमादीन्दुसमानदीप्तं
ह्रीं-सूर्यतेजोद्युतिमद्द्वितीयम् ॥
क्लीं-मूर्तिवैश्वानरतुल्यरूपं
तृतीयमानन्त्य सुखाय नित्यम् ॥
चा-शुद्ध जाम्बूनदकान्तिवीर्यं
मुं-पञ्चमं रक्ततरं प्रकल्प्यम् ।
डा-षष्टिमुग्रार्तिहरं सुनीलं
यै-सप्तमं कृष्णतरं रिपुघ्नम् ॥
सुपाण्डुरं व्यष्टममादिसिद्धं
च्चे-धूम्रवर्णं नवमं विशालम् ।
एतानि बीजानि नवात्मकस्य
जप्तुः प्रदद्युः सकलार्थसिद्धिम् ॥
नवबीजविशुद्धोऽयं मन्त्रस्त्रैलोक्यपावनः ।

मेरुतन्त्रे-

सुरथो यत्प्रसादेन राज्यं प्राप्याभवन्मनुः ।
संसारबन्धनिर्मुक्तिं ज्ञानमाप्तं समाधिना ॥

मार्कण्डेयपुराणोक्तं चरित्रत्रितयं तव ।
जपाद्यस्य फलं दद्यात्तं मनुं वच्मि सम्प्रतम् ॥
वाग्लज्जाकामबीजानि चामुण्डायै पदं वदेत् ।
विच्चे नवार्णमन्त्रोऽयं शक्तिमन्त्रोत्तमोत्तमः ॥

हादिमते-

एवं जपति यो मन्त्री फलं तस्य वदामि ते ।
वश्या भवन्ति कामिन्यो राजानोऽनुचरा इव ॥
न हस्ति-सर्प-दावाग्नि-चौर-राजभयादिकम् ।
सर्वाः समृद्ध्यस्तस्य जायन्ते चण्डिकाज्ञया ॥
नश्यन्ति दारुणा रोगाः सङ्ग्रामे जयमश्नुते ।

महाकालसंहितायाम् -

न शास्त्रमालोक्य वदेन्नाचरेन्न जपेदपि ।
न पश्येन्नोपदिश्याच्च न कुर्यान्नैव साधयेत् ॥
गुरूपदेशतो लब्धं जपन्यासार्चनादिकम् ।
पश्चात्तत्साधयेत् सर्वं सदा तद्भावभावितः ।

वाराहीतन्त्रे -

दीक्षामूलं जगत्सर्वं दीक्षा हि परमं तपः ।
दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे नरः ॥
कोटिजन्मकृतं पापं ज्ञानाज्ञानकृतं च यत् ।
दीक्षाग्रहणमात्रेण पलायन्ते न संशयः ॥

ततो वाञ्छितसिद्धिः स्याद्धनधान्यसमृद्धयः ।
अन्ते देवालयं याति दिव्यभोगसमन्वितः ॥

महाहाटके तन्त्रे -

अथ दीक्षाविहीनो यो वर्तते भुवि पापभुक् ।
मोहान्धकारे नरके गर्ते पतति दुःखितः ॥
दीक्षाहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते मोहान्न तस्य फलभाग् भवेत् ॥

तन्त्रराजे -

आचार्यादनभिप्राप्तः प्राप्तश्चादत्तदक्षिणः ।
सततं जप्यमानोऽपि मन्त्रः सिद्धिं न गच्छति ॥

मार्कण्डेयरुवाच -

परिपृच्छसि राजेन्द्र! चण्डिकापूजनादिकम् ।
तदहं संप्रवक्ष्यामि यथावदनुपूर्वशः ॥
आदौ नत्वा महालक्ष्मीं कर्त्रीं हर्त्रीं सदोदिताम् ।
यन्नमस्कारतो यज्ञा भवन्ति सुकृताः सकृत् ॥

शम्भुनित्यातन्त्रे -

कराङ्घ्रिक्षालनमस्त्राद् हृदः शुद्धिस्तु मन्मथात् ।
मुखस्य क्षालनं श्रीवागूर्ध्वकेशी शिखा मता ॥
नद्यादौ विधिवत् स्नात्वा नाभिमात्राम्भसि स्थितः ।

सप्तसतीकल्पे –

नम्यते कीर्त्यते यस्या[४]मैश्वर्यपरिधानवान् ।
दशाञ्जलिभिरात्मानं नवबीजेन प्लावयेत् ॥
कृत्वा माध्याह्निकं सर्वमुदकान्तः समाहितः ।
तर्पणादि महालक्ष्म्याः षडङ्गन्यासमाचरेत् ॥[५]
ॐ मायाबीजं चण्डिकायै अङ्गुष्ठाभ्यां नमः ।
ॐ मायाबीजं हृदयं
एवं न्यासविधिं कृत्वा ध्यात्वा महिषमर्दिनीम् ।
चण्डिकां त्रिजगद्धात्रीं ब्रह्माद्यमरवन्दिताम् ।
ततो हि नवबीजान्ते चण्डिका तृप्यतामिति ।
जलाञ्जल्यष्टोत्तरशतं सुगन्धकुसुमान्वितम् ॥
अशक्तौ तु तदर्धेन तत्तदर्धेन वा पुनः ।
महालक्ष्मीं तर्पयित्वा प्रार्थितो लभते ध्रुवम् ॥
अप्राप्यानपि कामाँश्च कर्ता प्राप्नोति तर्पणात् ।
प्रविश्य देवतागारं वितानपरिशोभितम् ॥
पुष्पप्रकरशोभाढ्यं पूजाद्रव्यैः प्रपूरितम् ।
बहुदीपप्रकाशाढ्यं दिव्यैर्धूपैः सुधूपितम् ॥
तत्रोपविष्टो विधिना पूजयित्वा हरीश्वरौ ।
उप्रविश्यासने मन्त्री प्राङ्मुखो धृतिमान् क्षमी ॥
कामक्रोधमहामोहलोभतापविवर्जितः ।
चतुरस्रे समे शुद्धे सर्वदोषविवर्जिते ॥

४ अत्र यस्यामितिपदस्य नद्यामित्यर्थः ।

५ अतो न्यासप्रक्रिया प्रारभ्यते ।

लिखेदष्टदलं पद्मं कुङ्कुमागुरुचन्दनैः ।
पद्ममध्ये लिखेच्चक्रं षट्कोणं चण्डिकालयम् ॥
षट्कोणं चक्रमध्यस्थमाद्यबीजत्रयं न्यसेत् ।
पूर्वादिषु षट्कोणेषु बीजान्यन्यानि विन्यसेत् ॥
गुदमेढ्रान्तरं वामपादमूलेन पीडितम् ।
वामपादोपरि स्थाप्य दक्षिणं चरणं दृढम् ॥
एतत्पद्मासनं नाम जरामरणवर्जितम् ।
मौनी बद्धासनो ज्ञानी ध्यानी निश्चलविग्रहः ॥
अनाहतविशुद्धाज्ञान् भेदयित्वा यथाक्रमम् ।
स्वशरीराद्विनिर्गत्य सूक्ष्मरूपोर्ध्वमार्गतः ॥
ततो नदीं समुत्तीर्य स्थित्वा स्वकरसंपुटे ।
शोधयेत्पञ्चभूतानि ज्ञात्वा वर्णक्रमैः पृथक् ॥
पृथिव्यापोऽनलो वायुः सभूतानामयं क्रमः[६] ।
पृथ्वी पीता सितं वारि, रक्तवर्णो हुताशनः ॥
तेषां कृष्णतरो वायुराकाशं निर्मलं सदा ।
मनसा शोधयेद् बुद्धिं बुद्ध्या संशोधयेन्मनः ॥
तद्वयं परमं शुद्धमात्मना सम्यगीरितम् ।
स्वदेहं ब्रह्ममार्गेण योगयुक्त्या समाविशेत् ॥
सुषुम्णास्थानमाश्रित्य तिष्ठमानमनाहते[७] ।
आदौ संशोधयेत् पृथ्वीं शोषदाहाप्लवामृतैः ॥
पुनर्वारिः पुनस्तेजः पुनर्वायुं तु पावयेत् ।

---

६ वायुराकाशश्चाप्ययं क्रमः इति पाठ उचितः ।
७ तिष्ठेच्चक्रे ह्यनाहते इति पाठ उचितः ।

बीजैश्चतुर्विधैर्वायोरग्नेर्वरुणशक्रयोः ॥
यमिदं शोषकं बीजं रमिदं दाहकं महत् ।
लमाप्लावबीजञ्च वमिन्दुममृतात्मकम् ॥
एवं शुद्धानि भूतानि भवन्ति नृपनन्दन!
व्योम्नि संशोधनं नास्ति यतस्तन्निर्मलं सदा ॥
कृत्वाऽऽलयं स्वके देहे प्रविश्यात्मविशोधनम् ।
कर्तव्यं योगमाश्रित्य सर्वकामविवर्जितैः ॥
भूतशुद्धिमिमां कृत्वा यः कुर्याच्चचण्डिकार्चनम् ।
तस्याचिरेण कालेन महालक्ष्मीः प्रसीदति ॥

शम्भुनित्यातन्त्रे –

त्रिकोणं चैव षट्कोणं वृत्तं वसुदलं पुनः ।
वृत्तं दिग्द्वारसंयुक्तं भूपुरं च समालिखेत् ॥
भ्रुव्येकादशविन्यासमादौ वै मातृकादयः ।

मेरुतन्त्रे –

ब्रह्मविष्णुमहेशास्तु मुनयोऽस्य प्रकीर्तिताः ॥
गायत्र्युष्णिगनुष्टुप् च छन्दस्त्रयमुदीरितम् ।
देव्योऽस्य तु महाकाली महालक्ष्मीः सरस्वती ॥
नन्दा शाकम्भरी भीमा शक्तित्रयमुदाहृतम् ।
तिस्रोऽस्य शक्तयो दुर्गा भ्रामरी रक्तदन्तिका ॥
अग्निर्वायुर्भगस्तत्त्वं प्रागवद् दृष्ट्यादिकं न्यसेत् ।
स्तनयोः शक्तिबीजानि तत्त्वानि हृदये पुनः ॥

तत एकादश न्यासान् कुर्वीतेष्टफलप्रदान् ।
प्रथमं मातृकान्यासं प्राक् प्रोक्तं तु समाचरेत् ॥
कृतेन येन देवस्य सारूप्यं याति मानवः ।
अथ द्वितीयं कुर्वीत न्यासं सारस्वताभिधम् ॥
बीजत्रयं तु मन्त्राद्यं तारादिहृदयान्तकम् ।
षडक्षरो भवेन्मन्त्रो नवस्थानेषु विन्यसेत् ।
कनिष्ठाऽनामिकामध्ये तर्जन्यङ्गुष्ठयुग्मके ।
करमध्ये हस्तपृष्ठे मणिबन्धे च कूर्परे ॥
हृदयादिषडङ्गेषु जातियुक्तं पुनर्न्यसेत् ।
अस्मिन् सारस्वते न्यासे कृते जाड्यं विनश्यति ॥
न्यासाः कार्याः सप्तशत्याः पाठे कार्यविशेषतः ।
ततस्तृतीयं कुर्वीत न्यासं मातृगणादिकम् ॥
माया बीजादिका ब्राह्मी पूर्वतः पातु मां सदा ।
माहेश्वरी तथाऽऽग्नेयां कौमारी दक्षिणेऽवतु ॥
वैष्णवी पातु नैरृत्यां वाराही पश्चिमेऽवतु ।
इन्द्राणी पावके कोणे चामुण्डा चोत्तरेऽवतु ॥
ऐशाने तु महालक्ष्मीरुर्ध्वं व्योमेश्वरी तथा ।
सप्तद्वीपेश्वरी भूमौ रक्षेत्कामेश्वरी तथा ॥
तृतीयेऽस्मिन् कृते न्यासे त्रैलोक्यविजयी भवेत् ।
न्यासं चतुर्थं कुर्वीत नन्दजादिसमन्वितम् ॥
नन्दजा पातु पूर्वाङ्गं कमलाङ्कुशमण्डिता ॥
खड्गपात्रकरा पातु दक्षिणे रक्तदन्तिका ॥
पृष्ठे शाकम्भरी पातु पुष्पपल्लवसंयुता ।

धनुर्बाणकरा दुर्गा वामे पातु सदैव माम् ॥
शिरः पात्रकरा भीमा मस्तकाच्चरणावधि ।
पादादिमस्तकं यावद् भ्रामरी चित्रकान्तिभृत् ॥
तूर्यं न्यासं नरः कुर्वञ्जरामृत्युं व्यपोहति ।
ब्रह्माद्यमथ कुर्वीत न्यासं पञ्चममुत्तमम् ॥
पादादिनाभिपर्यन्तं ब्रह्मा पातु सनातनः ।
नाभेर्विशुद्धिपर्यन्तं पातु नित्यं जनार्दनः ॥
विशुद्धेर्ब्रह्मरन्ध्रान्तं पातु रुद्रस्त्रिलोचनः ।
हंसः पातु पदद्वन्द्वं वैनतेयः करद्वयम् ॥
चक्षुषी वृषभः पातु सर्वाङ्गानि गजाननः ।
परापरौ देहभागौ पात्वानन्दमयो हरिः ॥
कृतेऽस्मिन् पञ्चमे न्यासे सर्वान् कामानवाप्नुयात् ।
षष्ठं न्यासं ततः कुर्यान्महालक्ष्म्यादिसंयुतम् ॥
मध्यं पातु महालक्ष्मीरष्टादशभुजान्विता ।
ऊर्ध्वं सरस्वती पातु भुजैरष्टाभिरुर्जिता ॥
अधः पातु महाकाली दशबाहुसमन्विता ।
सिंहो हस्तद्वयं पातु परहंसाऽक्षियुग्मकम् ॥
महिषं दिव्यमारुढो यमः पातु पदद्वयम् ।
महिषश्चण्डिकायुक्तः सर्वाङ्गानि ममावतु ॥
षष्ठेऽस्मिन् विहिते न्यासे सद्गतिं प्राप्नुयान्नरः ।
मूलाक्षरन्यासरूपं ततः कुर्वीत सप्तमम् ॥
ब्रह्मरन्ध्रे नेत्रयुगे श्रुत्योर्नासिकयोर्मुखे ।
पायौ मूलमनोर्वर्णात् ताराद्यात् नमसान्वितात् ॥

विन्यसेत्सप्तमे न्यासे कृते रोगक्षयो भवेत् ।
पायुतो ब्रह्मरन्ध्रान्तं पुनस्तानेव विन्यसेत् ॥
कृतेऽस्मिनष्टमे न्यासे सर्वदुःखं विनश्यति ।
कुर्वीत नवमं न्यासं मन्त्रव्याप्तिस्वरूपकम् ॥
मस्तकाच्चरणं यावच्चरणान्मस्तकावधि ।
पुरो दक्षे पृष्ठदेशे वामभागेऽष्टशो न्यसेत् ॥
मूलमन्त्रकृतो न्यासो नवमो देवताप्तिकृत् ।
ततः कुर्वीत दशमं षडङ्गन्यासमुत्तमम् ॥
मूलमन्त्रं जातियुक्तं हृदयादिषु विन्यसेत् ।
कृतेऽस्मिन् दशमे न्यासे त्रैलोक्यं वशमानयेत् ॥
चण्डीपाठेऽपि कर्तव्या न्यासाः स्वेष्टप्रदायकाः ।
दद्यान्न्यासोक्तफलदं कुर्यादेकादशं ततः ॥
खड्गिनी शूलिनीत्यादि पठित्वा श्लोकपञ्चकम् ।
आद्यं कृष्णतरं बीजं ध्यात्वा सर्वाङ्गकं न्यसेत् ॥
शूलेन पाहि नो देवीत्यादिश्लोकचतुष्टयम् ।
पठित्वा सूर्यसदृशं द्वितीयं पृष्ठतो न्यसेत् ॥
ततः षडङ्गं कुर्वीत विभक्तं मूलवर्णकैः ।
एकेनैकेन चैकेन चतुर्भिर्युग्मकेन च ॥
समस्तेनैव मन्त्रेण कुर्यादङ्गानि षट् क्रमात् ।
शिखायां नेत्रयोः श्रुत्योर्नसोर्वक्त्रे गुदे न्यसेत् ॥
मन्त्रवर्णसमस्तेन व्यापकं त्वष्टशश्चरेत् ।

शम्भुनित्यातन्त्रे –

एते न्यासाः प्रकर्तव्याश्चण्डीं सप्तशतीं जपेत् ॥
एवं न्यासविधिं कृत्वा सृष्टिमुद्रां विलोकयेद् ।
तस्या विलोकने राजन् कृतो न्यासः स्थिरो भवेत् ॥
परिषिञ्चति पूजार्थं द्रव्याणि नवबीजतः ।
दशन्यासैः कृतैरेतैर्जपकर्ता फलं लभेत् ॥
तत्फलं लभते सत्यं तस्मिन्नेकादशे कृते ।
तलपृष्ठोद्भवां मुद्रां दत्त्वाऽस्त्रेणाऽवगुण्ठयेत् ॥
अर्घ्यपात्रं प्रतिष्ठाप्य पूजयेच्छुभवारिणा ।
गन्धपुष्पाक्षतास्तत्र विन्यस्य नृपनन्दन! ॥
ध्यात्वा सर्वाणि तीर्थाणि हस्तौ दत्वाऽभिमन्त्रयेत् ।
रक्षार्थं तस्य कर्तव्याश्चक्रमुद्रास्तु संयुताः ॥
अर्घ्योदकेन संस्कारं पूजाद्रव्यस्य पूर्ववत् ।
कृत्वा लोमविलोमाभ्यामात्मानं सम्यगर्चयेत् ॥
प्रत्यर्घ्यं संप्रतिष्ठाप्य मध्ये पीठार्घ्यपात्रयोः ।
षट्कोणचक्रमध्यस्थां मध्यबीजैर्व्यवस्थिताम् ॥

मार्कण्डेयपुराणे –

महाकाल्या सरस्वत्याऽलङ्कृतां वीक्षणान्ययोः ।
संयुक्तां दक्षिणे वामे सिंहेन महिषेण च ॥
अष्टादशभुजां ध्यात्वा महालक्ष्मीं प्रणम्य च ।

मेरुतन्त्रे –

ततो देवीत्रयं ध्यायेत्कालिकाध्यानमुच्यते ॥
दशास्यां दशपादां च दशहस्तां विधिस्तुताम् ।
इन्द्रनीलद्युतिं खड्गं चक्रं शङ्खं शिरः शरान् ॥
दक्षहस्तेषु दधतीं गदां शूलं भुशुण्डिकाम् ।
परिघांश्च धनुर्वामे दधतीं ब्रह्मसंस्तुताम् ॥
मधुकैटभनाशार्थं सालङ्कारां त्रिवीक्षणाम् ।
ततो ध्यायेन्महालक्ष्मीं महिषासुरमर्दिनीम् ॥
समस्तदेवतातेजोजातां पद्मासनस्थिताम् ।
अष्टादशभुजामक्षमालां पद्मं च सायकान् ॥
खड्गं वज्रं गदां चक्रं दक्षहस्तैः कमण्डलुम् ।
शङ्खं च दधतीं वामे शक्तिं चापशरं धनुः ।
चर्मदण्डौ सुरापात्रं घण्टां पाशं त्रिशूलकम् ।
सरस्वतीं ततो ध्यायेच्छरच्चन्द्रसमप्रभाम् ॥
शङ्खं च मुशलं चक्रं बाणान् दक्षेषु बिभ्रतीम् ।
घण्टां शूलं च चापं च वामहस्तेषु बिभ्रतीम् ॥
गौरीदेहसमुद्भूतां नृणामानन्ददायिनीम् ।
आधारभूतां जगतः शुम्भादिकविमर्दिनीम् ॥
अधिष्ठात्रीं तृतीयस्य चरित्रस्य स्मरेत्सदा ॥
इति ध्यात्वा

शम्भुनित्यातन्त्रे –

पीठानां पूजनं कृत्वा स्वबीजेन पृथक् पृथक् ॥
ॐकारबिन्दुमध्यस्थं नामध्येयाद्यमक्षरम् ।
देवतानां स्वबीजं च पूजायां ऋद्धिसिद्धिदम् ॥
ॐकारं प्रथमं पीठं पूर्णपीठं ततः परम् ।
तृतीयं कामपीठं च पूजयेत्सम्प्रदायतः ॥
पूर्वादिदिक्षु पीठस्य गणेशादिचतुष्टयम् ।
गणेशक्षेत्रपालौ च पादुका बटुकाश्रिता ।
आग्नेयादिचतुर्दिक्षु पूज्यं देवीचतुष्टयम् ॥
आद्या तत्र जया प्रोक्ता द्वितीया विजया स्मृता ।
जयन्ती तत्परा देवी चतुर्थी चापराजिता ॥
पूज्या नामपदैर्देव्यः पीठपङ्कजमध्यगाः ।
प्रागादिक्रमयोगेन पञ्च षट् पञ्च सप्त च ॥
प्रथमा विष्णुमाया च द्वितीया चेतना स्मृता ।
बुद्धिर्निद्रा क्षुधा छाया शक्तिस्तृष्णाऽष्टमी ततः ॥
कान्तिर्जातिस्ततो लज्जा शान्तिः श्रद्धा त्रयोदशी ।
कीर्तिर्लक्ष्मीर्धृतिर्मेधा स्मृतिरेव दया तथा ॥
तुष्टिः पुष्टिश्च माता च भ्रान्तिर्नाम पदक्रमात् ।
त्रयोविंशति संख्येयं ब्रह्मणा पूजिताः स्तुताः ॥

मेरुतन्त्रे तु -

............[८] अथ तद् वाह्ये पंचविंशदलेर्चयेत् ।
विष्णुमायां चेतनां च बुद्धिं निद्रां क्षुधां तथा ॥
छायां शक्तिं परां तृष्णां कान्तिं जातिं तदुत्तरम् ।
लज्जां शान्तिं तथा श्रद्धां कीर्तिं लक्ष्मीं धृतिं तथा ॥
वृत्तिं श्रुतिं स्मृतिं चापि दयां तुष्टिं ततः परम् ।
पुष्टिं च मातरं भ्रान्तिमर्चयेदिति ....॥
पञ्चविंशत्रयोर्विंशयोर्विकल्पः ।

हादिमते -

नालमूले च संपूज्यमाधारादिचतुष्टयम् ।
आधारःकूर्मसिन्धू च चतुर्थी पृथिवी नृप! ॥
ततो नालं समभ्यर्च्य पद्मं संपूज्य यत्नतः ।
ज्ञानामृतसुतृप्तात्मा मण्डलार्चनमारभेत् ॥
अर्घ्योदकाद्भिराषिञ्च्य मण्डलं सौम्यदृष्टिमान् ।
पूर्वपत्रादितः पूज्यं मातृणां मण्डलं शिवम् ॥
रहस्यकथितैर्बीजैः स्वबीजेनाथवा पृथक् ।
आद्यपत्रं समभ्यर्च्य ब्रह्माणीं हंसवाहनाम् ॥
माहेश्वरी वृषारुढा पूज्या सा हुतभुग्दले ।
मयूरवाहना पूज्या कौमारी दक्षिणे दले ॥
नैऋत्ये वैष्णवी पूज्या गरुडोपरि संस्थिता ।
पश्चिमे चक्रवाराही दंष्ट्रोद्धृत वसुन्धरा ।

८ त्रुटितः पाठः (.................) ।

समीरणदले तोष्या नारसिंही धृतस्वना ।
गजराजसमारूढा पूज्यैन्द्री सोमदिग्दले ॥
गणनाथपरीवारा सदा रुद्रेण संयुता ।
ईशपत्रे समभ्यर्च्य चामुण्डां मुण्डमण्डिताम् ॥
ब्रह्माणीं कर्णिकामध्ये क्रमात् षट्कोणपूजनम् ।
नन्दजां हेमगर्भाभां सुरक्तां रक्तदन्तिकाम् ॥
नीलां शाकम्भरीं दुर्गां सर्वदुर्गार्तिहारिणीम् ।
दंष्ट्रान्वितमुखीं भीमां नीलपत्रशिरोधराम् ॥
तेजोमण्डलदुर्दर्शां भ्रामरीं वरदार्चिताम् ।
आद्यबीजे महाकालीं ध्यानपूर्वं समर्चयेत् ॥
पूर्वं द्वितीयबीजेन महालक्ष्मीं प्रपूजयेत् ।
तृतीयेष्टभुजां ध्यात्वा समभ्यर्च्य सरस्वतीम् ॥
ततः पृथक् पृथक् पूजां कृत्वा महिषसिंहयोः ।
मध्यबीजं चिरं ध्यात्वा महालक्ष्मीं दयानिधिम् ॥
आह्वानपूर्वकं दद्यादासनं मणिभूषितम् ।
मण्डलस्था तु या देवी पीठस्था सर्वशस्तदा ॥
महालक्ष्म्या सहैक्येन चिन्तयेद्योगमुद्रया ।
एकाक्षरं महालक्ष्म्या रूपं ध्यात्वा परात्परम् ॥
मुद्रास्तु याऽऽयुधाकाराश्चण्डिकाग्रे प्रदर्शयेत् ।
अष्टादशाक्षमालाद्यास्ततः पाद्यं प्रकल्पयेत् ॥
बलिपुष्पाक्षतारक्तचन्दनैश्च प्रकल्पितम् ।
अर्घ्यं दत्त्वा महालक्ष्म्यै धेनुमुद्रां प्रदर्शयेत् ॥
सङ्कल्पाचमनं देवि! स्नानं पुष्पाभिषेचनम् ।

विदध्याद् वेधसीमुद्रां यथा माता प्रसीदति ॥
महार्हं चित्रितं वासो विचित्राभरणानि च ।
कस्तूरीकुङ्कुमोपेतं कर्पूरागुरुचन्दनम् ॥
सुरभीणि सुपुष्पाणि विल्वपत्राक्षतानि च ।
नैवेद्यं चण्डिकादेव्यै दिव्यैर्धूपैश्च धूपितम् ॥
ज्वलन्मणिशिखाकारैर्दीपैर्नीराजनैः शुभैः ।
यथावर्णक्रमोपेतैर्नैवेद्यं पायसादिभिः ॥
अनेकरसपक्वान्नैर्महालक्ष्मीं प्रतोषयेत् ।
प्रणम्याऽऽचमनं दत्वा चन्दनं मुखवासनम् ॥
सकर्पूरं च ताम्बूलं भक्तिभावसमन्वितम् ।
दिगीशाँश्च समभ्यर्च्य तदस्त्राणि यथाक्रमम् ॥

मार्कण्डेयपुराणे –

प्राणान्नियम्य पूर्वोक्तन्यासात् संस्मृत्य चात्मवान् ।
प्रथमं चरितं प्रोक्तं मधुकैटभनाशनम् ॥
महिषासुरनिर्णाशं चरितं विद्धि मध्यमम् ।
चरितं उत्तरं विद्धि निशुम्भादिबधाश्रितम् ॥
चरितानि जपेत्त्रीणि सरहस्यं विशेषतः ।
चरितं मध्यमं चैषां जपेद्वा चण्डिकामयम् ॥

अथ पाठनियमः

वाराहीतन्त्रे -

आधारे स्थापयित्वा तु पुस्तकं वाचयेत्स्फुटम् ।
हस्ते संस्थापनाद्देवी हरत्यर्धफलं यतः ॥
यावन्न पूर्यतेऽध्यायस्तावन्न विरमेत्सुधीः ।
अनुक्रमं पठेद्देवि शिरःकम्पादिकं त्यजेत् ॥
गीती शीघ्री शिरःकम्पी स्वयं लिखित पाठकः ।
अनर्थज्ञोऽल्पबुद्धिश्च षडेते पाठकाधमाः ॥
माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
सानुस्वारी च दीर्घी च षडेते पाठकाः शुभाः ॥
विरामेऽध्यायमध्ये तु पुनरारम्भतः प्रिये ।
पुनरध्यायमावृत्त्य पठेत्सर्वं, स्तवे विधिः ॥

अथ मत्स्यसूक्ते -

शुद्धेनाचलचित्तेन पठितव्यं प्रयत्नतः ।
न मानसं पठेत्स्तोत्रं वाचिकं तस्य शस्यते ॥
पुस्तकं पावनं श्रेष्ठं सहस्रं वाचिकं यदि ।
अतो न्यूनं भवेद्यस्तु वाचिकं पुस्तकं विना ॥
आधारे स्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः ।
हस्ते संस्थापनाद्देवि, यस्मादल्पफलं भवेत् ॥
न स्वयं लिखितं तच्चाकृतिना लिखितं भवेत् ।
अब्राह्मणेन लिखितं तत्सर्वं विफलं भवेत् ।
न स्वयं च कृतं स्तोत्रमन्यथा अकृतं भवेत् ।
यस्मात्कलौ न प्रशस्तमृषिभिर्भाषितं पठेत् ॥

ऋषि-छन्दादिकं न्यस्य पठेत्स्तोत्रं विचक्षणः ।
स्तोत्रेण दृश्यते यत्र प्रभवं तु समाचरेत् ॥
भीष्मपर्वणि या गीता सुप्रशस्ता कलौ मता ।
विष्णोः सहस्रनामाख्यं स्तोत्रं पापप्रणाशनम् ॥
गजेन्द्रमोक्षणं चैव कारुण्यस्तवमेव च ।
नारसिंहं तथा स्तोत्रं श्रीरामस्तवसंयुतम् ॥
देव्याः सप्तशतीस्तोत्रं तथा नामसहस्रकम् ।
श्लोकाष्टकं नीलकण्ठं शैवनामसहस्रकम् ॥
त्रिपुरायाः सहस्राख्यं सूर्यस्य स्तवराजकम् ।
पैत्रो रुचिस्तवो यश्च इन्द्राणीस्तोत्रमेव च ॥
वैष्णवे च महालक्ष्म्याः स्तोत्रमिन्द्रेण भाषितम् ।
भार्गवाख्येन रामेण शप्तान्यन्यानि कारणात् ॥
इत्युक्त्वा पार्वतीनाथः सप्तशत्या महाफलम् ।
तस्य श्रवणमात्रेण सर्वरोगं प्रशान्तयेत् ॥

वाराहीतन्त्रे–

नातः परतरं किञ्चित्स्तोत्रमस्ति वरानने ।
भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥

अथपाठक्रमः

हादिमते–

अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ।
अर्गलं हृदये यस्य तथा नार्गलवानसि ॥
कीलकं हृदये यस्य सकीलितमनोरथः ।
कवचं हृदये यस्य सवज्र कवची सुखी ॥

इति नवमीसिंहकृतायां चण्डीभक्तिविनोदिन्यां प्रथमः पटलः ।

अथ प्रयोगः

शम्भुनित्यातन्त्रे -

मार्कण्डेयपुराणोक्तं नित्यं चण्डीस्तवं पठेत् ।
जपं विना भवेच्चण्डी वरदा तस्य सर्वदा ॥
पुटितं मूलमन्त्रेण जपनाप्नोति वाञ्छितम् ।
शतमादौ तथा चान्ते जपेन्मन्त्रं नवाक्षरम् ॥

सप्तसतीकल्पे -

ऋषिरुवाच

नित्यं चण्ड्यादिजाप्यस्य विधानं ते वदाम्यहम् ।
क्रमेण सर्वकार्याणां सिद्धये यज्ञपुण्यदम् ॥
पूर्वोक्तेन विधानेन कृत्वा तु तर्पणादिकम् ।
शुद्धो भूत्वा मनःस्तम्भो मासं प्रतिदिनं जपेत् ॥
सकृद्रहस्यसंयुक्तं चण्डिकाचरितत्रयम् ।
दशांशहोमसहितं स्तोष्यते नित्यचण्डिका ॥
नवाक्षरेण मन्त्रेण स्मार्ताग्नौ नृपनन्दन ।
नमो देव्यै महादेव्यै शिवायै सततं नमः ॥
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ।
अनेन श्लोकपाठेन जुहुयाद्वा शुभं हविः ॥
उद्धृताः प्रोक्षणैर्मन्त्रैः पात्रानीतः समुज्ज्वलः ।
संस्कृतायां भुवि स्थाप्य स्मार्त्तोऽग्निः संप्रकीर्तितः ॥

देवतार्चनजाप्यस्य होमे भूः संस्कृतोऽन्यथा ।
कृत्वा संस्थापयेदग्निं नान्यदासादनं मतम् ॥
स्मार्तं हि पायसं होमे हुते स्मार्ते हुताशने ।
तदभावे समित्सर्पिस्तिलानां हवनं भवेत् ॥
होमयेच्च महालक्ष्म्या ऋतुकाले यदुद्भवम् ।

मेरुतन्त्रे -

पायसान्नैस्त्रिमध्वक्तैर्द्राक्षारम्भाफलैरपि ।
मातुलुङ्गैरिक्षुदण्डैर्नारिकेलफलैस्तिलैः ॥
जातीफलैराम्रफलैरन्यैर्मधुरवस्तुभिः ।
सप्तशत्या दशावृत्त्या प्रतिश्लोकं हुतं चरेत् ॥
अयुतं च नवार्णेन स्थापितेऽग्नौ विधानतः ।

हादिमते -

सजपं होमनैवेद्यं महालक्ष्मीं प्रणम्य च ।
शूलेन पाहि नो देवि शतश्लोकैः प्रदक्षिणम् ॥
विदध्यात्सुस्थिरो भूत्वा चण्डिकाध्यानतत्परः ।
नमो देव्यै इति श्लोकैः पठेत् संग्रामवर्जितम् ॥
कृत्वा पञ्चनमस्कारान्नुपविश्यासने शुभे ।
सर्वस्वरूपे-इत्यादि दिग्भिः श्लोकैः कृताञ्जलिः ॥
कृत्वाऽऽवरणदेवानां होमं तन्नामसंवृतम् ।
कृत्वा पूर्णाहुतिं सम्यग्देवमग्निं विसृज्य च ॥
स्वशरीरे समारोप्य दत्त्वा तस्यै विसर्जनम् ।

प्रार्थयेज्जगतां धात्रीं प्रणताः स्म हृदि स्थिताम् ॥
अनेन विधिना भूप! यः कुर्याच्चण्डिकार्चनम् ।
तस्य तुष्टा महालक्ष्मीर्यद् ददाति श्रृणुष्व तत् ॥
महदैश्वर्यमतुलं त्रैलोक्यं तस्य जायते ।
धर्मराज्यसमायुक्तं पुत्रपौत्रसमन्वितम् ॥
तं करोति महालक्ष्मीर्ब्रह्मविष्णुशिवोपमम् ।
रिपवः प्रलयं यान्ति तत्स्थानाच्छतयोजनम् ॥
त्रिषु लोकेषु यत्किञ्चित्सुरासुरसुदुर्लभम् ।
तत्सर्वं तं समायाति महालक्ष्मीप्रसादतः ॥

वाराहीतन्त्रे -

नातः परतरं किञ्चित्स्तोत्रमस्ति वरानने ।
भुक्तिमुक्तिप्रदं पुण्यं पावनानां च पावनम् ॥

इति नवमीसिंहकृतायां चण्डीभक्तिविनोदिन्यां पाठविधानं नाम
द्वितीयः पटलः ।

अथ पुरश्चरणम्

वायवीयसंहितायाम् –

जीवहीनो यथा देही सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्तितः ॥

वीरचूडामणौ –

पुरश्चरणहीनस्य मन्त्रसिद्धिर्न जायते ।
आदौ पुरस्कृतिं कुर्यान्नियमेन यथाविधिः ॥

मेरुतन्त्रे –

चण्डीं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः ।
पायसान्नेन जुहुयात्पूजिते हेमरेतसि ॥
तर्पणं मार्जनं चैव तथा ब्राह्मणभोजनम् ।
सर्वसाधारणम् तद्वच्चण्डीपाठपुरश्चरम् ॥

मारीचकल्पे –

सप्तशत्याविधानं च पुरश्चरणपूर्वकम् ।
योगाँश्च विविधान् वक्ष्ये सर्वार्थस्य च साधकान् ॥
कृष्णाष्टम्यां समारभ्य यावत्कृष्णचतुर्दशीम् ।
जपेदेकोत्तरावृत्तिं देवीसूक्तेन पूर्वकम् ॥
रात्रीसूक्तं जपेदादौ मध्ये सप्तशतीस्तवम् ।
प्रान्ते देव्याश्च सूक्तं च पौरश्चारणिकः क्रमः ॥

तदन्ते हवनं कृत्वा प्रतिश्लोकेन पायसम् ।
रात्रीसूक्तं प्रतिऋचं तथा देव्याश्च सूक्तकम् ॥
हुत्वाऽन्ते सिद्धयः स्तोत्रमादौ पूजादिकं मुने ।
सौवर्णीं प्रतिमां देव्याः कारयन्निष्कमानतः ॥
यन्त्रं वा कारयन्मन्त्री तदर्धं चापि शक्तितः ।
मण्डले सर्वतोभद्रे षट्कोणाङ्कितकर्णिके ॥
वक्ष्यमाणेन विधिना पीठं देव्याः प्रपूजयेत् ।
जयाख्या विजया भद्रा भद्रकाली ततः परम् ॥
सुमुखी दुर्मुखी संज्ञा पश्चाद्व्याघ्रमुखी तथा ।
अथ सिंहमुखी दुर्गा नवशक्तीः प्रपूजयेत् ॥
स्वस्वमन्त्रेण विधिना पूजनं तु यथाक्रमम् ।
आसनं मूलमन्त्रेण दद्यादुक्तेन साधकः ॥
मूर्तिं मूलेन सङ्कल्प्य तस्यामावाह्य पूजयेत् ।
संपूज्य विधिवत्पूज्यामुपचारादिना क्रमात् ॥
मातृका गणशक्तीश्च पूजयेद्विधिपूर्वकम् ।
नैवेद्यान्तं समभ्यर्च्य ततो ध्यानं समाचरेत् ॥
मन्त्रेण नवदुर्गाया अथवा जातवेदसः ।
नवाक्षर्यथवा मन्त्रो दुर्गामन्त्रं प्रशस्यते ॥
इदं स्तवं जपेद्देव्याः सिद्धिदं स्तवमुत्तमम् ।

इति चण्डीपाठपुरश्चरणम् ॥

अथाऽऽवृत्तिफलम्

वाराहीतन्त्रे -

चण्डीपाठफलं देवि शृणुष्व गदितं मया ।
एकावृत्यादिपाठानां यथावत्कथयामि ते ॥
सङ्कल्पपूर्वकं पूज्य न्यासाङ्गेषु मनुन् सकृत् ।
उपसर्गोपशान्त्यर्थं त्रिरावृत्तिं पठेन्नरः ॥
ग्रहोपशान्त्यै कर्तव्यं पञ्चावृत्तिं वरानने ।
महाभये समुत्पन्ने सप्तावृत्तिमुदीरयेत् ॥
नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ।
राजवश्याय भूत्यै च रुद्रावृत्तिमुदीरयेत् ॥
अर्कावृत्त्या काम्यसिद्धिर्वैरिहानिश्च जायते ।
मन्वावृत्त्या रिपोर्वश्यं तथा स्त्रीवश्यतामियात् ॥
सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः ।
कलावृत्त्या पुत्रपौत्रधनधान्याऽऽगमं विदुः ॥
राजभीतिविनाशाय वैरस्योच्चारणाय च ।
कुर्यात्सप्तदशावृत्तिं तथाऽष्टादशकं प्रिये ॥
महाव्रणविमोक्षाय विंशावृत्तिं पठेन्नरः ।
पञ्चविंशावर्तनाच्च भवेद्बन्धविमोचनम् ॥
सङ्कटे समनुप्राप्ते दुश्चिकित्साभये सदा ।
जातिध्वंसे कुलोच्छेदे आयुषो नाशमागतें ॥
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा वै व्यातिपातके ॥

कुर्याद्यत्नाच्छतावृत्तिं ततः संपद्यते शुभम् ।
जयवृद्ध्यै शतावृत्तिं राज्यवृद्ध्यै सदा पठेत् ॥
मनसा चिन्तितं देवि सिद्ध्येदष्टोत्तरावृतात् ।
शताश्वमेधयज्ञानां फलं प्राप्नोति सुव्रते ॥
सहस्रावर्तनाल्लक्ष्मीमावृणोति स्वयं स्थिरः ।
भुक्त्वा कामी यथा कामान्नरो मोक्षमवाप्नुयात् ॥
यथाऽश्वमेधक्रतुषु देवानां च यथा हरिः ।
स्तवानामपि सर्वेषां तथा सप्तशतीस्तवः ॥

दक्षिणाव्यवस्था

हरगौरीसंवादे -

पञ्चस्वर्णाः शतावृत्ते पक्षावृत्ते तु तत्त्रयम् ।
पञ्चावृत्ते स्वर्णमेकं त्रिरावृत्ते तदर्धकम् ॥
एकावृत्ते पादमेकं दद्याद्वा शक्तितो बुधः ।

अथ काम्यानि

मार्कण्डेयपुराणे -

तुष्टि-पुष्टि-सुकृतीनां सिद्धये सर्वकर्मणाम् ।
यथा ध्यानं तथा कुर्यात्पूजने जपकर्मणि ॥
बुद्धीनां देवतार्चाणां प्राप्तये शुभकर्मणाम् ।
शुद्धस्फटिकसङ्काशं ध्यानं स्यात् पूजने मतम् ॥

वश्ये रक्ततरं ध्यायेत्कर्पूरं हर्षवेगयोः ।
धूम्रमुच्चाटनाद्येषु कृष्णं ध्यानं च मारणे ॥
नीलोत्पलदलश्यामं ध्यात्वा भवति सुप्रजा ।
सर्वरत्ननिभाकारं ध्यात्वा निश्चलमानसम् ॥
सर्वान् कामानवाप्नोति ध्रुवमुक्तं मया तव ।
कल्पान्ताग्निसमं युद्धे ध्यानं प्रोक्तं स्वयंभुवा ॥
महारोषसमायुक्तं ध्यानं वैरिमये ध्रुवम् ।
पीयूषवर्णसंयुक्तं पूर्णचन्द्रसमप्रभम् ॥
ध्यानं कृत्वा लभेत् सत्यं शीघ्रं सर्वान्मनोरथान् ।
चतुरस्रे सुशान्त्यादौ पीठे पूजा महाफलम् ॥
वश्यादौ वर्तुले तद्वदर्धचन्द्रः सुपोषकः ।
त्रिकोणे वा विशुद्धे सा पञ्चकोणेऽथवा भवेत् ॥
षट्कोणे पीठपूजायां निर्भयं तत्क्षणाद् भवेत् ।
खण्डनादौ रविमिते पीठे या पूजनक्रिया ॥
विधूनयति शत्रूणां सप्तरात्रान्मनांसि वै ।

हरगौरीसंवादे –

श्रीकामः पुत्रकामो वा सृष्टिमार्गक्रमेण च ।
जपेच्छक्रादिमारभ्य शुम्भदैत्यबधावधि ॥
आदिमारभ्य प्रजपेत्पश्चाच्छेषं समापयेत् ।
शान्त्यादिकामः सर्वत्र स्थितिमार्गक्रमेण तु ॥
सावर्णिः सूर्यतनयः सावर्णिर्भविता मनुः ।
संहारश्चान्त्यमारभ्य पश्चादादिं समापयेत् ॥

मेरुतन्त्रे -

तत्रादिमं चरित्रं तु रोगनाशाय योजयेत् ।
उपसर्गविनाशाय मध्यमं योजयेद्बुधः ॥
अन्त्यं विषयकामस्तु चरित्रं परिशीलयेत् ।
चरित्रद्वयशीलस्य न वंशश्छिद्यते क्वचित् ॥
पठेद्य आद्यचरितं विपत्तिस्तस्य नश्यति ।
अनाद्यं यस्तु पठति मारयेदचिरात् रिपून् ॥
स्वशत्रुं दैत्यभावेन स्वमित्रं देवताधिया ।
भावयन् यो जपेच्चण्डीं त्रिसन्ध्यं मासमात्रकम् ॥
मृता वा मृतकल्पा वा शत्रवः स्युर्न संशयः ।
स्वार्थानुसारं पद्यं वा सप्तशत्यास्तु योजयेत् ॥
यन्न मन्त्रेण पुटितं तत्प्रस्ताराङ्कसंख्यया ।
पठेच्चण्डीं तथाऽऽद्यन्ते कामस्तस्य च सिध्यति ॥
सितपक्षतिमारभ्य चाष्टम्यन्तमिषस्य च ।
जपेल्लक्षं मनुं होमं खाद्यैस्त्रिमधुरप्लुतैः ॥
प्रत्यहं पूजयेद्देवीं चण्डीमाद्यन्तयोः पठेत् ।
विप्रान् सुहृत् समाराध्य वाञ्छितं लभते ध्रुवम् ॥

अथ नवचण्डीविधानम्

शम्भुनित्यातन्त्रे -

नवचण्डीविधानं तु कथयस्व महेश्वर ।
येन विज्ञानमात्रेण सर्वज्ञत्वं प्रजायते ॥
श्रृणु विष्णो रमाकान्त नवचण्डीविधिं शुभम् ।
यत्कृत्वा प्राप्यते स्वर्गः सर्वान् कामाँश्च पुष्कलान् ॥
आश्विनप्रतिपन्मुख्याः पुण्याः स्युस्तिथयो नव ।
नवचण्डी च या प्रोक्ता सर्वकामफलप्रदा ॥
धनपुत्रयशःश्री यात्, महाव्याधिविनाशिनी ।
महाभयमहादुःखहन्त्री सौख्यप्रदायिनी ॥

तथा -

शुक्लाष्टमीमवष्टभ्य यावच्छुक्लचतुर्दशीम् ।
नवदुर्गा विधातव्या सर्वकार्यफलार्थिना ॥
संपूज्य विधिवद्देवीं चण्डिकाकृततर्पणम् ।
कलशं पञ्चरत्नाढ्यं सहकारदलाकुलम् ॥
सवस्त्रं संप्रतिष्ठाप्य चण्डिकाग्रेऽम्भसा भृतम् ।
समस्तान्पूजयेद्दिक्षु दिशापालान्यथाक्रमम् ।
चन्दनेन विलिप्ताङ्गः स्रग्विन्यासपरायणः ।
नवाहं वारमेकैकं मौनी बद्धाऽऽसनी जपेत् ॥
कवचादिरहस्यान्तं चण्डिकाचरितत्रयम् ।
चतुरस्रे समे कुण्डे समताद्धस्तमात्रके ॥
[illegible]संयुक्ते योनिमण्डलमण्डिते ।

दशांशविधिना होममुक्तद्रव्येण साधयेत् ॥
नवदुर्गाकर्मकुण्डमेवं जानीहि केशव ।
नित्यचण्डीविधानेऽपि कुण्डमीदृक् प्रकीर्तितम् ॥
कृष्णाष्टमीमवष्टभ्य नवदुर्गाविधानवित् ।
यद्यथा कुरुते जाप्यं कालरात्रीरुदीरिता ॥
महाकालोद्भवं दुःखं कालरात्रीर्व्यपोहति ।
संस्कारैरष्टभिः कुण्डं सकृत्साग्निं सुस्थापयेत् ॥
मायाबीजसमापेतो दुर्गास्तवनसाधकः ।
कुण्डमध्ये तु वै दर्भैः परिमार्ज्य विलेपयेत् ॥
प्रागग्रात् स्रुवमूलेन रेखास्तिस्रः समुल्लिखेत् ।
पांशुमुद्धृत्य लेखानां समभ्युक्ष्य ततः परम् ॥
कुण्डस्य पूजनं स्पष्टं सप्तमं सप्तमुद्रया ।
अस्त्रावगुण्ठनं कुण्डे संस्कारश्चाष्टमः स्मृतः ॥
शतमङ्गलनामानां कुण्डेऽग्निं संप्रतिक्षिपेत् ।
चण्डीपीठं च संपूज्य ब्राह्मणं दक्षिणे द्विजम् ॥
ततस्तत्साग्निमत्कुण्ठं नवसूत्रेण सूत्रयेत् ।
कुण्डस्योत्तरतः स्थाप्या प्रणीता वारिपूरिता ॥
प्रणीतापात्रतो याम्ये उत्तरे वैश्वदेवता ।
स्थापयेत्प्रोक्षणीपात्रं प्रणीतोदकपूरितम् ॥
प्रणीतापात्रतः पूर्वे स्थाप्यं पात्रगणं क्रमात् ।
आज्यस्थाली चरुस्थाली गव्यक्षीरसमन्विता ॥
स्रुक्स्रुवौ च घृतं गव्यं तण्डुलांङ्कुशपूर्वकम् ।
पलाशसमिधास्तिस्रः पूर्णपात्रमतः परम् ॥

सप्तद्वीपेश्वरीं ध्यात्वा गृहीत्वा कुशमूलकम् ।
निक्षिपेत्प्रोक्षणीपात्रे वारुणं बीजमुच्चरन् ॥
तिलदर्भसमूहेन शतसङ्ख्येन संस्थितम् ।
क्रमात् पात्रगणान् प्रोक्षेत्प्रोक्षणीपात्रवारिणा ॥
आज्यपात्रे चरुस्थाल्यां निक्षिपेद्घृततण्डुलान् ।
यथाक्रमेण कर्तव्यं ततो मिश्रयणं तयोः ॥
आज्येन पायसे कार्यं पर्यग्निकरणं तयोः ।
सव्यपलाशकाष्ठेन तिस्रो दर्भान् समुज्ज्वलान् ॥
स्रुवयोस्तापनं कार्यं प्रणीतोदकसिञ्चितः ।
पुनः प्रतपनं कृत्वा दक्षिणे स्थापनं स्मृतम् ॥
उद्वास्य प्रथमं पूर्वादादायाऽऽज्यं प्रदक्षिणम् ।
कुण्डाचार्यान्तरे स्थाप्यं स्वबीजजपपूर्वकम् ॥
अभिधायाऽऽज्यमार्गेण वायव्ये स्थापयेच्चरुम् ।
स्वबीजजपसंस्काराद् धेनुमुद्रां तयोर्भवेत् ॥
मिश्रं पलाशसमिधो मौनी वैश्वानरे क्षिपेत् ।
कुशमूलकयुक्ताभिः प्रोक्षण्यद्भिः प्रदक्षिणम् ॥
प्रयुक्तानि प्रयुक्तायां निक्षिपेत् कुशमूलकम् ।
निधाय दक्षिणं जानु भूमौ वह्निमुखे हुनेत् ॥
अन्वारब्धे स्रुवेणाज्यं निर्धूमे हव्यवाहने ।
प्रजावती महाकाली महालक्ष्मीः सरस्वती ॥
एतदग्निमुखं प्रोक्तं मायाबीजपुरःसरम् ।
संस्रवात्प्रोक्षणीपात्रे निक्षिपेदग्निसाधना ॥
विदध्यात्कल्पितं होमे उक्तेन हविषा ज्ञानी ।

तेन स्विष्टिकृतं दद्याद् हविषा सोज्ज्वलेऽनले ॥
"माया बीजे च ब्राह्मी माहेश्वरी च कौमारी वैष्णवी वाराही नारसिंही ऐन्द्री चामुण्डायै विच्चे स्विष्टिकृते स्वाहा । "
मन्त्रेण स्विष्टिकृता हूते शक्तीनां वक्ष्यमाणकैः ।
आज्यस्य नवके दद्यान्मायाबीजादिनामभिः ॥
नन्दा भगवती ह्याद्या द्वितीया रक्तदन्तिका ।
शाकम्भरी तृतीया च दुर्गा भीमा च तत्परा ॥
भ्रामरी कालिका चैव शिवदूती प्रजापतिः ।
गन्धपुष्पफलोपेतं कृतयज्ञात्मकं स्रुवम् ॥
ततः पूर्णाहुतिं दद्याद् घृतस्याछिन्नधारया ।
नवाक्षरेण मन्त्रेण महालक्ष्मीपरायणः ॥
ध्यायेद्यज्ञे पुरोडाशममृतं देवदुर्लभम् ।
प्रोक्षणीपात्रमध्यस्थं मन्त्रेणाश्नाति संस्रवान् ॥
तस्मिन्यज्ञे रसात्पूजा यज्वानो ब्रह्मरूपिणः ।
संस्रवं च पुरोडाशं प्राश्नाति सुखपुण्यदम् ॥
सलिलेन प्रणीतायास्तीर्थध्यानपरायणः ।
करोति मार्जनं दर्भैः शतेन श्लोकपाठतः ॥
याः शिवायाः शक्तयश्च याभिश्च सविता सह ।
या आपः स्यन्दधानास्ता मे कृण्वन्तु सुभेषजम् ॥
अभिषिञ्चेत्तथाऽऽत्मानं चतुर्भिश्चण्डिकास्तवैः ।
दानं दद्याद्विधानेन हेमरत्नाम्बरादिकम् ॥
भवतत्त्वं महादेवी पापतापप्रणाशनम् ।
सर्वैश्वर्यप्रदा देवी कुर्वतामविलम्बिना ॥

नवदुर्गाविधानेऽस्मिन् यत्फलं परिकीर्तितम् ।
कालरात्रीविधानेऽपि तत्फलं लभते ध्रुवम् ॥
एतत्त्रिगुणितं सर्वं नवदुर्गाजपे फलम् ।
कथितं तदवाप्नोति नवचण्डीकृते जपे ॥
मनसा चिन्तितं कार्यं कार्यसिद्धिः प्रजायते ।
शारदे चाश्विने मासे शुक्लपक्षे शुभे दिने ॥
प्रतिपत्तिथिमारभ्य नवचण्डीं समारभेत् ।
तोरणाद्यैः शुभे स्थाने सुविताने सुलङ्कृते ॥
पूर्वादिक्रमयोगेन दिग्देविभ्यो बलिं हरेत् ।
गन्धपुष्पाक्षतैर्धूपैर्दीपैश्चरुभिरुत्तमैः ॥
कादम्बरीगजारूढा पुनरुल्काजपृष्ठगा ।
कराली महिषारूढा रक्ताक्षी प्रेतसंस्थिता ॥
श्वेतकौमीरगा श्वेता हरिद्रा मृगवाहना ।
यक्षिणी सिंहपृष्ठस्था कङ्काली वृषवाहना ॥
हंसपृष्ठे सुरश्रेष्ठा सर्पराडहिवाहना ।
अनेन विधिना दत्त्वा दिग्देवीभ्यो बलिं जपी ॥
नवग्रहाँल्लोकपालान् दिक्पालाँश्च प्रपूजयेत् ।
कलशं पञ्चरत्नाढ्यं हेमवस्त्रोदकान्वितम् ॥
संप्रतिष्ठाप्य संपूज्य चण्डिकार्चनमारभेत् ।
पूर्वोक्तेन विधानेन गन्धपुष्पैरनुत्तमैः ॥
कृत्वा तां पूजनं सर्वं जपेदेकाग्रमानसः ।
सकृद्रहस्यसंयुक्तं चण्डिकाचरितत्रयम् ॥
कुमारी विप्रमुख्यान् च भोजयेद्विधिपूर्वकम् ।

यदाद्यदिवसे कुर्याच्चचण्डिकापूजनादिकम् ॥
द्विगुणं तद्वितीयेऽह्नि त्रिगुणं तत्परेऽहनि ।
नवमीतिथिपर्यन्तं कृत्वा पूजाजपादिकम् ॥
एकाहारं व्रती कुर्यात्सत्यवाङ्नियमैर्युतः ।
कृत्वा होमादिकं सर्वं नवदुर्गाविधानवित् ॥
वित्तसाठ्यं परित्यज्य कुर्यादाचार्यतोषणम् ।
वस्त्राङ्गुलीयधेन्वादि वाजिहेमप्रदानतः ॥
अशक्तो निष्कमेकं हि दद्यादस्मै प्रयत्नतः ।
श्रुणुष्वास्य फलं देवि यो हि कश्चिदनेन वै ॥
विदधाति विधानेन स एतां नवचण्डिकाम् ।
इन्द्रब्रह्मादयो देवाः समायान्ति प्रसेवितुम् ॥
अपुत्रो लभते पुत्रं निर्धनः सुधनी भवेत् ।
विद्यार्थी लभते विद्यां स्वकाम्यं चापि कामुकः ॥
व्याधयः संक्षयं यान्ति शत्रवश्च सुदारुणाः ।
न तस्यास्ति भयं किञ्चिद्राजचौराग्निवारिजम् ॥

इति नवचण्डीविधानम् ।

अथ शतचण्डीविधानम्

मेरुतन्त्रे – शम्भुनित्यातन्त्रे च –

शतचण्डीविधानं तु प्रवक्ष्ये प्रीतये नृणाम् ।
नृपोपद्रवआपन्ने दुर्भिक्षे भूमिकम्पने ॥
अतिवृष्ट्यावनावृष्टौ परचक्रभये क्षये ।
सर्वापदो विनश्यन्ति शतचण्डीविधौ कृते ॥
रोगाणां वैरीणां नाशो धनपुत्रसुवृद्धयः ।

वाराहीतन्त्रे –

यदा यदा सतां हानिरात्मनो ग्लानिरेव च ॥
तदा कार्या शतावृत्तिर्रिपूघ्नं भूतिवर्धनम् ।
दुःस्वप्नदर्शने घोरे महामारीसमुद्भवे ॥
पुष्टिप्रदा शतावृत्तिः पुंसामायुः क्षयं न च ।
महाभये छिदयोगे दुर्भिक्षे मरणेऽपि च ॥
कुर्यात्तत्र शतावृत्तिं देवीमाहात्म्यमुत्तमम् ।
प्रभुत्वे च समुत्पन्ने बान्धवानां महोत्सवे ॥
कुर्याच्चण्डीशतावृत्तिं सर्वसंपत्तिकारकम् ।
शतावृत्त्या भवेदायुः शतावृत्त्या धनागमः ॥
वश्या भवन्ति राजानः श्रियमाप्नोत्यनुत्तमम् ।
धनार्थी प्राप्नुयादर्थं पुत्रकामो लभेत्सुतम् ॥
विद्यार्थी प्राप्नुयाद्विद्यां रोगी रोगात्प्रमुच्यते ।
चतुर्वर्गफलावाप्तिकारणं रिपुनाशनम् ॥
चण्डीशतावृत्तिसमं नास्ति यज्ञं वरानने ।

स्थानं यथा

हादिमते -

देवीपीठे शिवाभ्याशे त्वदभ्याशे च कारयेत् ।
देवालये सुतीर्थे वा गोष्ठे द्विजगृहेऽपि वा ॥
पुण्यारण्ये स्वगृहे वा चण्डिकायजनं भवेत् ।

अथ कालादिव्यवस्था

हादिमते -

उत्तराशास्थिते हंसे शुक्लपक्षे तथा शुभे ।
अर्केन्दुभृगुजीवे च सुयोगे सुतिथौ तथा ॥
पातककचघण्टादिदोषहीने स्थिरोदये ।
स्थापयेद्राविणं कुम्भमुत्तराभिमुखः स्वयम् ॥
न विदध्याद्धरौ सुप्ते भूकम्पाकालवर्षिणे ।
वर्जयेदुर्गमोत्पाते गुर्वादित्यादिके तथा ॥
महागुरौ विपन्ने च संवेशे कार्यवस्तुनि ।
शतावृत्त्यादियोगं तु न विदध्यात्कदाचन ॥
त्रि-पञ्च-सप्तभिर्वाऽपि नवैर्वा दशभिस्तथा ।
अदीर्घदिवसैः क्षिप्रं विदध्याच्चण्डिकामखम् ॥
अयुग्मब्राह्मणैः कार्या शतावृत्तिः सुसिद्धये ।
त्रि-पञ्च-सप्त-नवभिर्दिनैः पक्षेण वा पुनः ॥
देवीमाहात्म्यपाठं तु युग्मविप्रकृतं तु यत् ।
निष्फलं च भवेत्सर्वं भूविनाशश्च दुर्मतेः ॥

दशद्वादशहस्तं वा चतुर्द्वारं सुशोभनम् ।
चतुरस्रपताकाढ्यं मण्डपं वेदभूषितम् ॥
षोडशस्तम्भसंयुक्तं पुष्पपल्लवशोभितम् ।
वसुकोणयुतां वेदीं मध्ये कुर्यात्त्रिभागतः ॥
पक्वेष्टकचितां रम्यामुच्छ्राय हस्तसंमिताम् ।
सर्वलक्षणसंपन्नां वेदीं कुर्यान्मनोहराम् ॥
पञ्चवर्णरजोभिश्च प्रकुर्यान्मण्डपं शुभम् ।
सर्वतोभद्रसंज्ञं च मनोहारि सुशोभनम् ॥
पञ्चवर्णवितानं च किङ्किणीजालमण्डितम् ।
प्रबालैर्मौक्तिकैश्छन्नं बध्नीयान्नूतनं शुभम् ॥
श्वेतपुष्पैस्तथा रक्तैः पीतैश्चापि सुसंवृतम् ।
नीलोत्पलैः कोकनदैर्भूषितं श्रीफलैस्तथा ॥
आम्रपल्लवमालाभिर्दुर्वाभिर्मण्डपं शुभम् ।

मेरुतन्त्रे –

मण्डपं द्वारवेद्याढ्यं कुर्यात् सध्वजतोरणम् ।
तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतोऽपि वा ॥

क्रोडतन्त्रे –

विधिमन्त्रं प्रवक्ष्यामि श्रृणुष्व वरवर्णिनि ।
निमन्त्रयेच्च पूर्वेद्युर्विप्रान्विद्यासमन्वितान् ॥

मेरुतन्त्रे –

स्नात्वा नित्यकृतिं कृत्वा योजयेद्दश ब्राह्मणान् ।
जितेन्द्रियान् सदाचारान् कुलीनान् सत्यवादिनः ॥
व्युत्पन्नाञ्चण्डिकापाठरताल्लज्जादयावतः ।
मधुपर्कविधानेन वस्त्रवर्णादिदानतः ॥

मार्कण्डेयपुराणे –

मधुपर्कविधानेन यथावत्तद्वदाम्यहम् ।
श्रीपर्णीवृक्षपीठानि हस्तमानानि मानतः ॥
अष्टाङ्गुलसमुच्छ्रायसहितानि समानि च ।
स्रुवास्रुवसमायुक्ताः खदिरा लक्षणन्विताः ॥
सप्तविंशतिदर्भाणां वैतानं ग्रन्थिभूषितम् ।
विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥
सुखोष्णोदकसम्पूर्णा पाद्यार्घ्ये ताम्रपादुकाम् ।
शङ्खाश्चार्घ्य प्रदानाय गन्धपुष्पयवान्विताः ॥
दुर्वोदकसमायुक्ताः स्थापनीयाः पृथक् पृथक् ।
सुताम्रस्य कमण्डल्वाचमनोदकपूरिताः ॥
संपुटा मधुपर्कार्थे कांस्यदध्यादिसंयुताः ।
महान्यर्हाणि वस्त्राणि मुद्रिकाभरणानि च ॥
मयूरपत्रछत्राणि सोष्णीषाणि समाहरेत् ।
पादुका आहरेत्तत्र ताम्रभूषणभूषिताः ॥
अन्यस्मार्तपदभुक्तं मधपर्कस्य पूजनम् ।

मेरुतन्त्रे -

जपार्थमासनं मालां दद्यात्तेभ्योऽपि भोजनम् ।
ते हविष्यान्नमश्नन्तो मन्त्रार्थगतमानसः ॥
भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम् ।
मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः ॥
शब्दशास्त्रविरुद्धो यः पाठः सोऽशुभकर्मणि ।
शब्दशास्त्राविरुद्धस्तु पाठः शान्तिकपौष्टिके ॥
सार्थस्मृतिः पठेच्चण्डीस्तवं स्पष्टपदाक्षरम् ।

क्रोडतन्त्रे -

अलोलुपान् ऋजून् शान्तान् देव्या भक्तिसमन्वितान् ।
मन्त्रोपमन्त्रतन्त्रज्ञान् शतावृत्तेन योजयेत् ॥
आचार्येण समं विप्रान् वरयेद्दृथसुव्रतान् ।
वस्त्रोत्तरीयैः सुशुभैः पाणिं मुद्रोपवीतकैः ॥
कर्णाभरणभूषैश्च भोजनैर्वरयेत्सुधीः ।
ईशान्यां स्थापयेत्कुम्भं पूर्वोक्तविधिना नरः ॥
संस्कृत्य भूमिं संस्थाप्य कलशं तीर्थवारिणा ।
पूरयित्वा स्वर्णगर्भं क्षिपेदष्टौ मृदस्ततः ॥
धर्मकामः क्षिपेत्स्वर्णं धनकामस्तु मौक्तिकम् ।
श्रीकामः कमलं न्यस्य कामार्थी रोचनं क्षिपेत् ॥
मोक्षकामो न्यसेदवज्रं जयकामोऽपराजिताम् ।
उच्चाटनार्थं व्याघ्री च वश्यार्थं शिखिमूलकम् ॥

मारणाय मरीचं च कितवं मोहनाय च ।
आकर्षणार्थं सेवन्तीं प्रक्षिपेत्कलशोदरे ॥
मधुपर्कञ्च दद्याद्वै घृतानां विबुधाधिप ।
वारुण्यां च प्रकर्तव्यं कुण्डं लक्षणलक्षितम् ॥
मूर्तिं देव्या प्रकुर्वीत सुवर्णस्य पलेन हि ।
तदर्धेन च कुर्यात्तु तदर्धेन महामते ॥
अष्टादशभुजां देवीं कुर्याद्वाष्टकरामपि ।
पट्टकुलयुगच्छन्ना वेदिमध्ये निधापयेत् ॥
प्रतिष्ठापनमन्त्रेण प्रतिष्ठापनमुत्तमम् ॥
पुण्याहवाचनं कृत्वा पूजयेत्क्रमशस्ततः ॥
नवग्रहान्दिशापालांस्तथाऽऽवरणसप्तकम् ।
सम्पूज्य कलशं चैव प्रतिमायाश्च पूजनम् ॥
परितो मण्डलं स्थाप्य बलिदानं सुरेश्वर! ।
मण्डपस्य चतुर्द्वारे द्वौ द्वौ कुम्भौ निवेशयेत् ॥
तीर्थोदकसुसम्पन्नौ स्वर्णपल्लवशोभितौ ।
ततः संपूजयेद्देवीं गुग्गुलं चागुरुं शुभम् ॥
.... अष्टादशभुजां सतीम् ।
कस्तूरीकुङ्कुमं देव कर्पूरं चैव चन्दनम् ।
दिव्यवस्त्रमलङ्कारं सुवर्णरजतान्वितम् ॥
श्वेतपुष्पाणि श्वेतं च गुग्गुलं चागुरुं शुभम् ।
ताम्रपात्रे कृतं दीपं श्वेतवर्तीघृतान्वितम् ॥
हविष्यान्नं च नैवेद्यं पायसं शर्करान्वितम् ।
ताम्बूलवीतकं चैव शक्त्या स्वर्णं ददेच्छुभम् ॥

नवचण्डीविधानोक्तं पूजनं सुरवल्लभ! ।
नवभिर्ब्राह्मणैः सार्धमाचार्येण विधानतः ॥
गुर्वनुज्ञामवाप्याथ जपं कुर्युर्दश द्विजाः ।
शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णकम् ॥
चण्डीसप्तशतीमध्ये संपुटोऽयमुदाहृतः ।
सकामः संपुटो जाप्यो निष्कामः संपुटं विना ॥
शुद्धासनेषूपविष्टा न्यासाध्यानयुता विभो ।
चण्डीपाठं प्रकुर्युस्ते चण्डिकाचरितत्रयम् ॥
सरहस्यमृषिच्छन्दो देवताशक्तिसंयुतम् ।
जपेदनूपमेकैकं मौनिनस्त्यक्तमत्सराः ॥
प्रदक्षिणनमस्कारैर्देवीं सन्तोषयेत्प्रभो ।

इति शतचण्डीविधानम्

अथ सहस्रचण्डीविधानम्

हादिमते-

श्रीभगवानुवाच

भवानीश! महादेव! नीलकण्ठ! उमापते! ।
सहस्रचण्डिकापाठं कथं कुर्यात्सुरेश्वर! ॥
कृते तु तेन किञ्च स्यात्तद्वदस्व महेश्वर! ।

ईश्वर उवाच -

श्रृणु विष्णो! मम भक्त सहस्रस्य विधानकम् ।
पुत्रकामेन कर्तव्यं धनकामेन चेश्वर ।
चक्रवर्तित्वकामेन स्तम्भने मारणे तथा ।
राज्यभ्रष्टे महोत्पाते जनमारे महाभये ॥
गजमारेऽश्वमारे च परचक्रभये तथा ।
इत्यादिविविधे दुःखे राजयक्ष्मादिके भये ॥
सहस्रं चण्डिकापाठं कुर्याद्वा कारयेत्तथा ।
जापकास्तु शतं प्रोक्ता विंशद्धस्तस्तु मण्डपः ॥
भोज्याः सहस्रविप्रेन्द्राः गोशतं तत्र संदिशेद् ।
जापकेभ्यो दिशेच्छक्त्युः पराध्दर्धि प्रमाणतः ॥
गुरवे द्विगुणं देयं शय्यादानं तथैव च ।
सप्तधान्यं च भूदानं श्वेताश्वं तु मनोहरम् ॥

वृद्धं च तिलपात्रं तु दद्यात्स्वर्णं तथाऽयुतम् ।
पञ्चनिष्कमिता मूर्तिः कर्तव्या चार्धमानतः ॥
अष्टादशभुजा देवी सर्वायुधविभूषिता ।
अवारितान्नं दातव्यं सहस्रं प्रत्यहं विभो ॥
शते चानियतं दानं नवार्णलक्षमात्रकम् ।
जपे च नियताहारः पयः पानेन वर्तयेत् ॥
फलाहारेण वा देव सहस्रं तु स्तुतिं जपेत् ।
नानया सदृशी विद्या विद्यते भुवनत्रये ॥
सहस्रपाठकृन्मर्त्यो राजते सूर्यमण्डले ।
देवीपूजा प्रकर्तव्या पूर्वोक्तेन विशेषतः ॥
पूजनं च कुमारीणां होमं चैव दशांशतः ।
पूजनं चैव कुम्भस्य पूर्वोक्तविधिना प्रभो ॥
पुनः पूजा प्रकर्तव्या रात्रौ जागरणोत्सवम् ।
यवाङ्कुरानथादाय यजमानाभिषेचनम् ॥
कुर्युर्गुर्वृत्विजः सर्वे माङ्गल्यकरणं तथा ।
ततो जनपदैः पौरैर्ज्ञानिभिश्च प्रदक्षिणम् ॥
देवालयं च नगरं यजमानः करोति हि ।
सुरामांसैस्तथा रक्तैः कुष्माण्डैर्बलिमाचरेत् ॥
इन्द्रादिलोकपालेभ्यः सायुधेभ्यो यथाक्रमम् ।
दीनानाथविशिष्टेभ्यः सर्वेभ्यश्च यथागतम् ॥
अन्नदानविशिष्टं च कुर्याद्देवीप्रियं नरः ।
एवं यश्चण्डिकापाठं सहस्रं तु समाचरेत् ॥
तस्या या स्यात्कार्यसिद्धिर्नात्र कार्या विचारणा ।

अतः परतरं नास्ति त्रिषु लोकेषु माधव ।
स्तुतिपाठसहस्रस्य फलं प्रोक्तं मया तव ॥
किमन्यच्छ्रोतुमिच्छा ते तद्वदस्व सुरेश्वर ।
तव वाक्यामृतं पीत्वा देवीप्रीतिकरं विभो ॥
आनन्दामृतपूर्णोऽहं जातस्त्वद्भक्तिसेवनात् ।
श्रुत्वा देवीचरित्रं तु नान्यदिच्छामि शङ्कर ॥
रमाकान्त सुराधीश प्रोक्तं गुह्यतमं मया ।
नानसूयाय वक्तव्यं परशिष्याय नो वदेत् ॥
देवीभक्ताय वक्तव्यं मम भक्ताय माधव ।
त्वद्भक्ताय च वक्तव्यं न मूर्खायातितायिने ॥
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ।
नानया सदृशी विद्या न गङ्गा सदृशी नदी ॥
न वैकुण्ठात्परं धाम न मुक्तिः काशिकां विना ।
न राजा कार्त्तवीर्याच्च एतत्सत्यं सुरेश्वर ॥

अथ कुमारीपूजा

यजमानः पूजयेच्च कन्यानां दशकं शुभम् ।
द्विवर्षाद्या दशाब्दान्ता कुमारीं परिपूजयेत् ॥
नाधिकाङ्गीं न हीनाङ्गीं कुष्टिनीं च व्रणाङ्किताम् ।
अन्धकानां केकरां च कुरूपां रोमयुक्तनुम् ॥
दासीजां भोगयुक्ताञ्च दुष्टां कन्यां न पूजयेत् ।
विप्राः सर्वेष्टसंसिद्ध्यै यशसे क्षत्रियोद्भवाम् ॥
वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत् ।

द्विवर्षा सा कुमार्युक्ता त्रिमूर्तिर्हायनात्रिका ॥
चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी ।
षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायना ॥
अष्टवर्षा शाम्भवीस्याद्दुर्गा तु नवहायना ।
शुभा द्वादशवर्षोक्ता स्तान्मन्त्रैः परिपूजयेत् ॥
एकाब्दायां प्रीत्यभावो रुद्राब्दा तु विवर्जिता ।
तासामावाहने मन्त्रः श्लोकरूपो निगद्यते ॥
मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम् ॥
कुमारिकादिकन्यानां पूजामन्त्रान् ब्रूवेऽधुना ।
जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ॥
पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तुते ।
त्रिपुरां त्रिपुराधारां त्रिवर्गज्ञानरूपिणीम् ॥
त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम् ।
कलात्मिकां कलातीतां कारुण्यहृदयां शिवाम् ।
कल्याणजननीं नित्यां कल्याणीं पूजयाम्यहम् ॥
कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम् ।
कामदां करुणोदारां कालिकां पूजयाम्यहम् ॥
चण्डवीरां चण्डमयीं चण्डमुण्डप्रभञ्जिनीम् ।
पूजयामि सदा देवीं चण्डिकां चण्डविक्रमाम् ॥
सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम् ।
सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम् ।
दुर्गमे दुस्तरे कार्ये भवदुःखविनाशिनीम् ॥

पूजयामि सदा भक्त्या दुर्गां दुर्गार्तिनाशिनीम् ।
सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥
सुभद्राजननीं देवीं सुभद्रां पूजयाम्यहम् ।
एतैर्मन्त्रैर्लक्षणाढ्यां तां तां कन्यां समर्चयेत् ॥
गन्धैः पुष्पैर्भक्षणाद्यैर्वस्त्रैराभरणैरपि ।
वेद्यां विरचिते रम्ये सर्वतोभद्रमण्डले ॥
घटं संस्थाप्य विधिवत्तत्रावाह्यार्चयेच्छिवाम् ।
तदग्रे कन्यकाश्चापि भोजयेद् ब्राह्मणानपि ॥
उपचारैश्च विविधैः पूर्वोक्ताऽऽवरणान्यपि ।
एवं चतुर्दिनं कृत्वा पञ्चमे होममाचरेत् ॥

शम्भुनित्यातन्त्रे -

दद्यादाचमनं तस्यै दद्याद्वस्त्रं सुकञ्चुकम् ।
सकङ्कणाङ्गुलीयानि कर्णालङ्कारशोभनम् ॥
ग्रैवेयकं प्रदत्त्वा च चन्दनेन विलेपयेत् ।
पूजयेत्पुष्पमालाद्यैर्दिव्यैर्धूपैः सुधूपयेत् ॥
कुर्यादारार्तिकं देवि उदयं वाच्यतां मुहुः ।
भोजयेद्भक्तिभावेन पायसं घृतशर्कराम् ॥
सुपक्वान्नानि चान्यानि दम्भमोहविवर्जितः ।
फलानि च सुस्वादूनि दद्यादस्यै पुनः पुनः ॥
यावत्सा भोजनं कुर्यात्तावत्स्तोत्रं जपेत्सुधीः ।
दद्यादाचमनं तस्यै ताम्बूलं च समर्पयेत् ॥

तोषयेद्धेमदानेन कुमारीं प्रणतोऽसकृत् ।
प्रदक्षिणां नमस्कारान् कृत्वा मूर्घ्नि कृताञ्जलिः ॥
विसर्जयेत् कुमारीं तां स्वगृहे सत्त्वनिर्भरः ॥
अनेन विधिना भक्त्या कुमारीं यस्त्रियं जपेत् ।
स पृथ्वीराज्यमासाद्य श्रिया सायुज्यतां व्रजेत् ॥
यं यं प्रार्थयते कामं देवानामपि दुर्लभम् ।
कुमारीपूजनं कृत्वा तं तं प्राप्नोत्यसंशयः ॥
ब्रह्मविष्णुमहेशानां कुमारी परमाकला ।
तत्पूजनेन देवेशि त्रैलोक्यं स्यात् सुपूजितम् ॥
सम्यक् तत्फलदं तस्य चतुर्वेदफलं भवेत् ।
सर्वतीर्थफलं तस्य यः कुमारीं समर्चयेत् ॥
दुर्गायाः परमेशानि दीपदानविधिं प्रभो ।
यच्च कृत्वा नरो भाग्यं प्राप्नोति ब्रूहि शङ्कर ॥
सुदिने सुस्थले रम्ये स्थण्डिलं चतुरस्रकम् ।
कृत्वा तु गोघृतेनैव त्रयोदश सुसङ्ख्यकान् ॥
स्वर्णतारं शुल्वमार्तिमय्यान् प्रज्ज्वाल्य दीपकान् ।
पङ्क्त्याकारेण संस्थाप्य रक्ताकाराश्च वर्त्तिकाः ।
आवाहयेदाद्यदीपैः प्रथमाध्यायदेवताः ।
पूजयेद् विधिना देवीमुपचारैस्तु षोडशैः ॥
श्लोकैश्च नवभिर्दत्त्वा पुष्पाणि च ततो शिवे ।
आद्याध्याये प्रतिश्लोकमेकैकं पुष्पमर्चयेत् ॥
धूपं दीपं च नैवेद्यं पायसं मुखवाससम् ।
सदक्षिणाफलं चैव नीराजनमथार्पयेत् ॥

द्वितीये दीपैरध्याये द्वितीयाध्यायदेवताम् ।
क्रमात्त्रयोदशान्तं हि महापूजां ततः स्वरे ॥
पूर्वाह्ने तु सौम्यकर्म क्रूरं स्यादपराह्निके ।
वटुतैलेन क्रूरादौ प्रेतभूमिस्थखर्परे ॥
उन्मत्ततैलकैर्वापि प्रेतकर्पटवर्त्तिभिः ।
नीलैः कृष्णमुग्रगन्धैः पुष्पैर्नैवेद्यपूजनम् ॥
स्वयं च तादृशो भूत्वा श्मशाने दक्षिणामुखः ।
विश्वेश्वरि - या संस्तुता - या साम्प्रतं - संस्तुता ॥
सर्वबाधा -सर्वमङ्गल्ये - सृष्टिश्च -शरणागत -
सर्वस्वरूपेति नवश्लोकानुग्रहकर्मणि ॥
विग्रहे सर्वबाधान्ते एवमुक्त्वा ततो वदेत् ।
वैरिनाशनमित्यर्थं रोगे रोगविनाशनम् ॥
पुनः प्रपूज्य देवेशीं समाप्य च विसर्जितः ।
तच्छेषस्नेहैः प्रज्ज्वाल्य स्थूलवर्त्तिसमन्वितः ॥
सेनाधिपो व्रजेद्युद्धे वैरी च प्रपलायते ।

अथ सप्तशतीधारणम्

हरगौरीतन्त्रे -

यदा धने महाहानिरात्मनो ग्लानिरेव च ।
तदा धार्या सप्तशती रिपुघ्नी भूतिवर्धिनी ॥
दुःस्वप्नदर्शने घोरे महामारीसमुत्थिते ।
पुष्टिप्रदा सप्तशती पुंसामायुः क्षयेऽपि च ॥
महाभयपदे योगे दुर्भिक्षे मकरेऽपि च ।
धारयेत् सप्तशतिकां त्रैलोक्ये सुभगां प्रिये ॥
चण्डिकायाञ्जनं कुर्याद्यथोक्तविधिना ततः ।
कुर्यात्तत्र शतावर्त्तं देव्या माहात्म्यमुत्तमम् ॥
धारणे सप्तशत्यास्तु विशेषेण वरानने ।
धारणाच्च भवेदायुर्धारणाच्च धनागमः ॥
वश्या भवन्ति राजानः प्रियमाप्नोत्यनुत्तमम् ।
धनार्थी प्राप्नुयादर्थं पुत्रकामो लभेत्सुतम् ॥
विद्यार्थी लभते विद्यां रोगी रोगात्प्रमुच्यते ।
चतुर्वर्गफलाऽऽवाप्तिकारणं रिपुनाशनम् ॥
श्रीचण्डीधारणसमो नास्ति यज्ञो वरानने ।
चण्डीशतावर्त्तसमो नास्ति यज्ञो महेश्वरि ॥
धारणे सप्तशत्यास्तु शतावर्त्तं विधीयते ।
चण्डिकाधारणे चण्डीपाठस्यावश्यमुत्तमम् ।
शुभतिथौ शुभे लग्ने शुभे वारे विशेषतः ।

कुर्याच्च लेखनारम्भं सप्तशत्या प्रयत्नतः ॥
आदौ तु कवचं लेख्यं पश्चात्सप्तशतीं लिखेत् ।
चण्डिकाभक्तियुक्तो हि ब्राह्मणस्तु लिखेन्मुदा ॥
सदाचारवता सम्यक् शुद्धाशुद्धविचारिणा ।
भूर्जपत्रे सप्तशती लेख्या हेमशलाकया ॥
गोरोचनं सकर्पूरं श्रीखण्डं कुङ्कुमानि च ।
आरक्तमदसिन्दूरं कस्तूरी समधूनि च ॥
एकीकृत्य लिखेन्मन्त्री एकभक्तेन सुस्थिरः ।
चण्डिकाहृदयं ध्यायेत्पूर्णं कुर्याच्छुभे दिने ॥
शुभेऽहनि ततः कुर्याद्यत्रमण्डपमुत्तमम् ।
चतुर्दिक्षु चतुर्द्वारं तोरणेन विभूषितम् ॥
शोभाढ्यं पुष्पमालाभिः कुर्यात्तत्र विशेषतः ।
ब्राह्मणान् वरयेत्तत्र शतावर्त्ते[१] विशेषतः ॥
विधिमन्त्रं प्रवक्ष्यामि श्रृणुष्व वरवर्णिनि ।
निमन्त्रयेच्च पूर्वेद्युर्विप्रान्विद्यासमन्वितान् ॥
धारणं सप्तशत्यास्तु वक्ष्ये शास्त्रमतं विधिम् ।
सिद्धक्षेत्रे देवगृहे समुद्रस्य च सन्निधौ ॥
कुबेरसम्मुखो भूत्वा द्विहस्तमितस्थण्डिले ।
षट्कोणान्तर्गतं पद्ममष्टपत्रं सुवर्त्तुलम् ॥
तद्बहिः षोडशदलं द्वात्रिंशत् तद्बहिर्लिखेत् ।
षट्कोणं पीतवर्णेन पत्रं पीतेन पूरयेत् ॥
वैपरीत्यं बहिर्पत्रं पञ्चवर्णैः पटे लिखेत् ।

१ शतावर्तमित्युपलक्षणम्, यथाशक्तिर्वा कारयेदिति ।

चतुर्वर्णैश्चतुर्द्वारं तत्र पूजां समारभेत् ॥
गणेशं पूजयेदीशे पूर्वे चापि तथा ग्रहान् ।
तद्दक्षिणे दिगीशाँश्च ब्रह्माणं कर्णिकार्चयेत् ॥
ब्राह्म्यादीन् पूजयेत्पत्रे अथ सप्तशतीं जपेत् ।

दृष्ट्वा मन्त्राण्यनेकान्यथ च बुधगणः श्रीमहेशप्रणीता-
न्युच्चैः सङ्क्षिप्य बुद्ध्या व्यरचि ननु मया चण्डिकाभक्तिभाजा।
ग्रन्थः प्रोद्यत्प्रमाणप्रचुरतरलसद्युक्तिमुक्तावितानो
भद्राऽभद्रं च बुद्ध्वा दृढमतिसुधीः शोधनीयो भवद्भिः ॥

इति नवमीसिंहकृतायां चण्डीभक्तिविनोदिन्यां
तृतीयः पटलः समाप्तः ।

प्रथमामातृका (श्रीशाके १७१९ श्रीसंवत् १८५४ शुभम्)

सप्तशती चण्डी पाठनियम

नित्य, नैमित्तिक, काम्य जुनकुनै कर्म श्रीगणेश गरेर सुव्यवस्थित तरिकाले सम्पन्न गर्न विधि-नियमको जरुरत पर्दछ। त्यसले कर्म शुद्ध, प्रभावकारी र फलीभूत हुनुका साथै साधकको कामना परिपूर्ति भई मन शान्त हुन्छ र अन्तिम आध्यात्मिक लक्ष्यसमेत उपलब्ध हुन्छ।

शक्ति-उपासना प्रधान यस "सप्तशती चण्डी"मा मसिनामसिना कुराहरूतर्फ पनि पूरापूर ध्यान दिंदै अत्यन्त होसियारीका साथ साधना सिद्ध गर्नुपर्ने हुनाले अझै यस्तो विधि-नियमको विशेष महत्त्व रहन्छ। ती विधि-नियम अन्तर्गत कसरी पाठ वा साधना थालनी गर्ने ? कस्तो तरिकाले मूलपाठका अङ्गहरू पूरा गरिनुपर्ने र मूलपाठ कुन नियमले समापन गर्नुपर्ने अनि उत्तराङ्ग पाठजपका पद्धति केके हुन् ? जस्ता विषय पर्दछन्। पाठक वा साधक/साधिकाले यस्ता अत्यन्त गम्भीर कुराहरूमा खुबै ध्यान पुर्‍याउनुपर्दछ। यसै सप्तशती चण्डीको पहिलो पटलको आखिरीमा वाराहीतन्त्र, मत्स्यसूक्त, हादिमत जस्ता ग्रन्थहरूमा दिइएका पाठविधिलाई खिचेर "अथ पाठनियमः" शीर्षकमा चण्डीपाठ सम्बन्धी उल्लेख्य नियमहरू समावेश गरिएका छन्। ती नियमहरूलाई समेत पाठ वा साधना गर्नुपूर्व मनन गर्नुपर्दछ।

आधारे स्थापयित्वा तु पुस्तकं वाचयेत्स्फुटम्।
हस्ते संस्थापयाद् देवि हरत्यर्धफलं यतः ॥

वाराहीतन्त्रबाट लिइएको यस श्लोकदेखि प्रथम पटल समाप्तिसम्मका श्लोकहरूले पुस्तक हातमा लिएर पाठ गर्न नहुने बरु खटिया वा अन्य कुनै शुद्ध आसनमा स्थापना गरी पाठ गर्नुपर्ने कुरातर्फ पाठकर्तालाई सचेत गराएको बुझिन्छ। त्यस्तै उक्त शीर्षक अन्तर्गतका अन्य श्लोकहरूमा अध्याय पूरा नभई बीचमा पाठ छोड्न नहुने,[1] कारणवश वा प्रमादवश अध्याय नपुगीकन पाठ छोडेमा फेरि

---

[1] यावन्न पूर्यतेऽध्यायस्तावन्न विरमेत्सुधीः।
अनुक्रमं पठेद्देवि शिरः कम्पादिकं त्यजेत् ॥

अध्यायको सुरुदेखि पाठ गर्न थाल्नुपर्ने,[२] सुरुदेखि मेलैसित रेफकान विसर्ग नछोडी पाठ गर्नुपर्ने, जिउ, शिर नहल्लाईकन शान्त भई पुस्तकका हरेक श्लोकहरूलाई राम्ररी हेरेर निश्चल चित्त लिई एकतानले पाठ गर्नुपर्ने विधि निर्धारण गरिएको छ ।[३]

पाठविधि विचार नगरी गीत गाएको पारामा, अति नै छिटोछिटो पाठ गरेमा झन् उल्टो फल आइलाग्ने हुनाले अर्थबोध हुने गरी मधुर स्वरमा अक्षर-अक्षर प्रस्ट सुनिने किसिमले पद छुट्याइछुट्याई अनुस्वार, विसर्ग, ह्रस्व, दीर्घ मिलाएर शुद्ध उच्चारण गरीकन पाठ गर्नुपर्दछ । त्यसरी पाठ गर्दा अत्यन्त शुभ हुन्छ ।

१. सप्तशतीपाठको सामान्य नियम

साधक/साधिका पवित्र आसनमा बसेर पुस्तकलाई पनि खटिया या कुनै शुद्ध आसन वा आधारमा राखिसकेपछि पाठ गर्ने क्रममा सर्वप्रथम आचमन गर्नुपर्दछ । अनि, पवित्रधारण, प्राणायाम गरेपछि चण्डिका भगवती देवी र गुरुलाई नमन गरी प्रतिज्ञा सङ्कल्पसमेत गरेर पुस्तकको पञ्चोपचारले पूजा गर्ने, योनीमुद्रा प्रदर्शन गर्ने, उत्कीलनपूर्वक शापोद्धार गर्ने नियमहरू[४] क्रमश अपनाउनुपर्दछ । त्यसपछि, सप्तश्लोकी दुर्गादेवीस्तोत्र पाठ गरेर अर्गलास्तोत्र, कीलकस्तोत्र पाठ गरीकन कवचपाठ गर्नुपर्दछ ।

यद्यपि यस क्रममा केही मतभेद पनि पाइन्छ । कवचलाई बीज, अर्गलालाई शक्ति र कीलकलाई कीलन क्रिया मानेर योगरत्नावलीमा पहिला कवच अनि अर्गलास्तोत्र र त्यसपछि कीलकस्तोत्र पाठ गर्नुपर्ने

---

२ प्रमादादध्यायमध्ये विरामोरम्भतः प्रिये ।
पुनरध्यायमावृत्त्य पठेत्सर्व स्तवे विधिः ॥

३ शुद्धेनाचलचित्तेन पठितव्यं प्रयत्नतः ।

४ शापोद्धार गर्ने तरिकाहरु विभिन्न किसिमका पाइन्छन् । ती मध्ये रुद्रयामलमहातन्त्रको दुर्गाकल्पमा बताइएको चण्डिकाशापविमोचनमन्त्रलाई विनियोगपूर्वक पाठ गरेर सप्तशती अङ्गपाठ सुरु गर्नु शापोद्धारको मुख्य तरिका हो । त्यसैले, प्रस्तुत पुस्तकमा यही विधि अनुसरण गरिएको छ ।

अवधारणा व्यक्त गरिएको छ ।[५] गीताप्रेसबाट प्रकाशित लगायत केही चण्डीपाठका पुस्तकहरूमा यही अवधारणालाई अपनाएर सुरुमा कवच पाठ नै राखिएको देखिन्छ । तर, चिदम्बरसंहितामा पहिले अर्गलास्तोत्र अनि कीलकस्तोत्र र त्यसपछि कवच पाठ गरिनु उचित हुने कुरा बताइएको छ ।[६] नवमी सिंहद्वारा विरचित चण्डीभक्तिविनोदिनीमा पहिलो पटल समाप्त हुने बित्तिकै यही पाठक्रमको हादिमतको प्रमाण[७] उल्लेख छ । हुन पनि पहिला अर्गलास्तुतिद्वारा आग्लो खोली भगवती देवीको हृदयरूपी मन्दिर या घरमा प्रवेश गरिनुपर्ने त्यसपछि "कीलकः" पाठद्वारा वरिपरि कीला ठोकेझैं गरी विपरीत मन्त्रको प्रभाव वा विघ्नबाधा रोकिनुपर्ने अनि कवचद्वारा शरीरमा रक्षा गर्दै देवदेवीको विन्यास गरिनुपर्ने[८] र "देवो भूत्वा देवं यजेत्" भन्ने सिद्धान्त अनुसार सप्तशती साधना गरिनुपर्ने कुरा बढी उचित देखिन्छ ।

कवचपाठपछि रात्रीसूक्त पाठ[९] गरेर नवार्णविधि अनुरूप न्यासजपध्यान गरी सप्तशती- (प्रथम अध्यायदेखि तेह्रौं अध्यायसम्म – ७०० श्लोक) मूलपाठ गर्नुपर्दछ ।[१०] मूल सप्तशती पाठ पूरा भएपछि पुनः नवार्णविधि[११] गरेर देवीसूक्तहरू पाठ गरी रहस्यत्रय पाठ गर्नुपर्दछ ।

५ कवचं बीजमादिष्टमर्गला शक्तिरुच्यते ।
कीलकं कीलकं प्राहुः सप्तशत्या महामनो ॥

६ अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ।
जप्या सप्तशती पश्चात् सिद्धिकामेन मन्त्रिणा ॥

७ अर्गलं कीलकं चादौ पठित्वा कवचं पठेत् ।

८ अर्गलं हृदये यस्य तथा नार्गलवानसि ॥
कीलकं हृदये यस्य सकीलितमनोरथः ।
कवचं हृदये यस्य सवज्रकवची सुखी ॥

९ रात्रिसूक्तं पठेदादौ मध्ये सप्तशतीस्तवम् ।
प्रान्ते तु पठनीयं वै देवीसूक्तमिति क्रम : ॥ मारीचकल्प

१० सप्तशती चण्डी पाठको प्रत्येक अध्याय पूरा हुँदाखेरि 'इति', 'बध', 'अध्याय', 'समाप्त' जस्ता शब्दहरु उच्चारण नगर्ने, बरु 'श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये प्रथमः ॐ तत्सत् । भन्ने शब्दावली उच्चारण गर्ने प्रचलन पाइन्छ । गीताप्रेसबाट प्रकाशित श्रीदुर्गासप्तशती मा पनि पाठ सुरु हुने बेलामा यस कुराको उल्लेख गरिएको छ, तर त्यस भनाइको लागि कुनै प्रमाण दिइएको छैन ॥

११ मध्ये नवार्णपुटितं कृत्वा स्तोत्रं सदाभ्यसेत् । –चिदम्बरसंहिता

त्यसपछि क्षमापनस्तोत्रहरू पाठ गरीकन अन्त्यमा सिद्धकुञ्जिकास्तोत्र पनि पाठ गरेमा जसको नाममा पाठ लगाइएको हो, उसको र पाठकर्ता वा साधक/साधिकाको पनि "धर्म-अर्थ-काम-मोक्ष" प्राप्त भई अलौकिक शान्ति मिल्दछ।

पाठपूर्व, पाठका प्रसङ्‌गमा र अन्त्यमा गरिनुपर्ने सामान्य विधिका बारेमा यस चण्डीभक्तिविनोदिनीको पहिलो पटलमा र दोस्रो पटल अन्तर्गत "अथ प्रयोग" शीर्षकमा शम्भुनित्यातन्त्र, मेरुतन्त्र र हादिमतबाट लिइएका प्रमाणहरू समाविष्ट छन्। ती प्रमाणहरूलाई पनि मनन गरेर विधिको उपयोग गर्नु अझ प्रार्थनीय हुन्छ।

२. सप्तशतीपाठको विशेष नियम

माथि सामान्य नियममा उल्लेख भएझैं सप्तशतीपाठ सुरु हुनु अघिका विधिनियम, अङ्गपाठ र मूल सप्तशती पूरा भइसकेपछिका उत्तराङ्ग पाठ सबै किसिमका चण्डीपाठमा समानरूपले अपनाउनुपर्दछ। पुरश्चरण, नवचण्डी, शतचण्डी, सहस्रचण्डी जस्ता सप्तशती-चण्डीका विशेष विधिहरू र कुमारीपूजा, सप्तशतीधारणाका नियमहरू यसै पुस्तकको तृतीय पटलमा दिइएका छन्। त्यहाँ मारीचकल्प, शम्भुनित्यातन्त्र, वाराहीतन्त्र, मेरुतन्त्र, क्रोडतन्त्र, हादिमत, हरगौरीतन्त्रका सप्तशतीसित सम्बद्ध तत्तत् विषयवस्तु उल्लेख भएका छन्। जिज्ञासु साधकहरूले त्यहींबाट उक्त विधिको चिन्तनमनन गरेर प्रयोग/उपयोग गर्नुहुने नै छ।

२.१ शापोद्धार र उत्कीलन नियम

कात्यायनी तन्त्रका अनुसार सप्तशतीको १३ अध्यायमध्ये "तेह्रौं-पहिलो-बाह्रौं-दोस्रो-एघारौं-तेस्रो-दशौं-चौथो-नवौं-पाँचौं-आठौं-छैटौं-सातौं-सातौं" (अन्त्यमा सातौं अध्यायलाई दुई पटक) यो क्रमले पाठ गर्नु शापद्धार हो।[12] त्यस्तै पहिले मध्यम चरित्रपाठ अनि प्रथम चरित्रपाठ र अन्त्यमा उत्तम चरित्रपाठ गर्नु उत्कीलन विधि हो।[13] एकै

---

१२ अन्त्याऽऽद्याऽर्कद्विरुद्रत्रिदिगब्ध्यङ्केष्विभर्तवः।
अश्वऽश्व इति सर्गाणां शापोद्धारो ह्ययत्क्रमः॥

१३ उत्कीलने चरित्राणां मध्याद्यन्तमिति क्रमः॥

दिनमा सम्पूर्ण पाठ समाप्त गर्ने परिस्थिति नमिल्ने भएमा पहिलो दिन मध्यम चरित्रको र दोस्रो दिन बाँकी दुई (प्रथम र उत्तम) चरित्रको पाठ गर्ने विधान पनि छ। अझ प्रत्येक दिन नियमित चण्डीपाठ गर्ने साधकले एकै दिनमा सबै अध्याय पाठ पूरा गर्न नसक्ने अवस्था हो भने पहिलो दिनमा १ (प्रथम) अध्याय, दोस्रो दिनमा २ (द्वितीय र तृतीय) अध्यय, तेस्रो दिनमा १ (चतुर्थ) अध्यय, चौथो दिनमा ४ (पञ्चम–अष्टम) अध्याय, पाँचौं दिनमा २ (नवम र दशमं) अध्याय, छैटौं दिनमा १ (एकादशं) अध्याय अनि सातौं दिनमा २ (द्वादश र त्रयोदश) अध्याय पाठ गरी सात दिनमा सप्तशती समाप्त गर्नुपर्ने नियम छ। यस परिस्थितिमा शापोद्धार अनिवार्य नभएको तर्क पनि विद्वान्हरूको पाइन्छ।[१४]

शापोद्धार र उत्कीलन नियममा फरक–फरक मत पाइन्छन्। ती मतमध्ये –

१. कृष्णपक्षको अष्टमी वा चतुर्दशी तिथिमा[१५] भगवती देवीलाई सम्पूर्ण वस्तु र भाव समर्पण गरेर आफू पनि देवीमय भई सप्तशती चण्डी पाठ गर्नु अनि प्रत्येक वस्तुलाई प्रसादका रूपमा उपयोग गर्नु शापोद्धार र उत्कीलन हो।[१६]

२. अङ्ग र श्लोक पूरा नहुनु देवीका लागि शाप हो। त्यसैले सबै अङ्ग र श्लोक पूरा हुने गरी पाठ गर्नु शापोद्धार हो[१७]। अतः अर्गला, कीलक र कवच गरी अगाडिका तीन अङ्ग अनि सप्तशती मूल पाठ र त्यसपछि रहस्यत्रय पाठ गर्नुपर्दछ।

३. शापोद्धार मन्त्र
(ॐ ह्रीं क्लीं श्रीं क्राँ क्रीं चण्डिकादेव्यै शापनाशानुग्रहं कुरु कुरु स्वाहा) सप्तशती पाठको सुरुमा सात पटक पढ्ने, बीचमा सप्तशती पाठ गर्ने अनि फेरि सात पटक उक्त मन्त्र पढ्ने नियम छ , यो शापोद्धारको अर्को तरिका हो।

---

१४ श्रीदुर्गासप्तशती, गीताप्रेस, गोरखपुर।
१५ कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः।
ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति।
१६ श्रीदुर्गासप्तशती, गीताप्रेस, गोरखपुर।

१७ पूर्ववत्।

४. सप्तशती पाठको सुरु र अन्त्यमा उत्कीलन मन्त्र
(ॐ श्रीं क्लीं ह्रीं सप्तशती चण्डिके उत्कीलनं कुरु कुरु स्वाहा)
एक्काईस-एक्काईस पटक पाठ गर्नु पनि शापोद्धार हो।

५. सप्तशती पाठको सुरु र अन्त्यमा मृतसञ्जीवनी विद्या -
(ॐ ह्रीं ह्रीं वं वं ऐं ऐं मृतसञ्जीवनी विद्ये मृतमुत्थापयोत्थापय क्रीं ह्रीं ह्रीं वं स्वाहा)
पाठ गर्ने पनि नियम पाइन्छ।

६. मारीचकल्पका अनुसार शापविमोचनका लागि सप्तशती पाठको सुरुमा मात्र १०८ पटक सप्तशतीशापविमोचन मन्त्र -
(ॐ श्रीं श्रीं क्लीं हूँ ॐ ऐं क्षोभय मोहय उत्कीलय उत्कीलय उत्कीलय ठं ठं)
जप गर्नुपर्दछ।

७. रुद्रयामलमहातन्त्रका अनुसार विनियोगपूर्वक चण्डिका-शापविमोचन मन्त्र-
("ॐ (ह्रीं) रीं रेतः स्वरूपिण्यै ... ।१।... त्रिगुणात्मिकायै दुर्गादिव्यै नम :।१८।")
पाठ गरेपछि शापोद्धार हुन्छ। अनि, सप्तशतीका सबै अङ्ग र मूल पाठ गर्नु उचित हुन्छ भन्ने बुझिन्छ।

यसरी शापोद्धार र उत्कीलनका धेरै तरिका भएको हुँदा कुनै एक तरिका अपनाउँदा पनि उचित हुने देखिन्छ। यहाँ यस सप्तशती चण्डी पाठ गर्ने प्रसङ्गमा शापोद्धारका उल्लिखित धेरै तरिकामध्ये रुद्रयामलमहातन्त्रकै दुर्गाकल्पमा बताइएको विनियोगपूर्वकको उक्त चण्डिका-शापविमोचन मन्त्रलाई अनुसरण गरेर पाठको सुरुवातमा नै यथास्थानमा राखिएको छ। यसो हुँदा पाठकर्तालाई "अथ पाठः प्रारभ्यते" देखि मेलैसित पाठ गर्दै जान सजिलो पर्दछ।

२.२ पुटपाठ र सम्पुटपाठ नियम

व्यक्तिगत वा सामूहिक विशेष सिद्धि प्राप्त गर्नका लागि पुटपाठ या सम्पुटपाठको विधान अपनाइन्छ। "मध्ये नवार्णपुटितं कृत्वा स्तोत्रं सदाभ्यसेत्"भन्ने नियम अनुसार चिदम्बरसंहितामा सुरु र अन्त्यमा नवार्ण विधिले सम्पुट गरेर सप्तशती पाठ गर्ने विधि उल्लेख छ। त्यस्तै डामरतन्त्रमा आदि र अन्त्यमा सय-सय पटक नवार्ण जप गरी

सप्तशतीलाई सम्पुट गर्नुपर्ने नियम भेटिन्छ ।[१८] त्यसरी पुटपाठ या सम्पुटपाठको विधान अपनाउँदा पूरै मूल पाठलाई नवार्णमन्त्रले सम्पुट गर्ने विधिबाहेक उत्तरोत्तर कामना परिपूर्तिका लागि र विशेष सिद्धिका लागि प्रत्येक अध्यायलाई, अझ प्रत्येक श्लोकलाई समेत पुट/सम्पुट गरेर सप्तशती साधना गर्ने चलन पनि पाइन्छ। त्यसरी पुट/सम्पुट पाठ गर्दा मूलपाठका प्रत्येक श्लोकमा बीजमन्त्र[१९] वा कामनाअनुरूपका स्तोत्र थपी नियमपूर्वक पाठ गरिनुपर्छ । पुटपाठविधिमा अगाडि एक पटक कामनाअनुरूपको निर्धारित बीजमन्त्र वा स्तोत्र लगाउने र सम्पुटपाठमा अगाडि-पछाडि गरेर दुई पटक उक्त कामनाअनुरूपको निर्धारित बीजमन्त्र वा स्तोत्र लगाउने विधि प्रचलित छ। जस्तै :

पुटपाठ :–

प्रथमोऽध्यायः

अस्यश्रीचण्डिकासप्तशतीप्रथमचरित्रस्य ब्रह्मा ऋषिः, महाकाली देवता, गायत्रीच्छन्दः, नन्दजा शक्तिः, रक्तदन्तिका बीजम्, अग्निस्तत्त्वम्, श्रीमहाकाली प्रीत्यर्थे जपे विनियोगः ।

ध्यानम्
खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः ।
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ।
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

श्रीमार्कण्डेय उवाच ।
ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥१॥

---

१८ शतमादौ शतं चान्ते जपेन्मन्त्रं नवार्णकम् ।
चण्डीं सप्तशतीं मध्ये सम्पुटोऽयमुदाहृतः ॥

१९ पुटितं मूलमन्त्रेण [illegible]

ॐ ऐं । ॐ ह्रीं । ॐ क्लीं ॥ ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे ॥

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥२॥

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

....

++ ++ ++

....

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ १८

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये सुरथवैश्यवरप्रदानं नाम त्रयोदशोऽध्यायः ॥

सम्पुटपाठ :–

प्रथमोऽध्यायः

अस्य श्रीचण्डिकासप्तशतीप्रथमचरित्रस्य ब्रह्मा ऋषिः, महाकाली देवता, गायत्रीच्छन्दः, नन्दजा शक्तिः, रक्तदन्तिका बीजम्, अग्निस्तत्त्वम्, श्रीमहाकाली प्रीत्यर्थे जपे विनियोगः ।

ध्यानम्

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः ।
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ।
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

श्री मार्कण्डेय उवाच ।
ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥१॥
ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥२॥
ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

....

++ ++ +

....

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥ १८॥
ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये सुरथवैश्यवरप्रदानं नाम त्रयोदशोऽध्यायः ॥

पुटपाठ वा सम्पुटपाठका लागि केही प्रसिद्ध स्तोत्रहरू –

* सबै किसिमका कल्याणका निम्ति –

ॐ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

* विपत्ति समाधानका निम्ति –

ॐशरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥

* सुरक्षित हुनका लागि –

ॐशूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिः स्वनेन च ॥

* विपद्-बाधा शान्तिका लागि –

ॐ सर्वाबाधाप्रशमनं त्रैलोकस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥

* सबै किसिमका बाधा हटी धन-छोरा-छोरी प्राप्तिका लागि -

ॐसर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥

* भय-डर हटाउनका लागि –

(क) ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

(ख) ॐ एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥

(ग) ॐ ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥

* भोग र मोक्ष दुवै पाउनका लागि –
ॐविधेहि देवि कल्याणं विधेहि परमां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥

* पाप नाश भएर भक्ति प्राप्ति होस् भन्ने इच्छा सिद्धिका लागि
ॐ नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥

* स्वर्ग र मोक्ष पाउनका लागि –
ॐ सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥

* स्वर्ग र मुक्तिका लागि –
ॐ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥

* महामारी नाशका लागि –
ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

* निरोगिताका लागि र सौभाग्यका लागि –
ॐ देहि सौभाग्यमारोग्यं देहि मे परमं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥

* सुलक्षणा पत्नी प्राप्तिका लागि –
ॐ पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥

* सिद्धि वा असिद्धि सपनामा थाहा पाउनका निम्ति –

ॐ दुर्गे देवि नमस्तुभ्यं सर्वकामार्थसाधिके ।
मम सिद्धिमसिद्धिं वा स्वप्ने सर्वं प्रदर्शय ॥

* पाप नाशका लागि –

ॐ हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥

* सबै किसिमका शक्ति प्राप्तिका लागि –

ॐसृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥

* प्रसन्नता पाउन र बढाउनका लागि –

ॐप्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।
त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥

* रोग निवारणका लागि –

ॐरोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

* विश्वको रक्षाका लागि –

ॐया श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥

* समस्त विद्या पाई सम्पूर्ण स्त्रीमा मातृभाव हुनका लागि–

ॐ विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥

* दारिद्र्यदुःखादिको अन्त्यका लागि –

ॐदुर्गे स्मृता हरसि भीतिमशेषजन्तोः ।
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ॥
दारिद्र्यदुःखभयहारिणि का त्वदन्या ।
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥

* सबै प्रकारका उन्नतिका लागि –

ॐ ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥

* विश्वव्यापी विपत्तिहरणका लागि –

ॐ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥

* विश्वको पाप र ताप निवारणका लागि –

ॐ देवि प्रसीद परिपालय नोऽरिभीते-
र्नित्यं यथासुरवधादधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाशु
उत्पातपाकजनितांश्च महोपसर्गान् ॥

* संसारकै अशुभ र भय नाशका लागि –

ॐ यस्याः प्रभावमतुलं भगवाननन्तो
ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य मतिं करोतु ॥

* विश्वको उत्थानका लागि –

ॐ विश्वेश्वरि त्वं परिपासि विश्वं
विश्वात्मिका धारयसीति विश्वम् ।
विश्वेशवन्द्या भवती भवन्ति
विश्वाश्रया ये त्वयि भक्तिनम्रा ः॥

* विभिन्न उट्पट्याङ्बाट बच्नका लागि –

ॐ रक्षांसि यत्रोग्रविषाश्च नागा
यत्रारयो दस्युबलानि यत्र ।
दावानलो यत्र तथाब्धिमध्ये
तत्र स्थिता त्वं परिपासि विश्वम् ॥

* मोक्ष प्राप्तिका लागि –

ॐ त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥

* सार्वभौम कल्याण कामनाका लागि –

ॐ देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥

ॐ

श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्यो नमः

अथ पाठः प्रारभ्यते

आचमनम्

ॐ ऐँ आत्मतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ह्रीँ विद्यातत्त्वं शोधयामि नमः स्वाहा ।
ॐ क्लीँ शिवतत्त्वं शोधयामि नमः स्वाहा ।
ॐ ऐँ ह्रीँ क्लीँ सर्वतत्त्वं शोधयामि नमः स्वाहा ।

प्राणायामः

पूरकः – ॐ ऐँ ॥ कुम्भकः – ॐ ह्रीँ ॥ रेचकः – ॐ क्लीँ ॥

देवदेवीनमनम्

ॐ ऋद्धिसिद्धिसहिताय गणनाथाय नमः ।
ॐ श्रीपशुपतये नमः । ॐ श्रीगुह्येश्वर्यै नमः ।

ॐ महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपायै चण्डिकादेव्यै नमः ।
ॐ इष्टदेवीदेवेभ्यो नमः । कुलदेवीदेवेभ्यो नमः ।
ॐ श्रीगुरवे नमः ।

पवित्रधारणम्

ॐ पवित्रे स्थो व्वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः।

प्रतिज्ञासङ्कल्प

ॐ तत्सत् ३ । ॐ विष्णुः ३ । ॐ नमः परमात्मने । श्री पुराण-पुरुषोत्तमस्य विष्णोराज्ञया प्रवर्तमानस्याद्य श्रीब्रह्मणो

द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे प्रथम-चरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गतब्रह्मवर्तैकदेशे पुण्यप्रदेशे बौद्धावतारे वर्तमाने ... संवत्सरे ... अयने ... महामाङ्गल्यप्रदे मासानाम् उत्तमे ... मासे ... पक्षे ... तिथौ .... वासरान्वितायां .....नक्षत्रे .....राशिस्थिते श्रीसूर्ये .... राशिस्थितेषु चन्द्रभौमबुधगुरुशुक्रशनिषु सत्सु शुभे योगे शुभकरणे एवं गुणविषेशणविशिष्टायां शुभपुण्यतिथौ सकलशास्त्रश्रुतिस्मृतिपुराण-आगमोक्तफलप्राप्तिकामः/कामा .... गोत्रोत्पन्नः/गोत्रोत्पन्ना ..... शर्मा /वर्मा/गुप्तः/दास/ देवी अहं ममात्मनःसपुत्रस्त्रीबान्धवस्य श्रीचण्डिकानुग्रहतः सर्वविधपीडा-निवृत्तिपूर्वकं नैरुज्यदीर्घायुः पुष्टिधनधान्यसमृध्यर्थ-श्रीचण्डीकाभगवतीप्रसादेन सर्वाभिष्टफलावाप्तिधर्मार्थकाममोक्ष-चतुर्विधपुरुषार्थसिद्धिद्वारा श्रीमहाकाली-महालक्ष्मी-महासरस्वती-देवताप्रीत्यर्थं शापोद्धारपुरस्सरमर्गलाकीलककवचपाठवेदतन्त्रोक्तरात्रि-सूक्तपाठदेव्यथर्वशीर्षपाठन्यासविधिसहितनवार्ण-जपसप्तशतीन्यासध्यानसहितचरित्रसम्बन्धिविनियोगन्यासध्यानपूर्वकं च "मार्कण्डेय उवाच । सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः"-इत्यारभ्य "सावर्णिर्भविता मनुः" इत्यन्तं सप्तशतीचण्डी पाठं तदन्ते न्यासविधिसहितनवार्णमन्त्रजपं वेदतन्त्रोक्तदेवीसूक्तपाठं रहस्यत्रयपाठादिकं च करिष्ये ।

पुस्तकपूजनम्

ॐ ह्रीं आधारशक्त्यै नमः ।

ॐ चण्डीभक्तिविनोदिनीयुतायै सप्तशत्यै चण्ड्यै नमः ।

योनीमुद्राप्रदर्शनम्

शापोद्धारः

ॐ अस्य श्रीचण्डिकाया ब्रह्मवसिष्ठविश्वामित्रशापविमोचनमन्त्रस्य वसिष्ठनारदसंवादसामवेदाधिपतिब्रह्माण ऋषयः सर्वैश्वर्यकारिणी श्रीदुर्गादेवता चरित्रत्रयं बीजं ह्रीं शक्तिस्त्रिगुणात्मस्वरूपचण्डिकाशापविमुक्तौ मम सङ्कल्पितकार्यसिद्ध्यर्थे जपे विनियोगः ।

ॐ (ह्रीं) रीं रेतः स्वरूपिण्यै मधुकैटभमर्दिन्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१॥ ॐ श्रीं बुद्धि-स्वरूपिण्यै महिषासुरसैन्यनाशिन्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥२॥ ॐ रं रक्तस्वरूपिण्यै महिषासुरमर्दिन्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥३॥ ॐ क्षुं क्षुधा-स्वरूपिण्यै देववन्दितायै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥४॥ ॐ छाँ छायास्वरूपिण्यै दूतसंवादिन्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥५॥ ॐ शँ शक्ति-स्वरूपिण्यै धूम्रलोचनघातिन्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥६॥ ॐ तृं तृषास्वरूपिण्यै चण्डमुण्डवधकारिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥७॥ ॐ क्षाँ क्षान्ति-स्वरूपिण्यै रक्तबीजवधकारिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥८॥ ॐ जाँ जातिस्वरूपिण्यै निशुम्भवधकारिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥९॥ ॐ लँ लज्जा-स्वरूपिण्यै शुम्भवधकारिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१०॥ ॐ शाँ शान्तिस्वरूपिण्यै देवस्तुत्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥११॥ ॐ श्रँ श्रद्धा-स्वरूपिण्यै सकलफलदात्र्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१२॥ ॐ काँ कान्तिस्वरूपिण्यै राजवरप्रदायै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१३॥ ॐ माँ मातृ-

स्वरूपिण्यै अनर्गलमहिमसहितायै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१४॥ ॐ ह्रीं श्रीं दुं दुर्गायै सँ सर्वैश्वर्यकारिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१५॥ ॐ ऐं ह्रीं क्लीं नमः शिवायै अभेद्यकवचस्वरूपिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१६॥ॐ क्रीं काल्यै काली ह्रीं फट् स्वाहायै ऋग्वेदस्वरूपिण्यै ब्रह्मवसिष्ठविश्वामित्रशापाद् विमुक्ता भव ॥१७॥ ॐ ऐं ह्रीं क्लीं महाकालीमहालक्ष्मीमहासरस्वतीस्वरूपिण्यै त्रिगुणात्मिकायै चण्डिकादेव्यै नमः ॥१८॥

इत्येवं हि महामन्त्रान् पठित्वा परमेश्वर ।
चण्डीपाठं दिवारात्रौ कुर्यादेव न संशयः ॥ १९ ॥
एवं मन्त्रं न जानाति चण्डीपाठं करोति यः ।
आत्मानं चैव दातारं क्षीणं कुर्यान्न संशयः ॥ २० ॥



अथ सप्तश्लोकी चण्डी

शिव उवाच

देवी त्वं भक्तसुलभे सर्वकार्यविधायिनी ।
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः ॥

देव्युवाच

श्रृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् ।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ॥

ॐ अस्य श्रीचण्डीसप्तश्लोकीस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः श्रीचण्डीप्रीत्यर्थं सप्तश्लोकीचण्डीपाठे विनियोगः ।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥१॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ॥२॥

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते ॥३॥

शरणागतदीनार्तपरित्राणपरायणे ।

सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तुते ॥४॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तुते ॥५॥

रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान्।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥६॥

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ॥७॥

इति श्रीसप्तश्लोकी चण्डी सम्पूर्णा ॥



अर्गलास्तुतिः

ॐ अस्य श्रीअर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीर्देवता, श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

मार्कण्डेय उवाच

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥
मधुकैटभविद्राविविधातृवरदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
महिषासुरनिर्णाशि भक्तानां सुखदे नमः ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
चण्डमुण्डवधे देवि रक्तबीजविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
शुम्भश्चैव निशुम्भश्च सर्वदैत्यनिपातिनि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
वन्दिताङ्घ्रियुगे देवि देवि सौभाग्यदायिनि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
अचिन्त्यरूपचरिते सर्वशत्रुनिवारिणि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥

नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
देहि सौभाग्यमारोग्यं देहि देवि परं सुखम् ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
विधेहि देवि कल्याणं विधेहि विपुलां श्रियम् ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
विधेहि द्विषतां नाशं विधेहि बलमुच्चकैः ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
सुरासुरशिरोरत्ननिघृष्टचरणोऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
प्रचण्डदैत्यदर्पघ्ने चण्डिके प्रणताय मे ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
चतुर्भुजे चतुर्वक्त्रे संस्तुते परमेश्वरि ।

रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या त्वमम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
हिमाचलसुतानाथसंस्तुते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
इन्द्राणीपतिसद्भावपूजिते परमेश्वरि ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके ।
रूपं देहि जयं देहि यशो देहि द्विषं जहि ॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥
इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः ।
स च सप्तशतीसङ्ख्यावरमाप्नोति सम्पदम् ।

इत्यर्गलास्तुतिः ।

अथ कीलकस्तुतिः

ॐ अस्य श्रीकीलकस्तोत्रमन्त्रस्य शिवऋर्षिः, अनुष्टुप् छन्दः, श्रीमहासरस्वतीदेवता, श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

श्रीमार्कण्डेय उवाच

विशुद्धज्ञानदेहाय त्रिवेदीदिव्य चक्षुषे ।
श्रियः प्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥
सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकम् ।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः ॥
सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि ।
एतेन स्तुवतां देवीं स्तोत्रवृन्देन सर्वदा ॥
न मन्त्रं नौषधं तत्र न किञ्चिदपि विद्यते ।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम् ॥
समग्राण्यपि सेत्स्यन्ति लोकशङ्कामिमां हर ।
कृत्वानिमन्त्रयामास सर्वमेवमिदं शुभम् ॥
स्तोत्रं वै चण्डिकायास्तु यच्च गुह्यं चकार सः ।
समाप्नोति सुपुण्येन तां यथावन्नियन्त्रणाम् ॥
सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः ।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः ॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसिद्धयति ।
इत्थंरूपेण कीलेन महादेवेन कीलितम् ॥
यो निष्कीलांविधायैनां नित्यं जपति संस्फुटम् ।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते रणे ॥
न चैवाप्यटतस्तस्य भयं क्वापि न जायते ।
नापि मृत्युवशं याति ततो मोक्षमवाप्नुयात् ॥
ज्ञात्वा प्रारभ्य कुर्वीत अकुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः ॥
सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजनैः ।
तत्सर्वं त्वत्प्रसादेन तेन जाप्यमिदं शुभम् ॥
शनैस्तु जाप्यमानेऽस्मिन् स्तोत्रे संपत्तिरूच्चकैः ।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् ॥
ऐश्वर्यं यत्प्रसादेन सौभाग्याऽरोग्यसम्पदः ।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः ॥
चण्डिकां हृदयेनापि यः स्मरेत् सततं नरः ।
स्मृत्वा कामानवाप्नोति हृदि देव्याः सदा विशेत् ॥
अग्रतो यं महादेवि कृत्वा कीलितकारणम् ।
निष्कीलं च यथा कृत्वा पठितव्यं समाहितैः ॥
प्रथमं पठ्यते देव्याः स्नात्वा चैव शुभं भवेत् ।
शुचिर्देव्या महाभक्त्या येनाभिष्टफलं लभेत् ॥

इति कीलकस्तुतिः ।

अथ कवचम्

ॐ अस्य श्रीचण्डीकवचस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीचामुण्डादेवता, अङ्गन्यासोक्तमातरो बीजम्, दिग्बन्धदेवतास्तत्त्वम्, श्रीजगदम्बाप्रीतये सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

मार्कण्डेय उवाच

यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् ।
यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह ॥

श्रीब्रह्मोवाच

अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम् ।
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने ॥
प्रथमं शैलपुत्री च द्वितीयं ब्रह्मचारिणी ।
तृतीयं चन्द्रघण्टा च कुष्माण्डा च चतुर्थकम् ॥
पञ्चमं स्कन्दमातेति षष्ठं कात्यायनीति च ।
सप्तमं कालरात्री च महागौरीति चाष्टमम् ॥
नवमं सिद्धिदात्रीति नवदुर्गाः प्रकीर्तिताः ।
उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ॥
अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे ।
विषमे दुर्गमे चैव भयार्ताः शरणं गताः ॥
न तेषां जायते किञ्चिदशुभं रणसङ्कटे ।

नापदं तस्य पश्यामि शोकदुःखभयं न च ॥
यैस्तु भक्त्या स्मृता नूनं तेषामृद्धिः प्रजायते ।
प्रेतसंस्था तु चामुण्डा वाराही महिषासना ॥
ऐन्द्री गजसमारूढा वैष्णवी गरुडासना ।
माहेश्वरी वृषारूढा कौमारी शिखिवाहना ॥
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता ।
लक्ष्मीः पद्मासना देवी पद्महस्ता हरिप्रिया ॥
श्वेतरूपधरा देवी ईश्वरी वृषवाहना ।
इत्येता मातरः सर्वाः सर्वयोगसमन्विताः ॥
नानाभरणशोभाढ्या नानारत्नोपशोभिताः ।
श्रेष्ठैश्च मौक्तिकैःसर्वैर्दिव्यहारप्रलम्बिभिः ॥
इन्द्रनीलैर्महानीलैः पद्मरागैः सुशोभनैः ।
दृश्यते रथमारूढा देव्यः क्रोधसमाकुलाः ॥
शङ्खंचक्रं गदां शक्तिं हलं च मुशलायुधम् ।
खेटकं तोमरं चैव परशुं पाशमेव च ॥
कुन्तायुधं च खड्गं च सारङ्गायुधमुत्तमम् ।
खड्गं चर्म त्रिशूलं च पट्टिशं मुद्गरं तथा ॥
दैत्यानां देहनाशाय भक्तानामभयाय च ।
धारयन्त्यायुधानीत्थं देवानां च हिताय वै ॥
नमस्तेऽस्तु महावीर्ये महाघोरपराक्रमे ।
महाबले महोत्साहे महाभयविनाशिनि ॥
त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि ।

प्राच्यां रक्षतु माहेन्द्री आग्नेयां मेषवाहिनी ॥
दक्षिणे चैव वाराही नैऋत्यां खड्गधारिणी ।
प्रतीच्यां वारुणी रक्षेद् वायव्यां मृगवाहिनी ॥
उदीच्यां पातुकौबेरी ईशान्यां शूलधारिणी ।
ऊर्ध्वं ब्रह्माणी मे रक्षेदधस्ताद् वैष्णवी तथा ॥
एवं दश दिशो रक्षेच्चामुण्डा शववाहना ।
जया मे चाग्रतः पातु विजया पातु पृष्ठतः ॥
अजिता वामपार्श्वे तु दक्षिणे चापराजिता ।
शिखां मे द्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता ॥
मालाधरी ललाटे तु भ्रुवौ रक्षेद्यशस्विनी ।
त्रिनेत्रा च भ्रुवोर्मध्ये यमघण्टा च नासिके ॥
शङ्खिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी ।
कपोलौ कालिका रक्षेत्कर्णमूले तु शाङ्करी ॥
नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका ।
अधरे चामृतकला जिह्वायां च सरस्वती ॥
दन्तान् रक्षेत्तु कौमारी कण्ठमध्ये तु चण्डिका ॥
घण्टिकां चित्रघण्टा च महामाया च तालुके ॥
कामाक्षा चिबुकं रक्षेद् वाचं मे सर्वमङ्गला ।
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी ॥
नीलग्रीवा बहिःकण्ठे नलिकां नलकूवरी ।
खड्गधारिण्युभौ स्कन्धौ बाहू मे वज्रधारिणी ॥
हस्तौ तु दण्डिनी रक्षेदम्बिका चाङ्गुलीषु च ।

नखांस्थूलेश्वरी रक्षेत्कुक्षौ रक्षेत्कुलेश्वरी ॥
स्तनौ रक्षेन्महादेवी मनः शोकविनाशिनी ।
हृदये ललितादेवी उदरे शूलधारिणी ॥
नाभौ च कामिनी रक्षेद् गुह्यं गुह्येश्वरी तथा ।
मेढ्रे च रक्षेद्दुर्गन्धा कट्यां भगवती तथा ॥
भूतनायक मेढ्रं च ऊरु च मेषवाहना ।
जङ्घे महाबला प्रोक्ता सर्वकामप्रदायिनी ॥
गुल्फयोर्नारसिंही च पादपृष्ठे मितौजसी ।
पादाङ्गुलीषु श्री रक्षेत् पादाधः स्थलवासिनी ॥
दंष्ट्राकरालिनी रक्षेत्केशांश्चैवोर्ध्वकेशिनी ।
रोमकूपानि कौबेरी त्वचं वागीश्वरी तथा ॥
रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती ।
अङ्गानि कालरात्री च पित्तं च मुकुटेश्वरी ॥
पद्मावती पद्मकोशे कफे चूडामणिस्तथा ।
ज्वालामुखी नखज्वालामभेद्या सर्वसन्धिषु ॥
शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा ।
अहङ्कारं मनोबुद्धिं रक्षेन्मे धर्मधारिणी ॥
प्राणापानौ तथा व्यानमुदानं च समानकम् ।
वज्रहस्ता च मे रक्षेत्प्राणकल्पं च शोभना ॥
रसे रूपे च गन्धे च शब्दे स्पर्शे च योगिनी ।
सत्त्वं रजस्तमश्चैव रक्षेन्नारायणी सदा ॥

आयू रक्षतु वाराही धर्मं रक्षतु वैष्णवी ।

यशः कीर्तिञ्च लक्ष्मीं च सदा रक्षन्तु मातरः ॥
गोत्रमिन्द्राणि मे रक्षेत्पशून् मे रक्ष चण्डिके ।
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ॥
मार्गं क्षेमङ्करी रक्षेद् विजया सर्वतः स्थिताः ।
सर्वरक्षाकरं पुण्यं कवचं सर्वदा जयेत् ॥
इदं रहस्यं परमं भक्त्या तव मयोदितम् ।
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु ॥
तत्सर्वं रक्ष मे देवि दुर्गे दुर्गार्तिहारिणि ।
पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ॥
कवचेनाऽवृतो नित्यं यत्र यत्राभिगच्छति ।
तत्रतत्रार्थलाभश्च विजयः सार्वकालिकः ॥
यं यं चिन्त्ययते कामं तं तं प्राप्नोति लीलया ।
परमैश्वर्यमतुलं प्राप्नोत्यविकलः पुमान् ॥
निर्भयो जायते मर्त्यः सङ्ग्रामेष्वपराजितः ।
त्रैलोक्ये तु भवेत्पूज्य कवचेनाऽऽवृतो हि यः ॥
इदं तु देव्याः कवचं देवानामपि दुर्लभम् ।
यः पठेत् प्रयतो नित्यं त्रिसन्ध्यं श्रद्धयान्वितः ॥
दैवी कला भवेत्तस्य त्रैलोक्ये चाऽपराजितः ।
जीवेद् वर्षशतं साग्रमल्पमृत्युविवर्जितः ॥
नश्यन्ति व्याधयः सर्वे लूताविस्फोटकादयः ।
स्थावरं जङ्गमं वाऽपि कृत्रिमं चापि यद्विषम् ॥

अभिचाराणि सर्वाणि मन्त्रयन्त्राणि भूतले ।

भूचराः खेचराश्चैव कुलजाश्चोपदेशिकाः ॥
सहजा कुलजा माला डाकिनी शाकिनी तथा ।
अन्तरिक्षचरा घोरा डाकिन्यश्चमहाबलाः ॥
ग्रहभूतपिशाचाश्च यक्षगन्धर्वराक्षसाः ।
ब्रह्मराक्षसवेतालाः कुष्माण्डा भैरवादयः ॥
नश्यन्ति दर्शनात्तस्य कवचे हृदि संस्थिते ।
मानोन्नतिर्भवेद् राज्ञस्तेजोवृद्धिकरं परम् ॥
यशोवृद्धिर्भवेत्पुंसः कीर्तिर्वृद्धिश्च जायते ।
तस्माज्जपेत्सदा भक्त्या कवचं कामदं मुने ॥
जपेत्सप्तशतीं चण्डीं कृत्वा कवचमादितः ।
निर्विघ्नेन भवेत्सिद्धिश्चण्डी जपसमुद्भवा ॥
यावद्भूमण्डलं धत्ते सशैलवनकाननम् ।
तावत्तिष्ठति मेदिन्यां सन्ततिः पुत्रपौत्रकी ॥
प्राप्नोति परमं स्थानं यत्सुरैरपि दुर्लभम् ।
प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ॥
तत्पदं समवाप्नोति यावदाभूतसंप्लवः ।
ब्रह्मणा निर्मितं ह्येतत् कवचं वज्रसंमितम् ॥
त्रिसन्ध्यं कीर्तयेद्यस्तु प्राप्नोति परमां गतिम् ।

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
हरिहरब्रह्मादिविरचितं श्रीदेव्याः कवचं सम्पूर्णम् ।

अथ वेदोक्तं रात्रिसूक्तम्[1]

ॐ रात्रीत्याद्यष्टर्चस्य सूक्तस्य कुशिकः सौभरो रात्रिर्वा भारद्वाजो ऋषिः, रात्रिर्देवता, गायत्री छन्दः, देवीमाहात्म्यपाठे विनियोगः ।

ॐ रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः ।
विश्वा अधि श्रियोऽधित ॥१

ओर्वप्रा अमर्त्यानिवतो देव्युद्वतः ।
ज्योतिषा बाधते तमः ।२

निरु स्वसारमस्कृतोषसं देव्यायती ।
अपेदु हासते तमः ॥३

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि ।
वृक्षे न वसतिं वयः ॥४

नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ।
नि श्येनासश्चिदर्थिनः ॥५

यावया वृक्यं वृकं यवय स्तेनमूर्म्ये ।
अथा नः सुतरा भव ॥६

उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित ।
उष ऋणेव यातय ॥७

उप ते गा इवाकरं वृणीष्व दुहितर्दिवः ।
रात्रि स्तोमं न जिग्युषे ॥८

---

1 ऋग्वेदः मं १०, अ. १०, सू. १२७ मन्त्रसङ्ख्या १ ८

अथ तन्त्रोक्तं रात्रिसूक्तम्

ब्रह्मोवाच

ॐ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।
स्तौमि निद्रां भगवतीं विष्णोरतुलतेजसः[२] ॥१॥
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका ।
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥२॥
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ।
त्वमेव सन्ध्या[३] सावित्री त्वं देवि जननी[४] परा ॥३॥
त्वयैतद्धार्यते विश्वं[५] त्वयैतत्सृज्यते जगत् ।
त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥५॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोऽस्य जगन्मये ॥६॥
महाविद्या महामाया महामेधा महास्मृता[६] ।
महामोहा च भवती[७] महादेवी महासुरी[८] ॥७॥
महामारी महावीरा महाहिकृतभूषणा ।
महामाया महाचण्डी महादेवानुसेविनी ॥८॥

---

२ निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः इति पाठान्तरम् ।
३ सा त्वं इति पाठान्तरम् ।
४ देवजननी इति चतुर्धरीपाठः ।
५ त्वयैतद्धार्यते सर्वं इति पाठान्तरम् ।
६ महास्मृतिः इति पाठान्तरम् ।
७ भगवती इति पाठान्तरम् ।
८ महेश्वरी इति पाठान्तरम् ।

प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥९॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टि स्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥१०॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणा भुशुण्डीपरिघायुधा[९] ॥११॥
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥१२॥
यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य या शक्ति सा त्वं किं स्तूयसे सदा[१०] ॥१३॥
यया त्वया जगत्स्रष्टा जगत्पात्यत्ति[११] यो जगत् ।
साऽपि[१२] निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥१४॥
विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥१५॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयेतौ दुराधर्षावसुरौ मधुकैटभौ ॥१६॥
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।
बोधस्य क्रियतामस्य हन्तुमेतौ महासुरौ ॥१७॥

इति रात्रिसूक्तम्



९ वाणभुशुण्डीपरिधायुधा इति पाठान्तरम् ।
१० तदा/मया इति पाठान्तरम् ।
११ जगत्पातात्ति इति पाठान्तरम् ।
१२ सोऽपि इति पाठान्तरम् ।

श्रीदेव्याथर्वशीर्षम्

ॐ सर्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवीति ॥१॥

साब्रवीत् –

अहं ब्रह्मस्वरूपिणी । मत्तः प्रकृतिपुरुषात्मकं जगत् । शून्यं चाशून्यं च ॥२॥

अहमानन्दानानन्दौ । अहं विज्ञानाविज्ञाने । अहं ब्रह्माब्रह्मणी वेदितव्ये । अहं पञ्चभूतान्यपञ्चभूतानि । अहमखिलं जगत् ॥३॥

वेदोऽहमवेदोऽहम् । विद्याहमविद्याहम् । अजाहमनजाहम् । अधश्चोर्ध्वं च तिर्यक्चाहम् ॥ ४ ॥

अहं रुद्रेभिर्वसुभिश्चरामि । अहमादित्यैरुत विश्वदेवैः । अहं मित्रावरुणावुभौ बिभर्मि । अहमिन्द्राग्नी । अहमश्विनावुभौ ॥५॥

अहं सोमं त्वष्टारं पूषणं भगं दधामि । अहं विष्णुमुरुक्रमं ब्रह्माणमुत प्रजापतिं दधामि ॥६॥

अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते । अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् । अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे । य एवं वेद । स दैवीं सम्पदमाप्नोति ॥७॥

ते देवा अब्रुवन् –

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नम प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ॥८॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणं प्रपद्यामहेऽसुरान्नाशयित्र्यै ते नमः ॥९॥
देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥१०॥
कालरात्रीं ब्रह्मस्तुतां वैष्णवीं स्कन्दमातरम् ।
सरस्वतीमदितिं दक्षदुहितरं नमामः पावनां शिवाम् ॥११॥
महालक्ष्म्यै च विद्महे सर्वशक्त्यै च धीमहि ।
तन्नो देवी प्रचोदयात् ॥१२॥
अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ।
तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥१३॥
कामो योनिः कमला वज्रपाणिर्गुहा हसा
मातरिश्वाभ्रमिन्द्रः ।
पुनर्गुहा सकला मायया च पुरूच्यैषा विश्वमातादिविद्योम् ॥१४॥
एषाऽऽत्मशक्तिः । एषा विश्वमोहिनी । पाशाङ्
कुशधनुर्बाणधरा । एषा श्रीमहाविद्या । य एवं वेद स
शोकं तरति ॥१५॥
नमस्ते अस्तु भगवति मातरस्मान् पाहि सर्वतः ॥१६॥
सैषाष्टौ वसवः । सैषैकादश रुद्राः । सैषा द्वादशादित्याः ।

सैषा विश्वेदेवाः सोमपा असोमपाश्च। सैषा
यातुधाना असुरा रक्षांसि पिशाचा यक्षाः सिद्धाः।
सैषा सत्त्वरजस्तमांसि। सैषा ब्रह्मविष्णुरुद्ररूपिणी।
सैषा प्रजापतीन्द्रमनवः। सैषा ग्रहनक्षत्रज्योतींषि।
कलाकाष्ठादिकालरूपिणी। तामहं प्रणौमि नित्यम्॥
पापापहारिणीं देवीं भुक्तिमुक्तिप्रदायिनीम्।
अनन्तां विजयां शुद्धां शरण्यां शिवदां शिवाम्॥१७॥
वियदीकारसंयुक्तं वीतिहोत्रसमन्वितम्।
अर्धेन्दुलसितं देव्या बीजं सर्वार्थसाधकम्॥१८॥
एवमेकाक्षरं ब्रह्म यतयः शुद्धचेतसः।
ध्यायन्ति परमानन्दमया ज्ञानाम्बुराशयः॥१९॥
वाङ्माया ब्रह्मसूस्तस्मात् षष्ठं वक्त्रसमन्वितम्।
सूर्योऽवामश्रोत्रबिन्दुसंयुक्तष्टात्तृतीयकः।
नारायणेन सम्मिश्रो वायुश्चाधरयुक् ततः।
विच्चे नवार्णकोऽर्णः स्यान्महदानन्ददायकः॥२०॥
हृत्पुण्डरीकमध्यस्थां प्रातः सूर्यसमप्रभाम्।
पाशाङ्कुशधरां सौम्यां वरदाभयहस्तकाम्।
त्रिनेत्रां रक्तवसनां भक्तकामदुघां भजे॥२१॥
नमामि त्वां महादेवीं महाभयविनाशिनीम्।
महादुर्गप्रशमनीं महाकारुण्यरूपिणीम्॥२२॥
यस्याः स्वरूपं ब्रह्मादयो न जानन्ति तस्मादुच्यते अज्ञेया।
यस्या अन्तो न लभ्यते तस्मादुच्यते अनन्ता। यस्या लक्ष्यं
नोपलक्ष्यते तस्मादुच्यते अलक्ष्या। यस्या जननं नोपलभ्यते

तस्मादुच्यते अजा। एकैव सर्वत्र वर्तते तस्मादुच्यते एका। एकैव विश्वरूपिणी तस्मादुच्यते नैका। अत एवोच्यते अज्ञेयानन्तालक्ष्याजैकानैकेति ॥२३॥

मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता[13] शून्यानां शून्यसाक्षिणी।
यस्याः परतरं नास्ति सैषा दुर्गा प्रकीर्तिता ॥२४॥

तां दुर्गां दुर्गमां देवीं दुराचारविघातिनीम्।
नमामि भवभीतोऽहं संसारार्णवतारिणीम् ॥२५॥

इदमथर्वशीर्षं योऽधीते स पञ्चाथर्वशीर्षजपफलमाप्नोति। इदमथर्वशीर्षमज्ञात्वा योऽर्चां स्थापयति –शतलक्षं प्रजप्त्वापि सोऽर्चासिद्धिं न विन्दति। शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः।

दशवारं पठेद् यस्तु सद्यः पापैः प्रमुच्यते।
महादुर्गाणि तरति महादेव्याः प्रसादतः ॥२६॥

सायमधीयानो दिवसकृतं पापं नाशयति। प्रातरधीयानो रात्रिकृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो अपापो भवति। निशीथे तुरीयसंध्यायां जप्त्वा वाक्सिद्धिर्भवति। नूतनायां प्रतिमायां जप्त्वा देवतासान्निध्यं भवति। प्राणप्रतिष्ठायां जप्त्वा प्राणानां प्रतिष्ठा भवति। भौमाश्विन्यां महादेवीसन्निधौ जप्त्वा महामृत्युं तरति। स महामृत्युं तरति य एवं वेद। इत्युपनिषत् ॥

इति श्रीदेव्याथर्वशीर्षम्



---

१३ चिन्मयानन्दा इति पाठान्तरम्।

अथ नवार्णविधिः

विनियोगः

श्रीगणपतिर्जयति । ॐ अस्य श्रीनवार्णमन्त्रस्य ब्रह्माविष्णुरुद्रा ऋषयः, गायत्र्युष्णिगनुष्टुभ्छन्दांसि, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, ऐँ बीजम्, ह्रीँ शक्तिः, क्लीँ कीलकम् , श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थे जपे विनियोगः ॥

ऋष्यादिन्यासः

ब्रह्मविष्णुरुद्रऋषिभ्यो नमः - शिरसि ।

गायत्र्युष्णिगनुष्टुप्छन्देभ्यो नमः - मुखे ।

महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः - हृदि ।

ऐँ बीजाय नमः - गुह्ये ।

ह्रीँ शक्तये नमः - पादयोः ।

क्लीँ कीलकाय नमः - नाभौ ।

करन्यासः

"ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे" इति मूलेन करौ संशोध्य–

ॐ ऐँ अङ्गुष्ठाभ्यां नमः । ॐ ह्रीँ तर्जनीभ्यां नमः ।

ॐ क्लीँ मध्यमाभ्यां नमः । ॐ चामुण्डायै अनामिकाभ्यां नमः ।

ॐ विच्चे कनिष्ठिकाभ्यां नमः । ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः

ॐ ऐँ हृदयाय नमः । ॐ ह्रीँ शिरसे स्वाहा ।

ॐ क्लीँ शिखायै वषट् । ॐ चामुण्डायै कवचाय हुम् ।

ॐ विच्चे नेत्रत्रयाय वौषट् । ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे अस्त्राय फट् ।

अक्षरन्यासः

ॐ ऐं नमः– शिखायाम् । ॐ ह्रीं नमः–दक्षिणनेत्रे ।
ॐ क्लीं नमः– वामनेत्रे । ॐ चाँ नमः–दक्षिणकर्णे ।
ॐ मुँ नमः– वामकर्णे । ॐ डाँ नमः– दक्षिणनासापुटे ।
ॐ यैँ नमः–वामनासापुटे । ॐ विँ नमः– मुखे ।
ॐ च्चैँ नमः–गुह्ये ॥
"एवं विन्यस्याष्टवारं मूलेन व्यापकं कुर्यात् "

दिङ्न्यासः

ॐ ऐँ प्राच्यै नमः । ॐ ऐँ आग्नेय्यै नमः ।
ॐ ह्रीँ दक्षिणायै नमः । ॐ ह्रीँ नैऋत्यै नमः ।
ॐ क्लीँ प्रतीच्यै नमः । ॐ क्लीँ वायव्यै नमः ।
ॐ चामुण्डायै उदीच्यै नमः । ॐ चामुण्डायै ऐशान्यै नमः ।
ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे उर्ध्वायै नमः ।
ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे भूम्यै नमः ॥

ध्यानम्

खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः ।
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ।
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥

अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकाम् ।
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननाम ।
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकम् ।
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥३॥



नवार्णजपः

ऐँ ह्रीँ अक्षमालिकायै नम इति मन्त्रेण मालिकां सम्पूज्य प्रार्थना च विधेया –

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे ।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये ॥

ॐ अक्षमालाधिपतये सुसिद्धिं देहि देहि सर्वमन्त्रार्थसाधिनि साधय साधय सर्वसिद्धिं परिकल्पय परिकल्पय मे स्वाहा ॥

तदनन्तरमष्टोत्तरशतमष्टोत्तरसहस्रं वा मूलमन्त्रं
(ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे)जपेत् ।

जपसमर्पणम्

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ।

पुनर्न्यासः

आदौ करन्यासः

ॐ ह्रीँ अङ्गुष्ठाभ्यां नमः । ॐ चँ तर्जनीभ्यां नमः ।

ॐ डिँ मध्यमाभ्यां नमः । ॐ काँ अनामिकाभ्यां नमः ।
ॐ यैँ कनिष्ठिकाभ्यां नमः । ॐ ह्रीँ चण्डिकायै करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः

ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी वाणभुशुण्डीपरिघायुधा – हृदयाय नमः ॥
ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिः स्वनेन च – शिरसे स्वाहा ॥
ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि – शिखायै वषट् ॥
ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् – कवचाय हुम् ॥
ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः – नेत्रत्रयाय वौषट्
ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते – अस्त्राय फट् ॥

ध्यानम्

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणाम् ।
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीम् ।
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

इति नवार्णविधिः





ॐ

प्रथमोऽध्यायः

अस्य श्रीचण्डिकासप्तशतीप्रथमचरित्रस्य ब्रह्मा ऋषिः, महाकाली देवता, गायत्रीच्छन्दः, नन्दजा शक्तिः, रक्तदन्तिका बीजम्, अग्निस्तत्त्वम्, ऋग्वेदः स्वरूपं श्रीमहाकाली प्रीत्यर्थे प्रथमचरित्रजपे विनियोगः।

ध्यानम्

ॐ खड्गं चक्रगदेषुचापपरिघाञ्छूलं भुशुण्डीं शिरः ।
शङ्खं सन्दधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ।
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥

श्रीमार्कण्डेय उवाच

सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं विस्तराद् गदतो मम ॥१॥
महामायानुभावेन यथा मन्वन्तराधिपः ।
स बभूव महाभागः सावर्णिस्तनयो रवेः ॥२॥
स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः ।
सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ॥३॥
तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् ।
बभूवुः शत्रवो भूपाः कोलाविध्वंसिनस्तदा[१४] ॥४॥

१४ तथा इति पाठान्तरम् ।

तस्य तैरभवद् युद्धमतिप्रबलदण्डिनः ।
न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितम्[१५] ॥५॥
ततः स्वपुरमायातो निजदेशाधिपोऽभवत् ।
आक्रान्तः स महाभागस्तैस्तदा प्रबलारिभिः ॥६॥
अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः ।
तनयैस्तु महावीर्यैर्वैरिपक्षगसंगतैः ॥७॥+[१६]
कोशो बलं चापहृतं तत्रापि स्वपुरे ततः[१७] ।
ततो मृगयाव्याजेन हतस्वाम्यः[१८] स भूपतिः ॥८॥
एकाकी हयमारुह्य जगाम गहनं वनम् ।
स तत्राश्रममद्राक्षीद् द्विजवर्यस्य मेधसः[१९] ॥९॥
प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितम् ।
तस्थौ किञ्चित्स[२०] कालं च मुनिना तेन सत्कृतः ॥१०॥
इतश्चेतश्च विचरंस्तस्मिन् मुनिवराश्रमे ।
सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः[२१] ॥११॥
ममत्वं चाभवत्तस्य प्रयुक्तं विष्णुमायया ।+
कथं नु वर्तते राज्यं बलादपहृतं परैः ॥१२॥+
मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ।

---

१५ कोलाविध्वंसिभिर्जितः इति पाठान्तरम् ।
१६ पाठोऽयं ("+") ग्रन्थेऽस्मिन् अधिकः पठितः ।
१७ सतः इति पाठान्तरम् ।
१८ हृतस्वाम्यः इति पाठानतरम् ।
१९ द्विजवर्यः सुमेधसः इति मार्कण्डेयपुराणस्थः पाठः ।
२० कंचित्स इति पाठान्तरम् ।

२१ ममत्वाकृष्टचेतनः इति पाठान्तरम् ।

मद्भृत्यैस्तैरसद्वृत्तैर्धर्मतः पाल्यते न वा ॥१३॥
न जाने स प्रधानो[२२] मे शूरहस्ती सदामदः ।
मम वैरिवशं यातः कान् भोगानुपलप्स्यते ॥१४॥
ये ममानुगता नित्यं प्रसादधनभोजनैः ।
अनुवृत्तिं ध्रुवं तेऽद्य कुर्वन्त्यन्यमहीभृताम् ॥१५॥
असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययम् ।
सञ्चितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति ॥१६॥
मम भार्या वरारोहा पुत्राश्चातीवशोभनाः ।+
सद्मानि स्वर्गसदृशान्यप्सरः प्रतिमाःस्त्रियः ॥१७॥+
एतच्चान्यच्च सततं चिन्तयामास पार्थिवः ।
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः ॥१८॥
स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः ।
सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे ॥१९॥
तत्त्वमाख्याहि भद्रं ते यत्ते मनसि वर्तते ।+
भयमत्र न तेऽप्यस्ति यः शोकः स च नश्यति ॥२०॥ +
इत्याकर्ण्य वचस्तस्य भूपतेः प्रणयोदितम् ।
प्रत्युवाच स तं वैश्यः प्रश्रयावनतो नृपम् ॥२१॥

वैश्य उवाच

समाधिर्नाम वैश्योऽहमुत्पन्नो धनिनां कुले ।

२२ सुप्रधानो इति मार्कण्डेयपुराणस्थः पाठः ।

पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः ॥२२॥
विहीनः स्वजनैर्दारैः[२३] पुत्रैरादाय[२४] मे धनम् ।
वनमभ्यागतो दुःखी निरस्तश्चाप्तबन्धुभिः ॥२३॥
सोऽहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकाम् ।
प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः ॥२४॥
किन्नु[२५] तेषां गृहे क्षेममक्षेमं किं नु साम्प्रतम् ।
कथं ते किन्नु[२६] सद्वृत्ता दुर्वृत्ताः किं नु मे सुताः ॥२५॥

राजोवाच

यैर्निरस्तो भवाँल्लुब्धैः पुत्रदारादिभिर्धनैः ।
तेषु किं भवतः स्नेहमनुबध्नाति मानसम् ॥२६॥

वैश्य उवाच

एवमेतद्यथा प्राह भवानस्मद्गतं[२७] वचः ।
किं करोमि न बध्नाति मम निष्ठुरतां मनः ॥२७॥
यैः सन्त्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः ।
पतिस्वजनहार्दं च हार्दि तेष्वेव मे मनः ॥२८॥
किमेतन्नाभिजानामि जानन्नपि महामते ।

---

२३ विहीनश्च धनैर्दारैः इति पाठान्तरम् ।
२४ रादायि इति शान्तनवीस्थः पाठः ।
२५ किं नु इति पाठान्तरम् ।
२६ किं नु इति पाठान्तरम् ।
२७ भवान्यस्मद्गतं इति शान्तनवीस्थः पाठः ।

यत्प्रेमप्रबलं[२८] चित्तं विगुणेष्वपि बन्धुषु ॥२९॥
तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते ।
करोमि किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरम्[२९] ॥३०॥

श्रीमार्कण्डेय उवाच

ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ ।
समाधिर्नाम वैश्योऽसौ स च पार्थिवसत्तमः ॥३१॥
कृत्वा तु तौ यथा न्यायं यथार्हं तेन संविदम् ।
उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ ॥३२॥

राजोवाच

भगवँस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् ।
दुःखाय यन्मे मनसः स्वचित्तायत्ततां विना ॥३३॥
ममत्वं मम राज्यस्य[३०] राज्याङ्गेष्वखिलेष्वपि ।
जानतोऽपि यथाऽज्ञस्य किमेतन्मुनिसत्तम ॥३४॥
अयं च निकृतः[३१] पुत्रैर्दारैर्भृत्यैस्तथोज्झितः ।
स्वजनेन च संत्यक्तस्तेषु हार्दी तथाप्यति ॥३५॥
एवमेष तथाहं च द्वावप्यत्यन्त दुःखितौ ।
दृष्टदोषेऽपि विषये ममत्वाकृष्टमानसौ ॥३६॥

---

२८ यत्प्रेमप्रवणम् इति पाठान्तरम् ।
२९ अप्रीतिसुनिष्ठुरम् इति चतुर्धरीगृहीतः पाठः ।
३० गतराज्यस्य इति पाठान्तरम् ।
३१ निष्कृत इति पाठान्तरम् ।

तत्केनैतन्महाभाग[३२] यन्मोहो ज्ञानिनोरपि ।
ममास्य च भवत्येषा विवेकान्धस्य मूढता ॥३७॥

ऋषिरुवाच

ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे ।
विषयश्च[३३] महाभागजातिश्चैवं[३४] पृथक्पृथक्॥३८॥
दिवान्धाः प्राणिनः केचिद् रात्रावन्धास्तथाऽपरे ।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ॥३९॥
ज्ञानिनो मनुजाः सत्यं किन्नु[३५] ते न हि केवलम् ।
यतो हि ज्ञानिनः सर्वे पशुपक्षिमृगादयः ॥४०॥
ज्ञानं च[३६] तन्मनुष्याणां यत्तेषां मृगपक्षिणाम् ।
मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ॥४१॥
ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु ।
कणमोक्षादृतान्मोहात् पीड्यमानानपि क्षुधा॥४२॥
मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति ।
लोभात्प्रत्युपकाराय नन्वेते[३७] किन्न पश्यति[३८] ॥४३॥
तथाऽपि ममतावर्ते मोहगर्ते निपातिताः ।

---

३२ तत्किमेतन्महाभाग इति पाठान्तरम् ।
३३ विषयाश्च इति पाठान्तरम् ।
३४ यान्ति, याति, यतिश्चैवं इति पाठान्तरम् ।
३५ किन्तु इति पाठान्तरम् ।
३६ न इति मार्कण्डेयपुराणस्थः पाठः ।
३७ नन्वेतान् इति पाठान्तरम् ।
३८ पश्यसि इति पाठान्तरम् ।

महामायाप्रभावेण संसारस्थितिकारिणः[३९] ॥४४॥
तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः ।
महामाया हरेश्चैषा तया सम्मोह्यते जगत् ॥४५॥
ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥४६॥
तया विसृज्यते विश्वं जगदेतच्चराचरम् ।
सैषा प्रसन्ना वरदा नृणां भवति मुक्तये ॥४७॥
सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ।
संसारबन्धहेतुश्च सैव सर्वेश्वरेश्वरी ॥४८॥

राजोवाच

भगवन् का हि सा देवी महामायेति यां भवान् ।
ब्रवीति कथमुत्पन्ना सा कर्मास्याश्च[४०] किं द्विज ॥४९॥
यत्प्रभावा[४१] च सा देवी यत्स्वरूपा यदुद्भवा ।
तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ॥५०॥

ऋषिरुवाच

नित्यैव सा जगन्मूर्त्तिस्तया सर्वमिदं ततम् ।
तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ॥५१॥
देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा ।

---

३९ स्थितिकारिणा इति पाठान्तरम् ।
४० कर्म चास्याश्च इति मार्कण्डेयपुराणस्थः पाठः ।
४१ यत्स्वभावा इति चतुर्धरी, नागोजीभट्टागृहीतः पाठः ।

उत्पन्नेति तदा लोके सा नित्याऽप्यभिधीयते ॥५२॥
योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते ।
आस्तीर्य शेषमभजत्कल्पान्ते भगवान् प्रभुः ॥५३॥
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ ॥५४॥
स नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः ।
दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ॥५५॥
तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः ।
विबोधनार्थाय हरेर्हरिनेत्रकृतालयाम् ॥५६॥

ब्रह्मोवाच[४२]

विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् ।
स्तौमि निद्रां भगवतीं विष्णोरतुलतेजसः ॥५७॥[४३]
त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारस्वरात्मिका।
सुधा त्वमक्षरे नित्ये त्रिधामात्रात्मिका स्थिता ॥५८॥
अर्धमात्रास्थिता नित्या यानुच्चार्या विशेषतः ।
त्वमेव सन्ध्या[४४] सावित्री त्वं देवि जननी[४५] परा ॥५९॥
त्वयैतद्धार्यते विश्वं[४६] त्वयैतत्सृज्यते जगत् ।

४२ मार्कण्डेयपुराणेऽपि अत्रैव "ब्रह्मोवाच" इति पठितः ।

४३ मार्कण्डेयपुराणेऽपि अयमेव पाठ पठितः । अन्यत्र, निद्रां भगवतीं विष्णोरतुलां तेज सःप्रभुः इति पाठान्तरम् । तत्पश्चादेव हि अन्यत्र "ब्रह्मोवाच" इति पाठ उपलभ्यते ।

४४ सा त्वं इति पाठान्तरम् ।

४५ देवजननी इति चतुर्धरीगृहीतः पाठः ।

४६ सर्वं इति पाठान्तरम् ।

त्वयैतत्पाल्यते देवि त्वमत्स्यन्ते च सर्वदा ॥६०॥
विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने ।
तथा संहृतिरूपान्ते जगतोस्य जगन्मये ॥६१॥
महाविद्या महामाया महामेधा महास्मृता[४७] ।
महामोहा च भवती[४८] महादेवी महासुरी[४९] ॥६२॥
महामारी महावीरा महाहिकृतभूषणा । +
महामाया महाचण्डी महादेवानुसेविनी ॥६३॥ +
प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी ।
कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा ॥६४॥
त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा ।
लज्जा पुष्टि स्तथा तुष्टिस्त्वं शान्तिः क्षान्तिरेव च ॥६५॥
खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणा भुशुण्डीपरिघायुधा[५०] ॥६६॥
सौम्या सौम्यतराशेषसौम्येभ्यस्त्वतिसुन्दरी ।
परापराणां परमा त्वमेव परमेश्वरी ॥६७॥
यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेसदा[५१] ॥६८॥

---

४७ महास्मृतिः इति मार्कण्डेयपुराणस्थः पाठः ।

४८ भगवती इति मार्कण्डेयपुराणस्थः पाठः ।

४९ महेश्वरी इति पाठान्तरम् ।

५० बाणभुशुण्डीपरिघायुधा इति पाठान्तरम् ।

५१ तदा, मया इति पाठान्तरम् ।

यया त्वया जगत्स्रष्टा जगत्पात्यत्ति[५२] यो जगत् ।
सोऽपि निद्रावशं नीतः कस्त्वां स्तोतुमिहेश्वरः ॥६९॥
विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत् ॥७०॥
सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता ।
मोहयैतौ दुराधर्षावसुरौ मधुकैटभौ ॥७१॥
प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु ।
बोधस्य क्रियतामस्य हन्तुमेतौ महासुरौ ॥७२॥

ऋषिरुवाच

एवं स्तुता तदा देवी तामसी तत्र वेधसा ।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ॥७३॥
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः ।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः ॥७४॥
उत्तस्थौ च जगन्नाथस्तया मुक्तो जनार्दनः ।
एकार्णवे हि शयनात्ततः[५३] स ददृशे च तौ ॥७५॥
मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ ।
क्रोधरक्तेक्षणावत्तु[५४] ब्रह्माणं जनितोद्यमौ ॥७६॥
समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः ।

---

५२ जगत्पातात्ति इति पाठान्तरम् ।

५३ एकार्णवेऽहि शयनात्तत इति पाठान्तरम् ।

५४ क्रोधरक्तेक्षणौ हन्तुं इति पाठान्तरम् ।

पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः ॥७७॥
युध्यमानावतिबलौ दृष्ट्वा तावसुरोत्तमौ ।+
निजविद्यां समालोक्य समुद्भूतमहोत्सवौ ॥७८॥+
उवाच व्रियतां मत्तो युवां योऽभिवाञ्छितः । +
विहस्य तद्विभोर्वाक्यमवलोक्य परस्परम् ॥७९॥ +
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम् ॥८०॥

श्रीभगवानुवाच

भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ।
किमन्येन वरेणात्र[५५] एतावद्धि वृतं मया[५६] ॥८१॥

ऋषिरुवाच

वञ्चिताभ्यामिति तदा सर्वमापोमयं जगत् ।
विलोक्य ताभ्यां गदितो भगवान् कमलेक्षणः ॥८२॥

मधुकैटभौ ऊचतु[५७]

प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः[५८]।+
आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ॥८३॥

---

५५ वरेणातः इति शान्तनवीव्याख्यातः पाठः ।

५६ मम इति पाठान्तरम् ।

५७ अत्र मधुकैटभौ ऊचतु इति पाठ उचितः ।

५८ एतत्पद्यार्ध मार्कण्डेयपुराणचतुर्धरीशान्तनवीष्वपि प्राप्यते ।

ऋषिरुवाच

तथेत्युक्त्वा भगवता शङ्खचक्रगदाभृता ।
कृत्वा चक्रेण वै च्छिन्ने जघने शिरसी तयोः ॥८४॥
हत्वा तु भगवान् विष्णुस्तावुभौ मधुकैटभौ । +
व्यनाशयद्भयं घोरं ब्रह्मणोऽव्यक्तजन्मनः॥८५॥+
एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयम् ।
प्रभावमस्या देव्यास्तु भूयः श्रुणु वदामि ते ॥८६॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
मधुकैटभवधो नाम प्रथमोऽध्यायः ।

८६ श्लोकाः ।

इति प्रथमचरित्रं समाप्तम् ।



द्वितीयोऽध्यायः

अस्य श्रीमध्यमचरित्रस्य विष्णुर्ऋषिर्महालक्ष्मीर्देवता उष्णिक् छन्दः शाकम्भरी शक्तिर्दुर्गाबीजम् वायुस्तत्त्वम् यजुर्वेदः स्वरूपम् आत्मनः सकल-कामनासिध्द्यर्थं महालक्ष्मीप्रीत्यर्थं मध्यमचरित्रजपे विनियोगः ।

ध्यानम्

ॐ अक्षस्रक्परशुं गदेषुकुलिशं पद्मं धनुष्कुण्डिकां ।
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननां ।
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥

ऋषिरुवाच

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा ।
महिषेऽसुराणामधिपे देवानां च पुरन्दरे ॥१॥
तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम् ।
जित्वा च सकलान् देवानिन्द्रोऽभून्महिषासुरः ॥२॥
ततः पराजिता देवाः पद्मयोनिं प्रजापतिम् ।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ॥३॥
यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् ।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम् ॥४॥
सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च ।
अन्येषां चाधिकारान् स स्वयमेवाधितिष्ठति ॥५॥
स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि ।

विचरन्ति यथा मर्त्या महिषेण दुरात्मना ॥६॥
एतद्वः कथितं सर्वममरारिविचेष्टितम् ।
शरणं व प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम् ॥७॥
इत्थं निशम्य देवानां वचांसि मधुसूदनः ।
चकार कोपं शम्भुश्च भ्रूकुटीकुटिलाननौ ॥८॥
ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः ।
निश्चक्राम महत्तेजो ब्रह्मणः शङ्करस्य च ॥९॥
अन्येषां चैव देवानां शक्रादीनां शरीरतः ।
निश्चक्राम महत्तेज[५९]स्तच्चैक्यं समगच्छत ॥१०॥
अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम् ।
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम् ॥११॥
अतुलं[६०] तत्र तत्तेजः सर्वदेवशरीरजम् ।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा ॥१२॥
यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम् ।
याम्येन चाभवन् केशा बाहवो विष्णुतेजसा ॥१३॥
सौम्येन स्तनयोर्युग्मं मध्यमैन्द्रेण[६१] चाभवत् ।
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः ॥१४॥
ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा ।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका ॥१५॥
तस्यास्तु दन्ताः सम्भूताः प्राजापत्येन तेजसा ।

---

५९ निर्गतं सुमहत्तेजः इति पाठान्तरम् ।

६० सर्वतस्तेज इति पाठान्तरम् ।

६१ मैध्यं चैन्द्रेण इति पाठान्तरम् ।

नयनत्रितयं जज्ञे तथा पावकतेजसा ॥१६॥
भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च ।
अन्येषां चैव देवानां सम्भवस्तेजसां शिवा ॥१७॥
ततः समस्तदेवानां तेजोराशिसमुद्भवाम् ।
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः ॥१८॥
ततो देवा ददुस्तस्यै स्वानि स्वान्यायुधानि च । +
ऊचुर्जयजयेत्युच्चैर्जयन्तीं ते जयैषिणः[६२] ॥१९॥
शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् ।
चक्रं च दत्तवान् कृष्णः समुत्पाट्य[६३] स्वचक्रतः ॥२०॥
शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः ।
मारुतो दत्तवाँश्चापं बाणपूर्णे[६४] तथेषुधी ॥२१॥
वज्रमिन्द्रः समुत्पाद्य कुलिशादमराधिपः ।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद् गजात् ॥२२॥
कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ ।
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम् ॥२३॥
समस्तरोमकूपेषु निजरश्मीन् दिवाकरः ।
कालश्च दत्तवान् खड्गं तस्या[६५]श्चर्म च निर्मलम् ॥२४॥
क्षीरोदश्चामलं हारमजरे च तथाम्बरे ।
चूडामणिं तथा दिव्यं कुण्डले कटकानि च ॥२५॥

---

६२ अयं श्लोकः मार्कण्डेयपुराणे शान्तनव्यां चोपलभ्यते ।
६३ समुत्पाद्य इति पाठान्तरम् ।
६४ बाणपूर्णौ इत्यपि पाठः ।

६५ तस्यै इति मार्कण्डेयपुराणस्थः पाठः ।

अर्धचन्द्रं तथा शुभ्रं[६६] केयूरान् सर्वबाहुषु ।
नूपुरौ विमलौ तद्वद् ग्रैवेयकमनुत्तमम् ॥२६॥
अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च ।
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम् ॥२७॥
अस्त्राण्यनेकरूपाणि तथाऽभेद्यं च दंशनम् ।
अम्लानपङ्कजां मालां शिरस्युरसि चापरान्[६७] ॥२८॥
अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम् ।
हिमवान् वाहनं सिंहं रत्नानि विविधानि च ॥२९॥
ददावशून्यं सुरया पानपात्रं धनाधिपः ।
शेषश्च सर्वनागेशो महामणिविभूषितम् ॥३०॥
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ।
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा ॥३१॥
सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ।
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः ॥३२॥
अमायतातिमहता प्रतिशब्दो महानभूत् ।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे ॥३३॥
चचाल वसुधा चेलुः सकलाश्च महीधराः ।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम्[६८] ॥३४॥
तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः ॥३५॥

---

६६ दिव्यं इति पाठान्तरम् ।

६७ चापराम् इति पाठान्तरम् ।

६८ जयेति च मुदा देवास्तामूचुः सिंहवाहना इति शान्तनवीस्थः पाठः ।

सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः ।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः ॥३६॥
अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा ॥३७॥
पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम् ।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् ॥३८॥
दिशो भुजसहस्रेण समन्ताद् व्याप्य संस्थिताम् ।
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम् ॥३९॥
शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम् ।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः ॥४०॥
युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ।
रथानामयुतैः षड्भिरुदराख्यो[६९] महासुरः ॥४१॥
अयुध्यतायुतानां च सहस्रेण महाहनुः ।
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः ॥४२॥
अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे ।
गजवाजिसहस्रौघैरनेकैरुग्रदर्शनः[७०] ॥४३॥
उग्रास्य उग्रवीर्यश्च त्रिनेत्रश्च महाबलः । +
करालश्च तथा ताम्रो ह्यन्धकारो महासुरः ॥४४॥ +
वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत ।
वृतो रथानां कोट्या च रणे पञ्चशतायुतैः ॥४५॥ +

---

६९ उदग्राख्यः इति मार्कण्डेयपुराणस्थः पाठः ।

७० परिवारितः इति पाठान्तरम् ।

युयुधे संयुगे तत्र रथानां परिवारितः ।
बिडालाख्योऽयुतानां[७१] च पञ्चाशद्भिरथायुतैः ॥४६॥
युयुधुः संयुगे देव्या सह तत्र महासुराः ।
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा ॥४७॥
हयानां च वृतो युद्धे तत्राभून्महिषासुरः ।
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा ॥४८॥
युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः ।
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे ॥४९॥
देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका ॥५०॥
लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ।
अनायस्ताननना देवी स्तूयमाना सुरर्षिभिः ॥५१॥
मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी ॥५२॥
चचारासुरसैन्येषु वनेष्विव हुताशनः ।
निःश्वासान् मुमुचे यांश्च युध्यमाना रणेऽम्बिका ॥५३॥
त एव सद्यः सम्भूता गणाः शतसहस्रशः ।
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः ॥५४॥
नाशयन्तोऽसुरगणान् देवीशक्त्युपबृंहिताः ।
अवादयन्त पटहान् गणाः शङ्खांस्तथापरे ॥५५॥
मृदङ्गांश्च तथैवान्ये तस्मिन् युद्धमहोत्सवे ।

---

७१ बिडालाख्यो महादैत्यः इति मार्कण्डेयपुराणशान्तनव्योः पाठः ।

ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः[७२] ॥५६॥
खड्गादिभिश्च शतशो निजघान महासुरान् ।
पातयामास चैवान्यान् घण्टास्वनविमोहितान् ॥५७॥
असुरान् भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ।
केचिद् द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे ॥५८॥
विपोथिता निपातेन गदया भुवि शेरते ।
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः ॥५९॥
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि ।
निराकृताः[७३] शरौघेण कृताः केचिद्रणाजिरे[७४] ॥६०॥
श्येनानुकारिणः[७५] प्राणान् मुमुचुस्त्रिदशार्दनः[७६] ।
केषांश्चिद्[७७] बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे ॥६१॥
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः ॥६२॥
एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः ।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः ॥६३॥
कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ।
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः[७८] ॥६४॥

---

७२ शक्तिऋष्टिभिः इति नागोजीभट्टीगृहीतः पाठः ।
७३ निरन्तराः इति पाठान्तरम्,
७४ निरन्तरशरौघेण कृत्ताः केचिद्रणांजिरे इति मार्कण्डेयपुराणस्थः पाठः ।
७५ शैलानुकारिण इति मार्कण्डेयपुराणशान्तनव्योः पाठः, सेनानुकारिणः इत्यपि पाठः ।
७६ त्रिदशार्दिनः इति शान्तनवीस्थः पाठः, त्रिदशार्दनाः इत्यपि पाठः ।
७७ केषांचिद् इति पाठान्तरम् ।
७८ तूर्यलयान्विता इति चतुर्धरीगृहीतः पाठः ।

कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः ।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः ॥६५॥
तिष्ठ तिष्ठेति चैवोक्ता देव्या युयुधिरे मृधे[७९] । +
रुधिरौघविलुप्ताङ्गाः संग्रामे रोमहर्षणे[८०] ॥६६॥ +
पातितै रथनागाश्वैरसुरैश्च वसुन्धरा ।
अगम्या साभवत्तत्र यत्राभूत्स महारणः ॥६७॥
शोणितौघा महानद्यः सद्यस्तत्र प्रसुस्रुवुः[८१] ।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम् ॥६८॥
क्षणेन तन्महासैन्यमसुराणां तथाम्बिका ।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम् ॥६९॥
स च सिंहो महानादमुत्सृजन्धुतकेसरः ।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥७०॥
देव्या गणैश्च तैस्तत्र कृतं युद्धं महासुरैः ।
यथैषां[८२] तुष्टुवुर्देवाः[८३] पुष्पवृष्टिमुचो दिवि ॥७१॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ।

एवमादितः १५७ श्लोकाः ।

---

७९ एतत्पद्यार्ध शान्तनव्यां व्याख्यातः ।
८० एतत्पद्यार्ध मार्कण्डेयपुराणे उपलभ्यते, शान्तनव्याञ्च व्याख्यातः ।
८१ विसुस्रुवुः इति मार्कण्डेयपुराणस्थः पाठः ।
८२ यथैनां इति मार्कण्डेयपुराणस्थः पाठः ।
८३ तुतुषुर्देवाः इति पाठान्तरम् ।

तृतीयोऽध्यायः

ध्यानम्

ॐ उद्यद्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां
रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम् ।
हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं
देवीं बद्धहिमांशुरत्नमुकुटां वन्देऽरविन्दस्थिताम् ॥

ऋषिरुवाच

निहन्यमानं तत्सैन्यमवलोक्य महासुरः ।
सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथाम्बिकाम् ॥१॥
स देवीं शरवर्षेण ववर्ष समरेऽसुरः ।
यथा मेरुगिरेः श्रृङ्गं तोयवर्षेण तोयदः॥२॥
तस्यच्छित्त्वा ततो देवी लीलयैव शरोत्करान् ।
जघान तुरगान् बाणैर्यन्तारं चैव वाजिनाम् ॥३॥
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितम् ।
विव्याध चैव[८४] गात्रेषु छिन्नधन्वानमाशुगैः[८५] ॥४॥
स छिन्नधन्वा[८६] विरथो हताश्वो हतसारथिः ।
अभ्यधावत तां देवीं खड्गचर्मधरोऽसुरः ॥५॥
सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्धनि ।

---

८४ चैनं इति मार्कण्डेयपुराणस्थः पाठः ।

८५ शुगः इति मार्कण्डेयपुराणस्थः पाठः

८६ सच्छिन्नधन्वा इति पाठान्तरम् ।

आजघान भुजे सव्ये देवीमप्यतिवेगवान् ॥६॥
तस्याः खड्गो भुजं प्राप्य पफाल नृपनन्दन ।
ततो जग्राह शूलं स कोपादरुणलोचनः ॥७॥
चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ।
जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥८॥
दृष्ट्वा तदापतच्छूलं देवी शूलममुञ्चत ।
तच्छूलं शतधा तेन नीतं स च महासुरः[८७] ॥९॥
तेन शूलेन निर्भिन्नो निपपात महीतले । +
हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥१०॥
आजगाम गजारुढश्चामरस्त्रिदशार्दनः ।
सोऽपि शक्तिं मुमोचाथ देव्यास्तामम्बिका द्रुतम् ॥११॥
हुंकाराभिहतां भूमौ पातयामास निष्प्रभाम् ।
भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः ॥१२॥
चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ।
शूलं च विगतं दृष्ट्वा धनुरादाय दानवः ॥१३॥ +
देवीं सवाहनां बाणैः सोऽच्छिनत्कृतलाघव । +
ततः सिंहः समुत्पत्य गजकुम्भान्तरे स्थितः ॥१४॥
बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ।
युद्धमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥१५॥
युयुधातेऽतिसंरब्धौ प्रहारैरतिदारुणैः ।

८७ तेनतच्छतधानीतं शूलं स च महासुरः इति मार्कण्डेयपुराणस्थः पाठः ।

ततो वेगात् खमुत्पत्य निपत्य च मृगारिणा ॥१६॥
करप्रहारेण शिरश्चामरस्य पृथक्कृतम्[८८] ।
उदग्रश्च रणे[८९] देव्या शिलावृक्षादिभिर्हतः ॥१७॥
दन्तमुष्टितलैश्चैव करालश्च निपातितः ।
देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् ॥१८॥
वाष्कलं भिन्दिपालेन बाणैस्ताम्रं तथान्धकम् ।
उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् ॥१९॥
त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ।
बिडालास्यासिना कायात्पातयामास वै शिरः॥२०॥
दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् ।
कालं च कालदण्डेन कालरात्रिरपातयत्[९०] ॥२१॥ +
असिनैवासिलोमानमच्छिदत्सा रणोत्सवैः[९१] । +
एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः ॥२२॥
माहिषेण स्वरूपेण त्रासयामास तान् गणान् ।
कांश्चित्तुण्डप्रहारेण खुरक्षेपैस्तथापरान् ॥२३॥
लाङ्गूलताडितांश्चान्याञ्छृङ्गाभ्यां च विदारितान् ।
रसनाविभ्रमेणान्यानुरसान्यानताडयत् ॥२४॥ +

---

८८ पृथक् पृथक् इति पाठान्तरम् ।

८९ उदग्रश्चरणे इति मार्कण्डेयपुराणस्थः पाठः ।

९० एतत्पद्यार्ध मार्कण्डेयपुराणे उपलभ्यते, शान्तनव्यां च व्याख्यातः।इतः परं उग्रदर्शनमत्युग्रैः खड्गपातैरताडयत् इति अधिकः पाठः तत्र वर्तते ।

९१ एतत्पद्यार्ध मार्कण्डेयपुराणे उपलभ्यते, शान्तनव्यां च व्याख्यातः। इतः परं गणैः सिंहेन देव्या च जयक्ष्वेडाकृतोत्सवैः । इति अधिकः पाठस्तत्र वर्तते ।

वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ।
निः श्वासपवनेनान्यान् पातयामास भूतले ॥२५॥
निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ।
सिंहं हन्तुं महादेव्याः कोपं चक्रे ततोऽम्बिका ॥२६॥
सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ।
श्रृङ्गाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च ॥२७॥
वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ।
लाङ्गूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥२८॥
धुतश्रृङ्गविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ।
श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥२९॥
इति क्रोधसमाध्मातमापतन्तं महासुरम् ।
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥ ३०॥
सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरम् ।
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥३१॥
ततः सिंहोऽभवत्सद्यो यावत्तस्याम्बिका शिरः ।
छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥३२॥
तत एवाशु पुरुषं देवी चिच्छेद सायकैः ।
तं खड्गचर्मणा सार्धं ततः सोऽभून्महागजः ॥३३॥
करेण च महासिंहं तं चकर्ष जगर्ज च ।
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥३४॥

ततो महासुरो भूयो माहिषं वपुरास्थितः[९२] ।
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥३५॥
ततः क्रुद्धा जगन्माता चण्डिका पानमुत्तमम् ।
पपौ पुनः पुनश्चैव जहासारुणलोचना ॥३६॥
ननर्द चासुरः सोऽपि बलवीर्यमदोद्धतः ।
विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ॥३७॥
सा च तान् प्रहितांस्तेन चूर्णयन्ती शरोत्करैः ।
उवाच तं मदोद्धूतमुखरागाकुलाक्षरम् ॥३८॥

देव्युवाच

गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहम् ।
मया त्वयि हतेऽत्रैव गर्जिष्यन्त्याशु देवताः ॥३९॥

ऋषिरुवाच

एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरम् ।
पादेनाक्रम्य कण्ठे च शूलेनैनमताडयत् ॥४०॥
ततः सोऽपि पदाऽऽक्रान्तस्तया निजमुखात्ततः ।
अर्धनिष्क्रान्त एवासीद्[९३] देव्या वीर्येण संवृतः ॥४१॥
अर्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ।
तया महासिना देव्या शिरश्छित्वा निपातितः ॥४२॥

---

९२ वपुराश्रितः इति मार्कण्डेयपुराणगतो पाठः ।
९३ एवाति इति पाठान्तरम् ।

विलिखन्नेव श्रृङ्गाभ्यां देव्याश्चरणपङ्कजे । +
निश्चक्राम महावीर्यः खड्गचर्मधरोऽसुरः ॥४३॥ +
एवं स माहिषो नाम ससैन्यः ससुहृद्गणः । +
त्रैलोक्यं मोहयित्वा तु तया देव्या विनाशितः[९४] ॥४४॥ +
त्रैलोक्यस्थैस्तदा भूतैर्महिषे विनिपातिते । +
जयेत्युक्तं ततः सर्वैः सदेवासुरमानुषैः[९५] ॥४५॥ +
ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ।
प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥४६॥
तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः ।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४७॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोऽध्यायः ।
एवमादितः २०४ श्लोकाः ।

---

९४ अयं श्लोको मार्कण्डेयपुराणे उपलभ्यते, शान्तनवीकारेण च व्याख्यातः ।
९५ अयं श्लोको मार्कण्डेयपुराणे उपलभ्यते । तत्र मानवैः इति पाठः ।

चतुर्थोऽध्यायः

ध्यानम्

ॐ कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥

ऋषिरुवाच[९६]

शक्रादयः सुरगणा निहतेऽतिवीर्ये
तस्मिन् दुरात्मनि सुरारिबले च देव्या ।
तां तुष्टुवुः प्रणतिनम्रशिरोधरांसा
वाग्भिः प्रहर्ष पुलकोद्गमचारुदेहाः ॥१॥

देवा ऊचुः[९७] । +

देव्या यया ततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकामखिलदेवमहर्षिपूज्यां
भक्त्या नताः स्म विदधातु शुभानि सा नः ॥२॥
यस्याः प्रभावमतुलं भगवाननन्तो

---

९६ मार्कण्डेयपुराणे, चतुर्धरीशान्तनव्योरपि अध्यायारम्भे ततः सुरगणाः सर्वे देव्या इन्द्र पुरोगमाः । स्तुतिमारेभिरे कर्तुं निहते महिषासुरे इति पाठः प्राप्यते ।

९७ अयं पाठः मार्कण्डेयपुराणे [illegible] उपलभ्यते ।

ब्रह्मा हरश्च न हि वक्तुमलं बलं च ।
सा चण्डिकाखिलजगत्परिपालनाय
नाशाय चाशुभभयस्य[९८] मतिं करोतु ॥३॥
या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः
पापात्मनां कृतधियां हृदयेषु बुद्धिः ।
श्रद्धा सतां कुलजनप्रभवस्य लज्जा
तां त्वां नताः स्म परिपालय देवि विश्वम् ॥४॥
किं वर्णयामि[९९] तव रूपमचिन्त्यमेतत्
किं चातिवीर्यमसुरक्षयकारि भूरि ।
किं चाहवेषु चरितानि तवाद्भुतानि[१००]
सर्वेषु देव्यसुरदेवगणादिकेषु ॥५॥
हेतुः समस्तजगतां त्रिगुणापि दोषै -
र्न ज्ञायसे हरिहरादिभिरप्यपारा ।
सर्वाश्रियाखिलमिदं जगदंशभूत -
मव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥६॥
यस्याः समस्तसुरता समुदीरणेन
तृप्तिं प्रयाति[१०१] सकलेषु मखेषु देवि ।
स्वाहासि वै पितृगणस्य च तृप्तिहेतु-
रुच्चार्यसे त्वमत एव जनैः स्वधा च ॥७॥

---

९८ चा सुरभयस्य इति नागोजीभट्टीगृहीतः पाठः ।
९९ किं वर्णयामः इति पाठान्तरम् ।
१०० तवाति यानि इति पाठान्तरम् ।
१०१ प्रयान्ति इति मार्कण्डेयपुराणस्थः पाठः ।

या मुक्तिहेतुरविचिन्त्यमहाव्रता त्व[१०२]-
मभ्यस्यसे सुनियतेन्द्रियतत्त्वसारैः ।
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषै-
र्विद्यासि सा भगवती परमा हि देवि ॥८॥

शब्दात्मिका सुविमलर्ग्यजुषां निधान-
मुद्गीथ[१०३] रम्यपदपाठवतां च साम्नाम् ।
देवी त्रयी भगवती भवभावनाय
वार्ता च[१०४] सर्वजगतां परमार्तिहन्त्री ॥९॥

मेधासि देवि विदिताखिलशास्त्रसारा
दुर्गासि दुर्गभवसागरनौरसङ्गा ।
श्रीः कैटभारिहृदयैककृताधिवासा
गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा ॥१०॥

ईषत्सहासममलं परिपूर्णचन्द्र-
बिम्बानुकारि कनकोत्तमकान्तिकान्तम् ।
अत्यद्भुतं प्रहृतमात्तरुषा तथापि
वक्त्रं विलोक्य सहसा महिषासुरेण ॥११॥

दृष्ट्वा तु देवि कुपितं भ्रुकुटीकराल-
मुद्यच्छशाङ्कसदृशच्छवि यन्न सद्यः ।
प्राणान्मुमोच महिषस्तदतीव चित्रं

---

१०२ महाव्रता च इति पाठान्तरम् ।
१०३ उद्गीथ[illegible] इति पाठान्तरम् ।

१०४ वार्त्तासि इति मार्कण्डेयपुराणस्थः पाठः ।

कैर्जीव्यते हि कुपितान्तकदर्शनेन ॥१२॥

देवि प्रसीद परमा भवती भवाय
सद्यो विनाशयसि[१०५] कोपवती कुलानि ।
विज्ञातमेतदधुनैव यदस्तमेत-
न्नीतं बलं सुविपुलं महिषासुरस्य ॥१३॥

ते सम्मता जनपदेषु धनानि तेषां
तेषां यशांसि न च सीदति धर्मवर्गः[१०६] ।
धन्यास्त एव निभृतात्मजभृत्यदारा
येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥

धर्म्याणि देवि सकलानि सदैव कर्मा-
ण्यतादृतः[१०७] प्रतिदिनं सुकृती करोति ।
स्वर्गं प्रयाति च ततो भवतीप्रसादा-
ल्लोकत्रयेऽपि फलदा ननु देवि तेन ॥१५॥

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदाऽऽर्द्रचित्ता ॥ १६॥

एभिर्हतैर्जगदुपैति सुखं तथैते
कुर्वन्तु नाम नरकाय चिराय पापम् ।

---

१०५ विनाशयति इति शान्तनवीस्थः पाठः ।

१०६ बन्धुवर्गः इति मार्कण्डेयपुराणस्थः पाठः ।

१०७ कर्माण्यत्यादृतः इति मार्कण्डेयपुराणस्थः पाठः ।

संग्राममृत्युमधिगम्य दिवं प्रयान्तु
मत्वेति नूनमहितान् विनिहंसि देवि ॥१७॥
दृष्ट्वैव[१०८] किं न भवती प्रकरोति भस्म
सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम् ।
लोकान् प्रयान्तु रिपवोऽपि हि शस्त्रपूता
इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी[१०९] ॥१८॥
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः
शूलाग्रकान्तिनिवहेन दृशोऽसुराणाम् ।
यन्नागता विलयमंशुमदिन्दुखण्ड-
योग्याननं तव विलोकयतां तदेतत् ॥१९॥
दुर्वृत्तवृत्तशमनं तव देवि शीलं
रूपं तथैतदविचिन्त्यमतुल्यमन्यैः ।
वीर्यं च हन्तृहतदेवपराक्रमाणां[११०]
वैरिष्वपि प्रकटितैव दया त्वयेत्थम् ॥२०॥
केनोपमा भवतु तेऽस्य पराक्रमस्य
रूपं च शत्रुभयकार्यतिहारि कुत्र ।
चित्ते कृपा समरनिष्ठुरता च दृष्टा
त्वय्येव देवि वरदे भुवनत्रयेऽपि ॥२१॥
त्रैलोक्यमेतदखिलं रिपुनाशनेन

---

१०८ दृष्ट्यैव इति मार्कण्डेयपुराणस्थः पाठः ।
१०९ तेष्वहितेषु साध्वी इति मार्कण्डेयपुराणस्थः पाठः ।
११० हन्तहृतदेवपराक्रमाणाम् इति पाठान्तरम् ।

त्रातं त्वया समरमूर्धनि तेऽपि हत्वा ।
नीता दिवं रिपुगणा भयमप्यपास्त-
मस्माकमुन्मदसुरारिभवं नमस्ते ॥२२॥

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥२३॥
प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ॥२४॥
सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि[111] तै रक्षास्मांस्तथा भुवम् ॥२५॥
खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः ॥२६॥

ऋषिरुवाच

एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नन्दनोद्भवैः ।
अर्चिता जगतां धात्री तथा गन्धानुलेपनैः ॥२७॥
भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु[112] धूपिता ।
प्राह प्रसादसुमुखी समस्तान् प्रणतान् सुरान् ॥२८॥

---

१११ चात्यन्तघोराणि इति चतुर्धरीशान्तनवीगृहीतः पाठः ।

११२ दिव्यधूपैः सुधूपिता इति मार्कण्डेयपुराणस्थः पाठः ।

श्रीदेव्युवाच

तुष्टोऽस्मि स्तोत्रमुख्येन तथैवाराधनेन च । +
सुरामांसोपहारेण भक्त्या प्रणतिपूर्वया ॥२९॥ +
व्रियतां त्रिदशाः सर्वे यदस्मत्तोऽभिवाञ्छितम् ।
ददाम्यहमतिप्रीत्या स्तवैरेभिः सुपूजिता[113] ॥३०॥ +
महिषोऽयं महावीर्यो निहतश्चरणे मया । +
जगतामुपकारायकिमन्यदवशिष्यते ॥३१॥ +
कर्तव्यमपरं यच्च दुष्करं तन्निवेद्यताम्[114] । +
करिष्यामि न सन्देहो भूयोऽपि रिपुनाशनम् ॥३२॥ +

देवा उचुः

भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ।
यदयं निहतः शत्रुरस्माकं महिषासुरः ॥३३॥
यदि चापि[115] वरो देयस्त्वयास्माकं महेश्वरि ।
संस्मृता संस्मृता त्वं नो हिंसेथाः[116] परमापदः ॥३४॥
यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने ।
शुचिरेकमना शान्तो भक्त्या त्रिभुवनेश्वरीम् ॥३५॥ +

---

११३ एतत्पद्यार्धं मार्कण्डेयपुराणे उपलभ्यते ।

११४ एतत्पद्यार्धं मार्कण्डेयपुराणे उपलभ्यते, शान्तनव्यां च व्याख्यातम् । तत्र तन्न विद्महे इति पाठः । तत इत्याकर्ण्य वचो देव्याः प्रत्यूचुस्ते दिवौकसः इति पाठ अधिकः प्राप्यते ।

११५ वापि इति पाठान्तरम् ।

११६ हिंसीथाः इति मार्कण्डेयपुराणस्थः पाठः ।

तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदाम् ।
ऐश्वर्यविपुलं यच्च मनस्त्वाह्लादकारणम् ॥३६॥ +
वृद्धयेऽस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ।
पूर्वमेव वरं दद्यादस्माकं वचनात्ततः ॥३७॥ +

ऋषिरुवाच

इति प्रसादिता देवैर्जगतोऽर्थे तथाऽऽत्मनः ।
तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता नृप ॥३८॥
इत्येतत्कथितं भूप सम्भूता सा यथा पुरा ।
देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥३९॥
पुनश्च गौरीदेहात्सा[११७] समुद्भूता यथाभवत् ।
वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः ॥४०॥
रक्षणाय च लोकानां देवानामुपकारिणी ।
तच्छृणुष्व[११८] मयाऽऽख्यातं यथावत्कथयामि ते ॥४१॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये महिषासुरवधे शक्रादिकृतस्तुतिर्नाम चतुर्थोऽध्यायः ।

इति मध्यमचरित्रं समाप्तम् ।

एवमादितः २४५ श्लोकाः ।

---

११७ गौरीदेहा सा इति चतुर्धरीगृहीतः पाठः ।
११८ शृणु स्व इति शान्तनवीपाठः ।


वेद

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः[१२५] ।
ज्योत्स्नायै चेन्दुरूपिण्यै[१२६] सुखायै सततं नमः ॥१३॥
कल्याण्यै प्रणतां वृद्ध्यै[१२७] सिद्ध्यै कुर्मो[१२८] नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमोनमः ॥१४॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै[१२९] ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१५॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।

---

१२५ इतः परं नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः इति पद्यार्ध मार्कण्डेयपुराणे अधिकः पठितः ।
२६ चन्द्ररूपिण्यै इति मार्कण्डेयपुराणस्थः पाठः ।
२७ प्रणता वृद्ध्यै, प्रणतामृध्यै इत्यपि पाठः ।
२८ कूर्म्यै: इत्यपि पाठः ।
२९ सर्वकारिणी इति मार्कण्डेयपुराणस्थः पाठः ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥
या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥
या देवी सर्वभूतेषु मोहरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥
या देवी सर्वभूतेषु श्रुतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२७॥
या देवी सर्वभूतेषु क्षमारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥
या देवी सर्वभूतेषु ऋद्धिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२९॥
या देवी सर्वभूतेषु सिद्धिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३०॥
या देवी सर्वभूतेषु तृप्तिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३१॥

या देवी सर्वभूतेषु क्रोधरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३२॥
या देवी सर्वभूतेषु मतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३३॥
या देवी सर्वभूतेषु गतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३४॥
या देवी सर्वभूतेषु रीतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३५॥
या देवी सर्वभूतेषु धृतिरूपेण संस्थिता[१३०] । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३६॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३७॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३८॥
या देवी सर्वभूतेषु ज्ञातृरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३९॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४०॥
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४१॥

१३० अयं पाठो मार्कण्डेयपुराणे उपलभ्यते ।

या देवी सर्वभूतेषु स्फूर्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४२॥
या देवी सर्वभूतेषु मेधारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४३॥
या देवी सर्वभूतेषु प्रज्ञारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४४॥
या देवी सर्वभूतेषु कीर्तिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४५॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४६॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४७॥
या देवी सर्वभूतेषु सन्ध्यारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४८॥
या देवी सर्वभूतेषु दिवारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४९॥
या देवी सर्वभूतेषु रात्रीरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५०॥
या देवी सर्वभूतेषु भीतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५१॥
या देवी सर्वभूतेषु रजोरूपेण संस्थिता । +

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५२॥
या देवी सर्वभूतेषु सत्त्वरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५३॥
या देवी सर्वभूतेषु तमोरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५४॥
या देवी सर्वभूतेषु सृष्टिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५५॥
या देवी सर्वभूतेषु स्थितिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५६॥
या देवी सर्वभूतेषु लयरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५७॥
या देवी सर्वभूतेषु नीतिरूपेण संस्थिता[१३१] । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५८॥
या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५९॥
या देवी सर्वभूतेषु मायारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६०॥
या देवी सर्वभूतेषु स्वधारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६१॥
या देवी सर्वभूतेषु स्वाहारूपेण संस्थिता । +

१३१ अयं पाठो मार्कण्डेयपुराणे उपलभ्यते, शान्तनव्यां च व्याख्यातः ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६२॥
या देवी सर्वभूतेषु इच्छारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६३॥
या देवी सर्वभूतेषु ज्ञानरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६४॥
या देवी सर्वभूतेषु क्रियारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६५॥
या देवी सर्वभूतेषु विद्यारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६६॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६७॥
या देवी सर्वभूतेषु पुष्टिरूपेण संस्थिता[१३२] । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६८॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६९॥
या देवी सर्वभूतेषु पितृरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७०॥
या देवी सर्वभूतेषु भ्रातृरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७१॥
या देवी सर्वभूतेषु प्रजारूपेण संस्थिता । +

---

१३२ अयं पाठो मार्कण्डेयपुराणे उपलभ्यते ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७२॥
या देवी सर्वभूतेषु पृथ्वीरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७३॥
या देवी सर्वभूतेषु जलरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७४॥
या देवी सर्वभूतेषु तेजोरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७५॥
या देवी सर्वभूतेषु वायुरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७६॥
या देवी सर्वभूतेषु नभोरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७७॥
या देवी सर्वभूतेषु शब्दरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७८॥
या देवी सर्वभूतेषु स्पर्शरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७९॥
या देवी सर्वभूतेषु रूपरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८०॥
या देवी सर्वभूतेषु रसरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८१॥
या देवी सर्वभूतेषु गन्धरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८२॥

या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥८३॥
या देवी सर्वभूतेषु सर्वरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८४॥
या देवी सर्वभूतेषु मुक्तिरूपेणसंस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥८५॥
इन्द्रियाणामधिष्ठात्री भूतानामखिलेषु[१३३] या ।
भूतेषु सततं तस्यै व्याप्तिदेव्यै[१३४] नमो नमः ॥८६॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८७॥

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता[१३५] ।
करोतु सा न : शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः॥८८॥
या साम्प्रतं चोद्धतदैत्यतापितै -
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥८९॥

---

१३३ भूतानां चाखिलेषु इति पाठान्तरम् ।
१३४ व्याप्त्यै देव्यै इति पाठान्तरम् ।
१३५ तथा सुरेन्द्रैश्च दिनेशु सेविता इति शान्तनवीस्थः पाठः ।

ऋषिरुवाच

एवं स्तवाभियुक्तानां[१३६] देवानां तत्र पार्वती ।
स्नातुमभ्याययौ तोये जाह्नव्या नृपनन्दन ॥९०॥
साऽब्रवीत् तान् सुरान् सुभ्रूर्भवद्भिः स्तूयतेऽत्र का।
शरीरकोशतश्चास्याः समुद्भूताऽब्रवीच्छिवा॥९१॥
स्तोत्रं मयैतत्[१३७] क्रियते शुम्भदैत्यनिराकृतैः ।
देवैः समस्तैः[१३८] समरे निशुम्भेन पराजितैः ॥९२॥
इत्याकर्ण्य गिरं गौरी तामाह सुभगां पुनः । +
हिमवद्दक्षिणं श्रृङ्गं गत्वा त्वं भारतान्तिकम्॥९३॥ +
देवकार्यं विधायाऽऽशु पश्चादेहि ममान्तिकम्। +
आज्ञप्ता च ततो देवी देवैः सह विनिर्ययौ ॥९४॥ +
शुम्भादीनसुरान् हत्वा प्रीतिं दास्यामि वःसुराः। +
शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका॥९५॥
कौशिकीति समस्तेषु ततो लोकेषु गीयते ।
तस्यां विनिर्गतायां[१३९] तु कृष्णाऽभूत् साऽपि पार्वती ॥९६॥
कालिकेति समाख्याता हिमाचलकृताश्रया ।
अथ स्नात्वा ययौ देवी समक्षं सा दिवौकसाम् ॥९७॥+
नियुज्य कौशिकीं स्वाङ्गात्सम्भूतां तत्प्रियाय वै। +

---

१३६ स्तवादियुक्तानां इति पाठान्तरम्।
१३७ ममैतत् इति पाठान्तरम्।
१३८ सर्वैः इति पाठान्तरम्।
१३९ विनिर्गता या इति गुप्तवतीपाठः।

अथाम्बिका[140] परं रूपं बिभ्रती[141] सुमनोहरम् ॥९८॥
हन्तास्मि तौ महावीर्यावित्युक्त्वा त्रिदशाँस्तथा । +
प्रतस्थे हिमवच्छृङ्गं सिद्धचारणसेवितम् ॥९९॥ +
गन्धर्वयक्षचरितमप्सरोगणसेवितम् ॥ +
प्रालेये शीतलतटं पितुरङ्कमनुत्तमम् ॥१००॥ +
यत्रपूर्वं तपस्तप्तं पुण्यं परमदारुणम् । +
मुनिभिर्देवसङ्घैश्च ब्रह्मचारतथात्मना ॥१०१॥ +
तत्र गत्वा महादेवी बिभ्राणा परमं वपुः । +
डोलक्रीडापराभूत्वा जगौ गेयमनुत्तमम् ॥१०२॥ +
रक्षोभूतपिशाचाश्च गन्धर्वाप्सरसो गणाः । +
अन्तर्हिताश्च मुनयः सिद्धाश्च परमर्षयः ॥१०३॥ +
तुष्टुवुर्देवसङ्घाश्च तत्रस्थाममितप्रभाम् । +
तदा देवा महाभागा जग्मुः स्ते हृष्टमानसः ॥१०४॥ +
तस्मिन् गिरिवरे राजन् डोलामारुह्य काञ्चनीम् । +
नृत्यन्ती च हसन्ती च गायन्ती च मुहुर्मुहुः ॥१०५॥ +
उवास सा चिरं कालं देवानां हितकाङ्क्षया । +
ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरम् ॥१०६॥
ददर्श चण्डो मुण्डश्च भृत्यो शुम्भनिशुम्भयोः ।
ताभ्यां शुम्भाय चाऽख्याता साऽतीव सुमनोहरा ॥१०७॥

---

१४० ततोम्बिका इति पाठान्तरम् ।
१४१ विभ्राणां इति पाठान्तरम् ।

काप्यास्ते स्त्री महाराज भासयन्ती हिमाचलम् ।
नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमम् ॥१०८॥
ज्ञायतां काऽप्यसौ देवी गृह्यतां चासुरेश्वर ।
याऽदृष्टपूर्वा देवेषु गन्धर्वेषूरगेषु च ॥१०९॥ +
स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा ।
नैव देवी न गन्धर्वी नासुरी न च पन्नगी ॥११०॥ +
दृष्टपूर्वा क्वचिन्नारी श्रुतपूर्वाऽपि वा प्रभो । +
त्रैलोक्ये या सुचार्वङ्गी हावभावसमन्विता ॥१११॥ +
आदाय तिलशस्तासां निर्मिता स्त्री तिलोत्तमा । +
तिलोत्तमा सहस्राणां तिलांशेनैव निर्मिता ॥११२॥ +
भ्राजते पर्वतस्याग्रे डोलामारुह्य काञ्चनीम् । +
उनषोडशवर्षे च संपूर्णनवयौवना ॥११३॥ +
चतुर्दशानां लोकानां देवतैव विराजते । +
नैव तस्याः पिता माता न भ्राता न च बान्धवाः ॥११४॥ +
न चान्ये रक्षितारश्च सैका तिष्ठति निर्जने । +
सा रूपसंपदोपेता यौवनोत्तमशालिनी ॥११५॥ +
सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ।
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥११६॥
त्रैलोक्ये तु समस्तानि साम्प्रतं भान्ति ते गृहे ।
ऐरावतः समानीतो गजरत्नं पुरन्दरात् ॥११७॥

पारिजाततरुश्चायं तथैवोच्चैश्रवा हयः ।

विमानं हंससंयुक्तमेतत्तिष्ठति तेऽङ्गणे ॥११८॥
रत्नभूतमिहानीतं यदाऽऽसीद्वेधसोऽद्भूतम् ।
निधिरेष महापद्मः समानीतो धनेश्वरात् ॥११९॥
किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम् ।
छत्रन्ते वारुणं गेहे काञ्चनस्रावि तिष्ठति ॥१२०॥
तथायं स्यन्दनवरो यः पुराऽऽसीत्प्रजापतेः ।
मृत्योरुत्क्रान्तिदा नाम शक्तिरीश त्वया हृता ॥१२१॥
पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ।
निशुम्भस्याब्धिजाताश्च समस्ता रत्नजातयः ॥१२२॥
बन्हिश्चापि[१४२] ददौ तुभ्यमग्निशौचेय[१४३] वाससी ।
एवं दैत्येन्द्र रत्नानि समस्तान्याहृतानि ते ॥१२३॥
स्त्रीरत्नमेषा कल्याणी स्वयमेवाभ्युपागता । +
त्रैलोक्य राज्यादधिका त्वया कस्मान्न गृह्यते ॥१२४॥ +

ऋषिरुवाच

निशम्येति वचः शुम्भः स तदा चण्डमुण्डयोः ।
प्रेषयामास सुग्रीवं दूतं देव्या महासुरम्[१४४] ॥१२५॥
इति चेति वक्तव्या सा गत्वा वचनान्मय ।
यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥१२६॥

---

१४२ वह्निरपि इति पाठान्तरम् ।
१४३ अग्निःशौचे च वाससा इति मार्कण्डेयपुराणस्थः पाठः ।
१४४ महासुरः इति मार्कण्डेयपुराणशान्तनव्योः पाठः । इतः परं मार्कण्डेयपुराणे शुम्भ उवाच इति पाठः प्राप्यते ।

स तत्र गत्वा यत्रास्ते शैलोद्देशेऽति शोभने ।
तां च देवीं ततः प्राह[१४५] श्लक्ष्णं मधुरया गिरा ॥१२७॥

दूत उवाच

देवि दैत्येश्वरः शुम्भस्त्रैलोक्ये परमेश्वरः ।
दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ॥१२८॥
अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ।
निर्जिताखिलदैत्यारिः स यदाह श्रृणुष्व तत् ॥१२९॥
मम त्रैलोक्यमखिलं मम देवा वशानुगाः ।
यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ॥१३०॥
त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ।
तथैव गजरत्नं च हृतं[१४६] देवेन्द्रवाहनम् ॥१३१॥
क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ।
उच्चैः श्रवससंज्ञं तु[१४७] प्रणिपत्य समर्पितम् ॥१३२॥
यानि चान्यानि देवेषु गन्धर्वेषूरगेषु च ।
रत्नभूतानि भूतानि तानि मय्येव शोभने ॥१३३॥
स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयम् ।
सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयम् ॥१३४॥
मां वा ममानुजं वाऽपि निशुम्भमुरुविक्रमम् ।

---

१४५ सा देवी तां ततः प्राहः इति पाठान्तरम् ।
१४६ हृत्वा इति पाठान्तरम् ।
१४७ तत् इति पाठान्तरम् ।

भज त्वं चञ्चलापाङ्गि रत्नभूतासि वै यतः ॥१३५॥
परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ।
एतद्बुद्ध्या समालोक्य[१४८] मत्परिग्रहतां व्रज ॥१३६॥

ऋषिरुवाच

इत्युक्ता सा तदा देवी गम्भीरान्तः स्मिता जगौ ।
दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥१३७॥

श्रीदेव्युवाच

सत्यमुक्तं त्वया नात्र मिथ्या किञ्चित्त्वयोदितम् ।
त्रैलोक्याधिपतिः शुम्भो निशुम्भश्चापि तादृशः ॥१३८॥
किन्त्वत्र यत्प्रतिज्ञातं मिथ्या यत्क्रियते कथम् ।
श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥१३९॥
यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ।
यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ॥१४०॥
तदा गच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ।
मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥१४१॥

दूत उवाच

अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ।
त्रैलोक्ये कः पुमाँस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥१४२॥

---

१४८ समालोच्य इति मार्कण्डेयपुराणस्थः पाठः ।

अन्येषामपि दैत्यानां सर्वे देवा न वै युधि ।
तिष्ठन्ति सन्मुखे[१४९] देवि किं पुनस्त्री त्वमेकिका ॥१४३॥
इन्द्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ।
शुम्भादीनां कथं तेषां स्त्री प्रयास्यसि संमुखम् ॥१४४॥
सा त्वं गच्छ मयैवोक्ता पार्श्वं शुम्भनिशुम्भयोः ।
केशाकर्षणनिर्धूतगौरवा मा गमिष्यसि ॥१४५॥

श्रीदेव्युवाच

एवमेतद् बली शुम्भो निशुम्भश्चापि[१५०] वीर्यवान् ।
किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥१४६॥
स त्वं गच्छ मयोक्तं[१५१] ते यदेतत्सर्वमादृतः ।
तदाचक्ष्वासुरेन्द्राय स च युक्तं करोतु यत्[१५२] ॥१४७॥

इति श्रीमार्कण्डेयपुराणे सावर्णिकेमन्वन्तरे देवीमाहात्म्ये
दूतसंवादो नाम पञ्चमोऽध्याय : ।
एवमादितः ३९२ श्लोकाः ।

---

१४९ सम्मुखा इति मार्कण्डेयपुराणस्थः पाठः, सम्मुखे इत्यपि पाठान्तरम् ।
१५० चाति इति पाठान्तरम् ।
१५१ मयैवोक्तं इति पाठान्तरम् ।
१५२ तत् इति पाठान्तरम् ।

षष्ठोऽध्यायः

ध्यानम्

ॐ नागाधीश्वरविष्टरां फणिफणोत्तंसोरुरत्नावली-
भास्वद्देहलतां दिवाकरनिभां नेत्रत्रयोद्भासिताम् ।
मालाकुम्भकपालनीरजकरां चन्द्रार्धचूडां परां
सर्वज्ञेश्वरभैरवाङ्कनिलयां पद्मावतीं चिन्तये ॥

ऋषिरुवाच

इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ।
समाचष्ट[१५३] समागम्य दैत्यराजाय विस्तरात् ॥१॥
तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ।
सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनम् ॥२॥
हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ।
तामानय बलाद् दुष्टां केशाकर्षणविह्वलाम् ॥३॥
तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ।
स हन्तव्योऽमरो वापि यक्षो गन्धर्व एव च[१५४] ॥४॥

ऋषिरुवाच

तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धूम्रलोचनः ।
वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥५॥

---

१५३ समाचष्टे इति मार्कण्डेयपुराणस्थः पाठः ।

१५४ वा इति पाठान्तरम् ।

स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थिताम् ।
जगादोच्चैः प्रयाहीति मूलं शुम्भनिशुम्भयोः ॥६॥
न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ।
ततो बलान्नयाम्येष[१५५] केशाकर्षणविह्वलाम् ॥७॥

श्रीदेव्युवाच

दैत्येश्वरेण प्रहितो बलवान् बलसंवृतः ।
बलान्नयसि मामेवं ततः किं ते करोम्यहम् ॥८॥

ऋषिरुवाच

इत्युक्त्वा[१५६] सोऽभ्यधावत्तामसुरो धूम्रलोचनः ।
हुंकारेणैव तं भस्म सा चकाराम्बिका ततः ॥९॥
अथ क्रुद्धं महासैन्यमसुराणां तथाम्बिका ।
ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥१०॥
ततो धुतसटः कोपात्कृत्वा नादं सुभैरवम् ।
पपातासुरसेनायां सिंहो देव्याः स्ववाहनः[१५७] ॥११॥
कांश्चित् करप्रहारेण दैत्यानास्येन चापरान् ।
आक्रान्त्या[१५८] चाधरेणान्यान् स जघान[१५९] महासुरान् ॥१२॥
केषांचित्पाटयामास नखैः कोष्ठानि केसरी ।

---

१५५ बलान्नयाम्यद्य इति पाठान्तरम् ।
१५६ इत्युक्त इति पाठान्तरम् ।
१५७ देव्यास्तु वाहनः इति मार्कण्डेयपुराणस्थः पाठः ।
१५८ आक्रम्य इति चतुर्धरीपाठः ।
१५९ चरणेनान्यान्निजघान इति मार्कण्डेयपुराणस्थः पाठः ।

तथा तलप्रहारेण सिरांसि कृतवान् पृथक् ॥१३॥
विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ।
पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥१४॥
क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना ।
तेन केसरिणा देव्या वाहनेनातिकोपिना ॥१५॥
श्रुत्वा तमसुरं देव्या निहतं धूम्रलोचनम् ।
बलं च क्षयितं[१६०] कृत्स्नं देवीकेसरिणा ततः ॥१६॥
चुकोप दैत्याधिपतिः शुम्भः प्रस्फुरिताधरः ।
आज्ञापयामास च तौ चण्डमुण्डौ महासुरौ ॥१७॥
हे चण्ड हे मुण्ड बलैर्बहुभिः[१६१] परिवारितौ ।
गच्छतस्तत्र[१६२] गत्वा च सा समानीयतां लघु ॥१८॥
केशेष्वाकृष्य बद्ध्वा वा यदि वः संशयो युधि ।
तदाऽशेषायुधैः सर्वैरसुरैर्विनिहन्यताम् ॥१९॥
तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ।
शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथाम्बिकाम् ॥२०॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये शुम्भ-निशुम्भसेनानी धूम्रलोचनवधो नाम षष्ठोऽध्यायः ।

एवमादितः ४१२ श्लोकाः ।

---

१६० क्षपित इति शान्तनवीपाठः ।

१६१ बहुलैः इति नागोजीभट्टीगृहीतः पाठः ।

१६२ तत्र गच्छत इति पाठान्तरम् ।

सप्तमोऽध्यायः

ध्यानम्

ॐ ध्यायेयं रत्नपीठे शुककलपठितं श्रृण्वतीं श्यामलाङ्गीं
न्यस्तैकाङ्घ्रिं सरोजे शशिशकलधरां वल्लकीं वादयन्तीम् ।
कह्लाराबद्धमालां नियमितविलसच्चोलिकां रक्तवस्त्रां
मातङ्गीं शङ्खपात्रां मधुरमधुमदां चित्रकोद्भासिभालाम् ॥

ऋषिरुवाच

आज्ञप्तास्ते ततो दैत्याश्चण्डमुण्डपुरोगमाः ।
चतुरङ्गबलोपेता ययुरभ्युद्यतायुधाः ॥१॥
ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थिताम् ।
सिंहस्योपरि शैलेन्द्रश्रृङ्गे महति काञ्चने ॥२॥
ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ।
आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥३॥
ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति ।
कोपेन चास्या वदनं मषीवर्णमभूत्तदा ॥४॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्भुतम्[१६३] ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥५॥
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।
द्वीपिचर्मपरीधाना शुष्कमांसातिभैरवा ॥६॥
अतिविस्तारवदना जिह्वाललनभीषणा ।

---

१६३ द्रुतम् इति पाठान्तरम् ।

निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥७॥
सा वेगेनाभिपतिता घातयन्ती महासुरान् ।
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम् ॥८॥
पार्ष्णिग्राहाङ्कुशग्राहियोधघण्टासमन्वितान् ।
समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥९॥
तथैव योधं तुरगै रथं सारथिना सह ।
निक्षिप्य वक्त्रे दशनैश्चर्वयन्त्यतिभैरवम् ॥१०॥
एकं जग्राह केशेषु ग्रीवायामथ चापरम् ।
पादेनाऽऽक्रम्य चैवान्यमुरसान्यमपोथयत् ॥११॥
तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ।
मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥१२॥
बलिनां तद् बलं सर्वमसुराणां दुरात्मनाम् ।
ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥१३॥
असिना निहताः केचित्केचित्खट्वाङ्गताडिताः ।
जग्मुर्विनाशमसुरा दन्ताग्राभिहतास्तथा[१६४] ॥१४॥
क्षणेन तन्महासैन्यमसुराणां[१६५] निपातितम् ।
दृष्ट्वा चण्डोऽभिदुद्राव तां कालीमतिभीषणाम् ॥१५॥
शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ।
छादयामास चक्रैश्च मुण्डः क्षिप्तैः सहस्रशः ॥१६॥

---

१६४ दन्ताग्राभिहता रणे इति मार्कण्डेयपुराणस्थः पाठः ।
१६५ तद्बलं सर्वमसुराणां इति पाठान्तरम् ।

तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ।
बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥१७॥
ततो जहासातिरुषा भीमं भैरवनादिनी ।
कालीकरालवक्त्रान्तर्दुर्दर्श दशनोज्ज्वला ॥१८॥
उत्थाय च महासिंहं देवी चण्डमधावत ।
गृहीत्वा चास्य केशेषु शिरस्तेनासिनाच्छिनत् ॥१९॥
छिन्ने शिरसि दैत्यैन्द्रश्चक्रे नादं सुभैरवम् । +
तेन नादेन महता त्रासितं भुवनत्रयम् ॥२०॥[१६६] +
अथ मुण्डोऽभ्यधावत्तां दृष्ट्वा चण्डं निपातितम् ।
तमप्यपातयद्भूमौ खट्वाङ्गाभिहतं रुषा [१६७] ॥२१॥
हतशेषं ततः सैन्यं दृष्ट्वा चण्डं निपातितम् ।
मुण्डं च सुमहावीर्यं दिशो भेजे भयातुरम् ॥२२॥
शिरश्चण्डस्य काली च[१६८] गृहीत्वा मुण्डमेव च ।
प्राह प्रचण्डाट्टहासमिश्रमभ्येत्य चण्डिकाम् ॥२३॥

श्रीदेव्युवाच[१६९]

मयातवात्रोपहृतौचण्डमुण्डौ महापशू ।
युद्धयज्ञे स्वयं शुम्भं निशुम्भं च हनिष्यसि ॥२४॥

---

१६६ अयं श्लोको मार्कण्डेयपुराणे उपलभ्यते,गुप्तवतीटीकायां शान्तनव्यां च गृहीतः ।

१६७ सा खड्गाभिहतं रुषा इति पाठान्तरम् ।

१६८ सा इति मार्कण्डेयपुराणस्थः पाठः ।

१६९ अयं पाठोऽन्यत्र न विद्यते ।

ऋषिरुवाच

तावानीतौ ततो दृष्ट्वा चण्डमुण्डौ महासुरौ ।
उवाच कालीं कल्याणीं[170] ललितं चण्डिका वचः[171] ॥२५॥
यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि भविष्यसि ॥२६॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
चण्डमुण्डबधो नाम सप्तमोऽध्यायः ।

एवमादितः ४३८ श्लोकाः ।

---

१७० कल्याणी इति पाठान्तरम् ।

१७१ मार्कण्डेयपुराणे इतः परं श्रीदेव्युवाच इति पाठः प्राप्यते ।

अष्टमोऽध्यायः

ध्यानम्

ॐ अरुणां करुणातरङ्गिताक्षीं धृतपाशाङ्कुशबाणचापहस्ताम् ।
अणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीम् ॥

ऋषिरुवाच

चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ।
बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥१॥
ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ।
उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥२॥
अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ।
कम्बूनां चतुरशीतिर्निर्यान्तु स्वबलैर्वृताः ॥३॥
कोटिवीर्याणि पञ्चाशदसुराणां कुलानि वै ।
शतं कुलानि धौम्राणां निर्गच्छन्तु ममाज्ञया ॥४॥
कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ।
युद्धाय सज्जा निर्यान्तु आज्ञया त्वरिता मम ॥५॥
इत्याज्ञाप्यासुरपतिः शुम्भो भैरवशासनः ।
निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥६॥
उत्पाता बहवस्तत्र प्रादुरासन्सहस्रशः । +
युगान्तमेघा ववृषुरस्थिशोणितकर्दमाः ॥७॥ +

क्रव्यादा व्यजनं घोरं शिवाश्चापि च वा शिरे । +

तानुत्पातानानादृत्य प्रययौ सा हिमालयम् ॥८॥ +
आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥९॥
ततः सिंहो महानादमतीव कृतवान् नृप ।
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ॥१०॥
धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥११॥
तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः[१७२] परिवारिताः ॥१२॥
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामरसिंहानामतिवीर्यबलान्विताः ॥१३॥
ब्रह्मेशगुहविष्णूनां तथैवेन्द्रस्य[१७३] शक्तयः
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१४॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥१५॥
हंसयुक्तविमानाग्रे[१७४] साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साऽभिधीयते ॥१६॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखा[१७५] विभूषणा ॥१७॥

---

१७२ शरोघैः इति मार्कंडेयपुराणस्थः पाठः ।
१७३ तथेन्द्रस्य च इति पाठान्तरम् ।
१७४ हंसयुक्तविमानस्था इति मार्कण्डेयपुराणस्थः पाठः ।
१७५ चन्द्रलेखा इति मार्कण्डेयपुराणस्थः पाठः ।

कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥१८॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताऽभ्युपाययौ ॥१९॥
यज्ञवाराहमतुलं[१७६] रूपं या बिभ्रतो[१७७] हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥२०॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२१॥
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥२२॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम् ॥२३॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥२४॥
सा चाह धूम्रजटिलमीशानमपराजिता ।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥२५॥
ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥२६॥
त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥२७॥

---

१७६ जज्ञे वाराहमतुलम् इति मार्कण्डेयपुराणस्थः पाठः ।
१७७ विभ्रती मार्कण्डेयपुराणस्थः पाठः ।

तानुत्पातानानादृत्य प्रययौ सा हिमालयम् ॥८॥ +
आयान्तं चण्डिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनान्तरम् ॥९॥
ततः सिंहो महानादमतीव कृतवान् नृप ।
घण्टास्वनेन तन्नादमम्बिका चोपबृंहयत् ॥१०॥
धनुर्ज्यासिंहघण्टानां नादापूरितदिङ्मुखा ।
निनादैर्भीषणैः काली जिग्ये विस्तारितानना ॥११॥
तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशम् ।
देवी सिंहस्तथा काली सरोषैः[१७२] परिवारिताः ॥१२॥
एतस्मिन्नन्तरे भूप विनाशाय सुरद्विषाम् ।
भवायामरसिंहानामतिवीर्यबलान्विताः ॥१३॥
ब्रह्मेशगुहविष्णूनां तथैवेन्द्रस्य[१७३] शक्तयः
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चण्डिकां ययुः ॥१४॥
यस्य देवस्य यद्रूपं यथाभूषणवाहनम् ।
तद्वदेव हि तच्छक्तिरसुरान् योद्धुमाययौ ॥१५॥
हंसयुक्तविमानाग्रे[१७४] साक्षसूत्रकमण्डलुः ।
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साऽभिधीयते ॥१६॥
माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ।
महाहिवलया प्राप्ता चन्द्ररेखा[१७५] विभूषणा ॥१७॥

---

१७२ शरोघैः इति मार्कंडेयपुराणस्थः पाठः ।
१७३ तथेन्द्रस्य च इति पाठान्तरम् ।
१७४ हंसयुक्तविमानस्था इति मार्कण्डेयपुराणस्थः पाठः ।

१७५ चन्द्रलेखा इति मार्कण्डेयपुराणस्थः पाठः ।

कौमारी शक्तिहस्ता च मयूरवरवाहना ।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥१८॥
तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ।
शङ्खचक्रगदाशार्ङ्गखड्गहस्ताऽभ्युपाययौ ॥१९॥
यज्ञवाराहमतुलं[176] रूपं या बिभ्रतो[177] हरेः ।
शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥२०॥
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ।
प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२१॥
वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ।
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥२२॥
ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ।
हन्यन्तामसुराः शीघ्रं मम प्रीत्याऽऽह चण्डिकाम् ॥२३॥
ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा ।
चण्डिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ॥२४॥
सा चाह धूम्रजटिलमीशानमपराजिता ।
दूत त्वं गच्छ भगवन् पार्श्वं शुम्भनिशुम्भयोः ॥२५॥
ब्रूहि शुम्भं निशुम्भं च दानवावतिगर्वितौ ।
ये चान्ये दानवास्तत्र युद्धाय समुपस्थिताः ॥२६॥
त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः ।
यूयं प्रयात पातालं यदि जीवितुमिच्छथ ॥२७॥

---

१७६ [illegible] वाराहमतुलम् इति मार्कण्डेयपुराणस्थः पाठः ।

१७७ विभ्रती मार्कण्डेयपुराणस्थः पाठः ।

बलावलेपादथ चेद्भवनतो युद्धकाङ्क्षिणः ।
तदागच्छत तृप्यन्तु मच्छिवाः पिशितेन वः ॥२८॥
यतो नियुक्तो दौत्येन[१७८] तया देव्या शिवः स्वयम् ।
शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता ॥२९॥
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ।
अमर्षापूरिता जग्मुर्यतः[१७९] कात्यायनी स्थिता ॥३०॥
ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ।
ववर्षु[१८०] रुद्धतामर्षास्तां देवीममरारयः ॥३१॥
सा च तान्[१८१] प्रहितान् बाणाञ्शूलशक्तिपरश्वधान् ।
चिच्छेद लीलयाऽऽध्मातधनुर्मुक्तैर्महेषुभिः ॥३२॥
तस्याग्रतस्तथा काली शूलपातविदारितान् ।
खट्वाङ्गपोथिताँश्चान्यान्[१८२] कुर्वती व्यचरत्तदा ॥३३॥
कमण्डलुजलाक्षेपहतवीर्यान् हतौजसः ।
ब्रह्माणी चाकरोच्छत्रून् येन येन स्म धावति ॥३४॥
माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ।
दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥३५॥
ऐन्द्रीकुलिशपातेन शतशो दैत्यदानवाः ।

---

१७८ दूत्येन इति मार्कण्डेयपुराणस्थः पाठः ।
१७९ यत्र इति पाठान्तरम् ।
१८० ववृषुः इति पाठान्तरम् ।
१८१ तत् इति मार्कण्डेयपुराणस्थः पाठः ।
१८२ चारीन् इति पाठान्तरम् ।

पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ॥३६॥
तुण्डप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः ।
वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥३७॥
नखैर्विदारितांश्चान्यान् भक्षयन्ती महासुरान् ।
नारसिंही चचाराजौ नादापूरितदिङ्मुखी[१८३]॥३८॥
चण्डाट्टहासैरसुराः शिवदूत्यभिदूषिताः ।
पेतुः पृथिव्यां पतिता[१८४]स्तांश्चखादाथ सा तदा ॥३९॥
इति मातृगणं क्रुद्धं मर्दयन्तं महासुरान् ।
दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ॥४०॥
पलायनपरान् दृष्ट्वा दैत्यान् मातृगणार्दितान् ।
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो महासुरः ॥४१॥
भागिनेयो महावीर्यस्तयोः शुम्भनिशुम्भयोः । +
क्रोधवत्याः सुतो राजन्[१८५] महाबलपराक्रमः ॥४२॥[१८६]+
बन्धुजीवप्रसूनेन सदृशा रक्तबिन्दवः ।
रक्तबिन्दुः क्षितीस्पृक्सञ्जायते तत्समोऽसुरः ॥४३॥[१८७]
रक्तबिन्दुर्यदा भूमौ पतत्यस्य शरीरतः ।

---

१८३ नादापूर्णदिगन्तरा इति मार्कण्डेयपुराणस्थः पाठः, नादापूर्णदिगम्बरा इत्यपि पाठः ।
१८४ पेतुर्विदारिता भूमौ इति पाठान्तरम् ।
१८५ ज्येष्ठो इति गुप्तवतीपाठः ।
१८६ अयं श्लोको गुप्तवत्या गृहीतः ।
१८७ अयं पाठ शान्तनव्यां व्याख्यातः ।

समुत्पतति मेदिन्या[१८८]स्तत्प्रमाणो महासुरः[१८९] ॥४४॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥४५॥
कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४६॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥४७॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥४८॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥४९॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥५०॥
वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥५१॥
शक्त्या जघान कौमारी वाराही च तथाऽसिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥५२॥
ताडयामास हृदये न चचार तथापि सः[१९०] । +
स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ॥५३॥

---

१८८ मेदिन्याम् इति पाठान्तरम् ।
१८९ तत्प्रमाणस्तदासुरः इति पाठान्तरम् ।
१९० अयं पाठः शान्तनव्यां व्याख्यातः ।

मातृः कोपसमाविष्टो रक्तबीजो महासुरः ।
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।५४।।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ।
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।।५५।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ।
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरम्[१९१] ।।५६।।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ।
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून्महासुरान् ।।५७।।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता[१९२] ।
भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ।।५८।।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ।
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।।५९।।

ऋषिरुवाच

इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ।
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।।६०।।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ।
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।।६१।।
तस्याऽऽहतस्य देहात्तु बहु सुस्राव शोणितम् ।
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ।।६२।।

१९१ सत्त्वरा इति पाठान्तरम् ।
१९२ वेगिना इति शान्तनवीपाठः ।

समुत्पतति मेदिन्या[१८८]स्तत्प्रमाणो महासुरः[१८९] ॥४४॥
युयुधे स गदापाणिरिन्द्रशक्त्या महासुरः ।
ततश्चैन्द्री स्ववज्रेण रक्तबीजमताडयत् ॥४५॥
कुलिशेनाहतस्याशु बहु सुस्राव शोणितम् ।
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४६॥
यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ।
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥४७॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसम्भवाः ।
समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥४८॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ।
ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥४९॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ।
गदया ताडयामास ऐन्द्री तमसुरेश्वरम् ॥५०॥
वैष्णवीचक्रभिन्नस्य रुधिरस्रावसम्भवैः ।
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥५१॥
शक्त्या जघान कौमारी वाराही च तथाऽसिना ।
माहेश्वरी त्रिशूलेन रक्तबीजं महासुरम् ॥५२॥
ताडयामास हृदये न चचार तथापि सः[१९०] । +
स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ॥५३॥

---

१८८ मेदिन्याम् इति पाठान्तरम् ।
१८९ तत्प्रमाणस्तदासुरः इति पाठान्तरम् ।
१९० अयं पाठः शान्तनव्या व्याख्यातः ।

मातृः कोपसमाविष्टो रक्तबीजो महासुरः ।
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि ।।५४।।
पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ।
तैश्चासुरासृक्सम्भूतैरसुरैः सकलं जगत् ।।५५।।
व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमम् ।
तान् विषण्णान् सुरान् दृष्ट्वा चण्डिका प्राह सत्वरम्[१९१] ।।५६।।
उवाच कालीं चामुण्डे विस्तीर्णं वदनं कुरु ।
मच्छस्त्रपातसम्भूतान् रक्तबिन्दून्महासुरान् ।।५७।।
रक्तबिन्दोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता[१९२] ।
भक्षयन्ती चर रणे तदुत्पन्नान्महासुरान् ।।५८।।
एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ।
भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यन्ति चापरे ।।५९।।

ऋषिरुवाच

इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तम् ।
मुखेन काली जगृहे रक्तबीजस्य शोणितम् ।।६०।।
ततोऽसावाजघानाथ गदया तत्र चण्डिकाम् ।
न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि ।।६१।।
तस्याऽऽहतस्य देहात्तु बहु सुस्राव शोणितम् ।
यतस्ततस्तद्वक्त्रेण चामुण्डा सम्प्रतीच्छति ।।६२।।

---

१९१ सत्त्वरा इति पाठान्तरम् ।
१९२ वेगिना इति शान्तनवीपाठः ।

मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ।
तांश्चखादाथचामुण्डापपौतस्यच शोणितम्॥६३॥
देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ।
जघान रक्तबीजं तं चामुण्डापीतशोणितम् ॥६४॥
स पपात महीपृष्ठे शस्त्रसङ्घसमाहतः[१९३] ।
नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥६५॥
ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ।
तेषां मातृगणो मत्तो[१९४] ननर्तासृङ्मदोद्धतः ॥६६॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरेदेवीमाहात्म्ये
रक्तबीजवधो नाम अष्टमोऽध्याय : ।
एवमादितः ५०४ श्लोकाः ।

---

१९३ शस्त्रसंहतितो हतः इति मार्कण्डेयपुराणस्थः पाठः ।
१९४ हते मातृगणास्तस्मिन् इति पाठान्तरम् ।

नवमोऽध्यायः

ध्यानम्

ॐ बन्धूककाञ्चननिभं रुचिराक्षमालाम्
पाशाङ्कुशौ च वरदां निजबाहुदण्डैः ।
बिभ्राणमिन्दुशकलाभरणं त्रिनेत्र-
मर्धाम्बिकेशमनिशं वपुराश्रयामि ॥

राजोवाच

विचित्रमिदमाख्यातं भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितम् ॥१॥
भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ।
चकार शुम्भो यत्कर्म निशुम्भश्चातिकोपनः ॥२॥

ऋषिरुवाच

चकार कोपमतुलं रक्तबीजे निपातिते ।
शुम्भासुरो निशुम्भश्च हतेष्वन्येषु चाहवे ॥३॥
हन्यमानं महासैन्यं विलोक्यामर्षमुद्वहन् ।
अभ्यधावन्निशुम्भोऽथ मुख्ययासुरसेनया ॥४॥
तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुराः ।
संदष्टौष्ठपुटाः क्रुद्धा हन्तुं देवीमुपाययुः ॥५॥
आजगाम महावीर्यः शुम्भोऽपि स्वबलैर्वृतः ।

निहन्तुं चण्डिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥६॥
ततो युद्धमतीवासीद्देव्या शुम्भनिशुम्भयोः ।
शरवर्षमतीवोग्रं मेघयोरिव वर्षतोः ॥७॥
चिच्छेदास्ताञ्छरांस्ताभ्यां चण्डिका स्वशरोत्करैः ।
ताडयामास चाङ्गेषु शस्त्रौघैरसुरेश्वरौ ॥८॥
निशुम्भो निशितं खड्गं चर्म चादाय सुप्रभम् ।
अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥९॥
ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमम् ।
निशुम्भस्याशु चिच्छेद चर्म चाप्यष्टचन्द्रकम् ॥१०॥
छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागताम् ॥११॥
कोपाध्मातो निशुम्भोऽथ शूलं जग्राह दानवः ।
आयान्तं[१९५] मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥१२॥
आदायाथ[१९६] गदां सोऽपि चिक्षेप चण्डिकां प्रति ।
सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥१३॥
ततः परशुहस्तं तमायान्तं दैत्यपुङ्गवम् ।
आहत्य देवी बाणौघैरपातयत भूतले ॥१४॥
तस्मिन्निपतिते भूमौ निशुम्भे भीमविक्रमे ।
भ्रातर्यतीव संक्रुद्धः प्रययौ हन्तुमम्बिकाम् ॥१५॥

---

१९५ आयातम् इति पाठान्तरम् ।

१९६ आविध्याथ,अथादय इति वा पाठान्तरम् ।

स रथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः ॥१६॥
तमायान्तं समालोक्य देवी शङ्खमवादयत् ।
ज्याशब्दं चापि धनुषश्चकारातीव दुःसहम् ॥१७॥
पूरयामास ककुभो निजघण्टास्वनेन च ।
समस्तदैत्यसैन्यानां तेजोवधविधायिना ॥१८॥
ततः सिंहो महानादैस्त्याजितेभमहामदैः ।
पूरयामास गगनं गां तथैव दिशो दश ॥१९॥
ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ।
कराभ्यां तन्निनादेन प्राक्स्वनास्ते तिरोहिताः ॥२०॥
अट्टाट्टहासमशिवं शिवदूती चकार ह ।
तैः शब्दैरसुरास्त्रेसुः शुम्भः कोपं परं ययौ ॥२१॥
दुरात्मंस्तिष्ठ तिष्ठेति व्याजहाराम्बिका यदा ।
तदा जयेत्यभिहितं देवैराकाशसंस्थितैः ॥२२॥
शुम्भेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा सा निरस्ता महोल्कया ॥२३॥
सिंहनादेन शुम्भस्य व्याप्तं लोकत्रयान्तरम् ।
निर्घातनिःस्वनो घोरो जितवानवनीपते ॥२४॥
शुम्भमुक्ताञ्छरान्देवी शुम्भस्तत्प्रहिताञ्छरान् ।
चिच्छेद स्वशरैरुग्रैः शतशोऽथ सहस्रशः ॥२५॥
ततः सा चण्डिका क्रुद्धा शूलेनाभिजघान तम् ।

स तदाऽभिहतो भूमौ मूर्च्छितो निपपात ह ॥२६॥
ततो निशुम्भः सम्प्राप्य चेतनामात्तकार्मुकः ।
आजघान शरैर्देवीं कालीं केसरिणं तथा ॥२७॥
पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः ।
शक्रायुधेन[१९७] दितिजश्छादयामास चण्डिकाम् ॥२८॥
ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी ।
चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥२९॥
ततो निशुम्भो वेगेन गदामादाय चण्डिकाम् ।
अभ्यधावत वै हन्तुं दैत्यसेनासमावृतः ॥३०॥
तस्यापतत एवाशु गदां चिच्छेद चण्डिका ।
खड्गेन शितधारेण स च शूलं समाददे ॥३१॥
शूलहस्तं समायान्तं निशुम्भममरार्दनम् ।
हृदि विव्याध शूलेन वेगाविद्धेन चण्डिका ॥३२॥
भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः ।
महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥३३॥
तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः ।
शिरश्चिच्छेद खड्गेन ततोऽसावपतद् भुवि ॥३४॥
ततः सिंहश्चखादोग्रं दंष्ट्राक्षुण्णशिरोधरान्[१९८] ।
असुरांस्तांस्तथा काली शिवदूती तथापरान् ॥३५॥

---

१९७ चक्रायुतेन, चक्रायुधेन इति पाठान्तरम् ।

१९८ महीतलान् इति पाठान्तरम् ।

कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः ।
ब्रह्माणीमन्त्रपूतेन तोयेनान्ये निराकृताः ॥३६॥
माहेश्वरीत्रिशूलेन भिन्नाः पेतुस्तथाऽपरे ।
वाराहीतुण्डघातेन केचिच्चूर्णीकृता भुवि ॥३७॥
खण्डं खण्डं च चक्रेण वैष्णव्या दानवाः कृताः ।
नारसिंह्या तथा दैत्या नखैरुग्रैर्विदारिताः ॥३८॥ +
वज्रेण चैन्द्रीहस्ताग्रविमुक्तेन तथापरे ।
अट्टाट्टहासैर्हुंकारैः सिंहेन च न्यपातयत् ॥३९॥ +
केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात् ।
भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः ॥४०॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
निशुम्भवधो नाम नवमोऽध्यायः।

एवमादितः ५४४ श्लोकाः ।

दशमोऽध्यायः

ध्यानम्

ॐ उत्तप्तहेमरुचिरां रविचन्द्रवह्नि-
नेत्रां धनुश्शरयुताङ्कुशपाशशूलम् ।
रम्यैर्भुजैश्च दधतीं शिवशक्तिरूपां
कामेश्वरीं हृदि भजामि धृतेन्दुलेखाम् ॥

ऋषिरुवाच

निशुम्भं निहतं दृष्ट्वा भ्रातरं प्राणसम्मितम् ।
हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥१॥
बलावलेपाद्दुष्टे त्वं मा दुर्गे गर्वमावह ।
अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनी ॥२॥

श्रीदेव्युवाच

एकैवाहं जगत्यत्र द्वितीया का ममापरा ।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥३॥

ऋषिरुवाच[१९९]

ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयम् ।
तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥४॥

---

१९९ पाठोऽयं मार्कण्डेयपुराणेऽपि प्राप्यते अन्यत्र तु न ।

श्रीदेव्युवाच

अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ।
तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥५॥

ऋषिरुवाच

ततः प्रववृते युद्धं देव्याः शुम्भस्य चोभयोः ।
पश्यतां सर्वदेवानामसुराणां च दारुणम् ॥६॥
शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ।
तयोर्युद्धमभूद्भूयः सर्वलोकभयङ्करम् ॥७॥
दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ।
बभञ्ज तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥८॥
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ।
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभिः ॥९॥
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ।
साऽपि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः ॥१०॥
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम् ॥११॥
ततः खड्गमुपादाय शतचन्द्रं च भानुमत् ।
अभ्यधावत[२००] तां देवीं दैत्यानामधिपेश्वरः ॥१२॥
तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका ।

---

२०० अभ्यधावत्तदा इति पाठान्तरम् ।

धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम् ॥१३॥
अश्वांश्च पातयामास रथं सारथिना सह[२०१] । +
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः ॥१४॥
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः ।
चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥१५॥
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान् ।
स मुष्टिं पातयामास हृदये दैत्यपुङ्गवः ॥१६॥
देव्यास्तं चापि सा देवी तलेनोरस्यताडयत् ।
तलप्रहाराभिहतो निपपात महीतले ॥१७॥
स दैत्यराजः सहसा पुनरेव तथोत्थितः ।
उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥१८॥
तत्रापि सा निराधारा युयुधे तेन चण्डिका ।
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम् ॥१९॥
चक्रतुः प्रथमं युद्धं[२०२] मुनिविस्मयकारकम् ।
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह ॥२०॥
उत्पात्य भ्रामयामास चिक्षेप धरणीतले ।
स क्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ॥२१॥
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ।
तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम् ॥२२॥

---

२०१ पाठोऽयं मार्कण्डेयपुराणेऽपि प्राप्यते ।

२०२ सिद्धम् इति पाठान्तरम् ।

जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ।
स गतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः ॥२३॥
चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वताम् ।
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि ॥२४॥
जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ।[२०३]
उत्पातमेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥२५॥
सरितो मार्गवाहिन्यस्तथा शुम्भे निपातिते ।[२०४]
ततो देवगणाः सर्वे हर्षनिर्भरमानसाः ॥२६॥
बभूवुर्निहते तस्मिन् गन्धर्वा ललितं जगुः ।
अवादयंस्तथैवान्ये ननृतुश्चाप्सरोगणाः ॥२७॥
ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ।
जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनितस्वनाः ॥२८॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
शुम्भवधो नाम दशमोऽध्यायः ।

एवमादितः ५७२ श्लोकाः ।

---

२०३ जगत्स्वास्थ्यमतीवासीन्निर्मलं इत्यपि पाठः ।

२०४ तथासंस्तत्र पातिते इति पाठान्तरम् ।

एकादशोऽध्यायः

ध्यानम्

ॐ बालरविद्युतिमिन्दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम् ।
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां प्रभजे भुवनेशीम् ॥

ऋषिरुवाच

देव्या हते तत्र महासुरेन्द्रे
सेन्द्राःसुरा वह्निपुरोगमास्ताम् ।
कात्यायनीं तुष्टुवुरिष्टलाभाद्
विकाशिवक्त्राब्जविकाशिताशाः[२०५] ॥१॥
देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य ॥२॥
आधारभूता जगतस्त्वमेका
महीस्वरूपेण यतः स्थितासि ।
अपां स्वरूपस्थितया त्वयैत-
दाप्यायते कृत्स्नमलङ्घ्यवीर्ये ॥३॥
त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासि माया ।

---

२०५ इतः परं मार्कण्डेयपुराणे देवा ऊचुः इति पाठः प्राप्यते ।

सम्मोहितं देवी समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥४॥
विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु[२०६] ।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः ॥५॥

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी[२०७] ।
त्वं स्तुता स्तुतये का वा भवन्तु[२०८] परमोक्तयः ॥६॥
सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥७॥
कलाकाष्ठादिरूपेण परिणामप्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥८॥
सर्वमङ्गलमाङ्गल्ये[२०९] शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥९॥
सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥१०॥
शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ॥११॥

---

२०६ सकलं जगच्च इति मार्कण्डेयपुराणस्थः पाठः ।
२०७ भुक्तिमुक्तिप्रदायिनी इति मार्कण्डेयपुराणस्थः पाठः ।
२०८ भवन्ति इति मार्कण्डेयपुराणस्थः पाठः ।
२०९ माङ्गल्ये इति पाठान्तरम् ।

दशवक्त्रे दशभुजे त्रिंशल्लोचनराजिते । +
महाकालीतिविख्याते नारायणि नमोऽस्तु ते ॥१२॥ +
पद्मालये पद्महस्ते अष्टैश्वर्यप्रसेविते । +
महालक्ष्मीतिविख्याते नारायणि नमोऽस्तु ते ॥१३॥ +
वेदागमादिरूपेण वाग्विलासाक्षरात्मिके । +
महासरस्वतीदेवी नारायणि नमोऽस्तु ते ॥१४॥ +
मधुकैटभनाशार्थं कल्पान्तावसरे तदा । +
ब्रह्मस्तुतिनुते देवि नारायणि नमोऽस्तु ते ॥१५॥ +
सर्वदेवमयेरुद्रे अष्टादशभुजे परे । +
सैन्यहन्त्रीतिविख्याते नारायणि नमोऽस्तु ते ॥१६॥ +
महिषासुरनाशार्थं सिंहस्कन्धोपरिस्थिते । +
वीरशक्तिरितिख्याते नारायणि नमोऽस्तु ते ॥१७॥ +
हूँकारवीक्षणेनैव हतधूम्राक्षसैनिके । +
हिमाचलस्य श्रृङ्गेऽस्मिन् नारायणि नमोऽस्तु ते ॥१८॥ +
हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि ।
अक्षसूत्रधरे[२१०] देवि नारायणि नमोऽस्तु ते ॥१९॥
त्रिशूलचन्द्राहिधरे महावृषभवाहिनि ।
माहेश्वरीस्वरूपेण नारायणि नमोऽस्तु ते ॥२०॥
मयूरकुक्कुटवृते महाशक्तिधरेऽनघे ।
कौमारीरूपसंस्थाने नारायणि नमोऽस्तु ते ॥२१॥

---

२१० कौशाम्भःक्षरिके इति पाठान्तरम्।

शङ्खचक्रगदाशार्ङ्गगृहीतपरमायुधे ।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते ॥२२॥
गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे नारायणि नमोऽस्तु ते ॥२३॥
नृसिंहरूपेणोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥२४॥
किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥२५॥
शिवदूतीस्वरूपेण हतदैत्यमहाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥२६॥
दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥२७॥
कालरात्रीस्वरूपेण त्रैलोक्यमथनोद्यमे । +
महाकालि महामाये नारायणि नमोऽस्तुते ॥२८॥+
महालक्ष्मी शिवे शान्ते सर्वसिद्धे पराजिते । +
महारात्रि महावीर्ये नारायणि नमोऽस्तुते ॥२९॥ +
उमे दुर्गे भर्गो भद्रे रौद्रारौद्रे कपर्दिनि । +
कालरात्रीवृते गौरि नारायणि नमोऽस्तु ते ॥३०॥ +
श्रीमायाकालिके चेति चण्डिका चेति विश्रुते । +
नवार्णा वेति विख्याते नारायणि नमोऽस्तु ते ॥३१॥ +
सायुधैर्बहुभिर्दिव्यैर्दोर्दण्डैश्च विराजिते । +

शान्ति दुर्गेति विख्याते नारायणि नमोऽस्तु ते ॥३२॥ +

सर्वभूतशरीरेषु बहिरन्तर्व्यवस्थिते । +

सर्वव्यापिनि सर्वज्ञे नारायणि नमोऽस्तु ते ॥३३॥ +

लक्ष्मी लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ।

महारात्रिमहामाये[211] नारायणि नमोऽस्तु ते ॥३४॥

मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।

नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते ॥३५॥

रक्तबीजविनाशार्थं विस्तीर्णवदनाम्बुजे । +

चण्डिकाशक्तिरत्युग्रे नारायणि नमोऽस्तु ते ॥३६॥ +

मातृसैन्यावृते गौरि दक्षिणे कालिके परे । +

निशुम्भदर्पदमने नारायणि नमोऽस्तु ते ॥३७॥ +

ब्राह्म्यादिमूर्तिसंकासे सायुधाष्टभुजे परे । +

दैत्यराजान्तके देवि नारायणि नमोऽस्तु ते ॥३८॥ +

सर्वतः पाणिपादान्ते सर्वतोऽक्षिशिरोमुखि ।

सर्वतः श्रवणे घ्राणे नारायणि नमोऽस्तु ते ॥३९॥[212] +

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।

भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥४०॥

सर्वदेवाधिदेवस्य सर्वस्यामिततेजसे । +

सर्वप्राणहराध्यक्षे नारायणि नमोऽस्तु ते ॥४१॥ +

सर्वेषामेव भूतानां भुक्तिमुक्तिप्रदायिनि । +

२११ महाऽविद्ये इति पाठान्तरम् ।

२१२ श्लोकोऽयं मार्कण्डेयपुराणे उपलभ्यते, शान्तनव्यां च गृहीतः ।

सर्वदुःखहरे देवि नारायणि नमोऽस्तु ते ॥४२॥ +
सर्वभूतप्रशमनि सर्वोपद्रवनाशिनि । +
सर्वकामप्रदे देवि नारायणि नमोऽस्तु ते ॥४३॥ +
एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः[213] कात्यायनि नमोऽस्तु ते ॥४४॥
ज्वालाकरालमत्युग्रमशेषासुरसूदनम् ।
त्रिशूलं पातु नो भीतेर्भद्रकालि नमोऽस्तु ते ॥४५॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्योऽनः सुतानिव ॥४६॥
असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥४७॥

रोगानशेषानपहंसि तुष्टा
रुष्टा तु[214] कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥४८॥

एतत्कृतं यत्कदनं त्वयाद्य
धर्मद्विषां देवि महासुराणाम् ।
रूपैरनेकैर्बहुधाऽऽत्ममूर्तिं
कृत्वाम्बिके तत्प्रकरोति कान्या ॥४९॥

---

२१३ सर्वभूतेभ्य इति पाठान्तरम् ।
२१४ ददासि इति मार्कण्डेयपुराणस्थः पाठः ।

विद्यासु शास्त्रेषु विवेकदीपे -

ष्वाद्येषु वाक्येषु च का त्वदन्या ।

ममत्वगर्तेऽतिमहान्धकारे

विभ्रामयस्येतदतीव[२१५] विश्वम् ॥५०॥

रक्षांसि यत्रोग्रविषाश्च नागा

यत्रारयो दस्युबलानि यत्र ।

दावानलो यत्र तथाब्धिमध्ये

तत्र स्थिता त्वं परिपासि विश्वम् ॥५१॥

विश्वेश्वरि त्वं परिपासि विश्वं

विश्वात्मिका धारयसीति विश्वम् ।

विश्वेशवन्द्या भवती भवन्ति

विश्वाश्रया ये त्वयि भक्तिनम्राः ॥५२॥

देवि प्रसीद परिपालय नोऽरिभीते-

र्नित्यं यथासुरवधादधुनैव सद्यः ।

पापानि सर्वजगतां प्रशमं नयाशु

उत्पातपाकजनितांश्च महोपसर्गान् ॥५३॥

प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि ।

त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ॥५४॥

---

२१५ विभ्रामयत्येतदतीव इति पाठान्तरम् ।

श्रीदेव्युवाच

वरदाहं सुरगणा वरं यन्मनसेच्छथ ।
तं वृणुध्वं प्रयच्छामि जगतामुपकारकम् ॥५५॥

देवा ऊचुः

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया[२१६] कार्यमस्मद्वैरिविनाशनम् ॥५६॥

श्रीदेव्युवाच

वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ ॥५७॥
नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥५८॥
पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि वैप्रचित्तान् महासुरान्[२१७] ॥५९॥
भक्षयन्त्यास्तथैवोग्रान्[२१८] वैप्रचित्तान् महासुरान् ।
रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥६०॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥६१॥

---

२१६ एवमेतत्त्वया इति मार्कण्डेयपुराणस्थः पाठः ।
२१७ वैप्रचित्तांस्तु दानवान् इति पाठान्तरम् ।
२१८ भक्षयन्त्याश्च तानुग्रान् इति पाठान्तरम् ।

भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ।
मुनिभिः संस्तुता भूमौ सम्भविष्याम्ययोनिजा ॥६२॥
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां ततः ॥६३॥
ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ।
भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥६४॥
शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥६५॥
दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥६६॥
रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥६७॥
भीमादेवीति विख्यातं तन्मे नाम भविष्यति ।
यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥६८॥
तदाहं भ्रामरं रूपं कृत्वाऽसंख्येयषट्पदम् ।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥६९॥
भ्रामरीति च मां लोकास्तदा स्तोष्यन्ति सर्वतः ।
रक्ताक्षं च हनिष्यामि रक्तचण्डीति नामतः॥७०॥ +
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ।
तदा तदाऽवतीर्याहं करिष्याम्यरिसंक्षयम् ॥७१॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे
देवीमाहात्म्ये नारायणीस्तुतिर्नामैकादशोऽध्यायः।

एवमादितः ६४३ श्लोकाः ।

द्वादशोऽध्यायः

ध्यानम्

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

श्रीदेव्युवाच

एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ।
तस्याहं सकलां बाधां नाशयिष्याम्यसंशयम् ॥१॥
मधुकैटभनाशं च महिषासुरघातनम् ।
कीर्तयिष्यन्ति ये तद्वद् वधं शुम्भनिशुम्भयोः ॥२॥
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ।
श्रोष्यन्ति चैव ये भक्त्या मम माहात्म्यमुत्तमम् ॥३॥
न तेषां दुष्कृतं किञ्चिद् दुष्कृतोत्था न चापदः ।
भविष्यति न दारिद्र्यं न चैवेष्टवियोजनम् ॥४॥
शत्रुतो न भयं तस्य दस्युतो वा न राजतः ।
न शस्त्रानलतोयौघात्कदाचित्सम्भविष्यति ॥५॥
तस्मान्ममैतन्माहात्म्यं पठितव्य समाहितैः ।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् [२१९] ॥६॥

---

२१९ हि तत् इति पाठान्तरम् ।

उपसर्गानशेषाँश्च[२२०] महामारीसमुद्भवान् ।
तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥७॥
यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम ॥
सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितम् ॥८॥
बलिप्रदाने पूजायामग्निकार्ये महोत्सवे ।
सर्वं ममेतच्चरितमुच्चार्यं श्राव्यमेव च ॥९॥
जानताऽजानता वापि बलिपूजां तथा कृताम् ।
प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतम् ॥१०॥
शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥११॥
सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥१२॥
श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः[२२१] शुभाः ।
पराक्रमं च[२२२] युद्धेषु जायते निर्भयः पुमान् ॥१३॥
रिपवः संक्षयं यान्ति कल्याणं चोपपद्यते ।
वर्धते[२२३] च कुलं पुंसां माहात्म्यं मम श्रृण्वताम् ॥१४॥
शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ।
ग्रहपीडासु चोग्रासु माहात्म्यं श्रृणुयान्मम ॥१५॥
उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः ।

---

२२० उपसर्गानशेषांस्तु इति पाठान्तरम् ।
२२१ तथोत्पत्तिः पृथक् इति मार्कण्डेयपुराणस्थः पाठः ।
२२२ पराक्रमांश्च इति मार्कण्डेयपुराणस्थः पाठः ।
२२३ नन्दते इति पाठान्तरम् ।

दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥१६॥
बालग्रहाभिभूतानां बालानां शन्तिकारकम् ।
संघातभेदे च नृणां मैत्रीकरणमुत्तमम् ॥१७॥
दुर्वृत्तानामशेषाणां बलहानिकरं परम् ।
रक्षोभूतपिशाचानां पठनादेव नाशनम् ॥१८॥
सर्वमेवैतच्चरितं[२२४] मम सान्निध्यकारकम्[२२५] ।
पशुपुष्पार्घ्यधूपैश्च गन्धदीपैस्तथोत्तमैः ॥१९॥
विप्राणां भोजनैर्होमैः[२२६] प्रोक्षणीयैरहर्निशम् ।
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥२०॥
प्रीतिर्मे क्रियते सास्मिन् सकृत्सुचरिते[२२७] श्रुते ।
श्रुतं हरति पापानि तथाऽऽरोग्यं प्रयच्छति ॥२१॥
रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ।
युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणम् ॥२२॥
तस्मिञ्छ्रुते वैरिकृतं भयं पुंसां न जायते ।
युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥२३॥
ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिम्[२२८] ।
अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः ॥२४॥
दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रुभिः ।

---

२२४ ममैतन्माहात्म्यम् इति पाठान्तरम् ।
२२५ सन्निधिकारकम् इति पाठान्तरम् ।
२२६ प्रेक्षणीयैः इति शान्तनवीपाठः ।
२२७ सकृदुच्चरिते इति मार्कण्डेयपुराणस्थः पाठः ।
२२८ गतिम् इति मार्कण्डेयपुराणस्थः पाठः ।

सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ॥२५॥
राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो[२२९] बन्धगतोऽपि वा ।
आघूर्णितो वा वातेन स्थितः पोते महार्णवे ॥२६॥
पतत्सु वाऽपि[२३०] शस्त्रेषु संग्रामे भृशदारुणे ।
सर्वाबाधासु घोरासु वेदनाभ्यर्दितोऽपि वा ॥२७॥
स्मरन्ममैतच्चरितं नरो मुच्येत सङ्कटात् ।
मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा ॥२८॥
दूरादेव पलायन्ते स्मरतश्चरितं मम ।
महासर्पेण दष्टो वा सर्पेणानुगतोऽपि वा ॥२९॥ +

ऋषिरुवाच

इत्युक्त्वा सा भगवती चण्डिका चण्डविक्रमा ।
पश्यतां सर्वदेवानां[२३१] तत्रैवान्तरधीयत ॥३०॥
तेऽपि देवा[२३२] निरातङ्काः स्वाधिकारान् यथा पुरा ।
यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ॥३१॥
दैत्याश्च देव्या निहते शुम्भे देवरिपौ युधि ।
जगद्विध्वंसिनि[२३३] तस्मिन् महोग्रेऽतुलविक्रमे ॥३२॥
निशुम्भे च महावीर्ये शेषाः पातालमाययुः ।
एवं भगवती देवी सा नित्यापि पुनः पुनः ॥३३॥

---

२२९ चाज्ञप्ते बध्ये इति मार्कण्डेयपुराणस्थः पाठः ।
२३० चापि इति पाठान्तरम् ।
२३१ पश्यतामेव देवानां इति पाठान्तरम् ।
२३२ देव्या इति मार्कण्डेयपुराणस्थः पाठः ।
२३३ जगद्विध्वंसके इति मार्कण्डेयपुराणस्थः पाठः ।

सम्भूय कुरुते भूप जगतः परिपालनम् ।
तया संमोह्यते[२३४] विश्वं सैव विश्वं प्रसूयते ॥३४॥
सा याचिता च विज्ञानं तुष्टा ऋद्धिं[२३५] प्रयच्छति ।
व्याप्तं तयैतत्सकलं ब्रह्माण्डं मनुजेश्वर ॥३५॥
महाकाल्या महाकाले महामारीस्वरूपया ।
सैव काले महामारी सैव सृष्टिर्भवत्यजा ॥३६॥
स्थितिं करोति भूतानां सैव काले सनातनी ।
भवकाले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृहे ॥३७॥
सैवाभावे तथाऽलक्ष्मीर्विनाशायोपजायते ।
स्तुता सम्पूजिता पुष्पैर्धूपगन्धादिभिस्तथा ॥३८॥
सैव दारिद्र्यनिर्णाशी सैव सर्वार्तिहारिणी । +
ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा[२३६] शुभाम् ॥३९॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
फलस्तुतिर्नाम द्वादशोऽध्याय :।
एवमादितः ६८२ श्लोकाः ।

---

२३४ तयैतन्मोह्यते इति पाठान्तरम् ।
२३५ वृद्धिं इति शान्तनवीपाठः ।
२३६ गतिं इति पाठान्तरम् ।

त्रयोदशोऽध्यायः

ध्यानम्

ॐ बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशवराभीतीर्धारयन्तीं शिवां भजे ॥

ऋषिरुवाच

एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ।
तया व्याप्तं जगत्सर्वं भूतं भव्यं च सर्वदा ॥१॥ +
एवं प्रभावा सा देवी ययेदं धार्यते जगत् ।
विद्या तथैव क्रियते भगवद्विष्णुमायया ॥२॥
तया त्वमेष वैश्यश्च तथैवान्ये विवेकिनः ।
मोह्यन्ते मोहिताश्चैव मोहमेष्यन्ति चापरे ॥३॥
तामुपैहि[२३७] महाराज शरणं परमेश्वरीम् ।
आराधिता सैव नृणां भोगस्वर्गापवर्गदा ॥४॥

मार्कण्डेय उवाच

इति तस्य वचः श्रुत्वा सुरथः स नराधिपः[२३८] ।
प्रणिपत्य महाभागं तमृषिं शंसितव्रतम् ॥५॥
निर्विण्णोऽतिममत्वेन राज्यापहरणेन च ।
जगाम सद्यस्तपसे स च वैश्यो महामुने ॥६॥

---

२३७ तामुपेहि इति देशोद्धारपाठः ।
२३८ क्षत्रियर्षभः इति जगच्चन्द्रचन्द्रिकापाठः ।

सन्दर्शनार्थमम्बाया नदीपुलिनमाश्रितः[२३९] ।
स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥७॥
तौ तस्मिन् पुलिने देव्याःकृत्वा मूर्तिं महीमयीम् ।
अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥८॥
निराहारौ यताहारौ[२४०] तन्मनस्कौ समाहितौ ।
ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् ॥९॥
एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ।
परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका ॥१०॥

श्रीदेव्युवाच

यत्प्रार्थ्यते त्वया भूप त्वया च कुलनन्दन ।
मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि ते[२४१] ॥११॥

मार्कण्डेय उवाच

ततो वव्रे नृपो राज्यमविभ्रंशयन्यजन्मनि ।
अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ॥१२॥
सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥१३॥

---

२३९ नदीपुलिनसंस्थितः इति पाठान्तरम् ।

२४० यतात्मानौ इति मार्कण्डेयपुराणस्थः पाठः ।

२४१ तत् , वाम् इति पाठान्तरम् ।

श्रीदेव्युवाच

स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् ।
हत्वा रिपूनस्खलितं तव तत्र भविष्यति ॥१४॥
मृतश्च भूयः सम्प्राप्य जन्म देवाद्विवस्वतः ।
सावर्णिको नाम मनुर्भवान् भुवि भविष्यति ॥१५॥
वैश्यवर्य त्वया यश्च वरोऽस्मत्तोऽ[२४२] भिवाञ्छितः ।
तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥१६॥

मार्कण्डेय उवाच

इति दत्त्वा तयोर्देवी यथाभिलषितं वरम् ।
बभूवान्तर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥१७॥
एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥१८॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
सुरथवैश्यवरप्रदानं
नाम त्रयोदशोऽध्यायः
एवमादितः ७०० श्लोकाः ।

समाप्तम्



---

२४२ त्वयास्मत्तो वरो यश्च इति मार्कण्डेयपुराणस्थः पाठः ।

पुनर्नवार्णविधिः

विनियोगः

श्रीगणपतिर्जयति । ॐ अस्य श्रीनवार्णमन्त्रस्य ब्रह्माविष्णुरुद्रा ऋषयः, गायत्र्युष्णिगनुष्टुभ्छन्दांसि, श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः, ऐँ बीजम्, ह्रीँ शक्तिः, क्लीँ कीलकम् , श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीत्यर्थे जपे विनियोगः ॥

ऋष्यादिन्यासः

ब्रह्मविष्णुरुद्रऋषिभ्यो नमः - शिरसि ।
गायत्र्युष्णिगनुष्टुप्छन्देभ्यो नमः - मुखे ।
महाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः - हृदि ।
ऐँ बीजाय नमः - गुह्ये ।
ह्रीँ शक्तये नमः - पादयोः ।
क्लीँ कीलकाय नमः - नाभौ ।

करन्यासः

"ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे" इति मूलेन करौ संशोध्य–

ॐ ऐँ अङ्गुष्ठाभ्यां नमः ।

ॐ ह्रीँ तर्जनीभ्यां नमः ।

ॐ क्लीँ मध्यमाभ्यां नमः ।

ॐ चामुण्डायै अनामिकाभ्यां नमः ।

ॐ विच्चे कनिष्ठिकाभ्यां नमः ।

ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः

ॐ ऐँ हृदयाय नमः ।

ॐ ह्रीँ शिरसे स्वाहा ।

ॐ क्लीँ शिखायै वषट् ।

ॐ चामुण्डायै कवचाय हुम् ।

ॐ विच्चे नेत्रत्रयाय वौषट् ।

ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे अस्त्राय फट् ।

अक्षरन्यासः

ॐ ऐँ नमः– शिखायाम् ।

ॐ ह्रीँ नमः–दक्षिणनेत्रे ।

ॐ क्लीँ नमः– वामनेत्रे ।

ॐ चाँ नमः–दक्षिणकर्णे ।

ॐ मुँ नमः– वामकर्णे ।

ॐ डाँ नमः– दक्षिणनासापुटे ।

ॐ यैँ नमः–वामनासापुटे ।

ॐ विँ नमः– मुखे ।

ॐ च्चैँ नमः–गुह्ये ॥

"एवं विन्यस्याष्टवारं मूलेन व्यापकं कुर्यात्"

दिङ्न्यासः

ॐ ऐँ प्राच्यै नमः ।

ॐ ऐँ आग्नेय्यै नमः ।

ॐ ह्रीँ दक्षिणायै नमः ।

ॐ ह्रीँ नैर्ऋत्यै नमः ।

ॐ क्लीं प्रतीच्यै नमः ।
ॐ क्लीं वायव्यै नमः ।
ॐ चामुण्डायै उदीच्यै नमः ।
ॐ चामुण्डायै ऐशान्यै नमः ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे उर्ध्वायै नमः ।
ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे भूम्यै नमः ॥

ध्यानम्

खड्गं चक्रगदेषु चापपरिघाञ्छूलं भुशुण्डीं शिरः ।
शङ्खं संदधतीं करैस्त्रिनयनां सर्वाङ्गभूषावृताम् ॥
नीलाश्मद्युतिमास्यपाददशकां सेवे महाकालिकाम् ।
यामस्तौत्स्वपिते हरौ कमलजो हन्तुं मधुं कैटभम् ॥१॥

अक्षस्रक्परशुं गदेषु कुलिशं पद्मं धनुष्कुण्डिकाम् ।
दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ॥
शूलं पाशसुदर्शने च दधतीं हस्तैः प्रसन्नाननाम् ।
सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥

घण्टाशूलहलानि शङ्खमुसले चक्रं धनुः सायकम् ।
हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभाम् ॥
गौरीदेहसमुद्भवां त्रिजगतामाधारभूतां महा-
पूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम् ॥३॥



नवार्णजपः

ऐँ ह्रीं अक्षमालिकायै नम इति मन्त्रेण मालिकां सम्पूज्य प्रार्थना च विधेया –

ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि ।
चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॥
ॐ अविघ्नं कुरु माले त्वं गृह्णामि दक्षिणे करे ।
जपकाले च सिद्ध्यर्थं प्रसीद मम सिद्धये ॥

ॐ अक्षमालाधिपतये सुसिद्धिं देहि देहि सर्वमन्त्रार्थसाधिनि साधय साधय सर्वसिद्धिं परिकल्पय परिकल्पय मे स्वाहा ॥

तदनन्तरमष्टोत्तरशतमष्टोत्तरसहस्रं वा मूलमन्त्रं
(ॐ ऐँ ह्रीँ क्लीँ चामुण्डायै विच्चे)जपेत् ।

जपसमर्पणम्

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि ।

पुनर्न्यासः

आदौ करन्यासः

ॐ ह्रीं अङ्गुष्ठाभ्यां नमः ।
ॐ चँ तर्जनीभ्यां नमः ।
ॐ डिँ मध्यमाभ्यां नमः ।
ॐ काँ अनामिकाभ्यां नमः ।
ॐ यैँ कनिष्ठिकाभ्यां नमः ।
ॐ ह्रीं चण्डिकायै करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः

ॐ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा ।
शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा – हृदयाय नमः ॥
ॐ शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिः स्वनेन च – शिरसे स्वाहा ॥
ॐ प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे ।
भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि – शिखायै वषट् ॥
ॐ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरन्ति ते ।
यानि चात्यर्थघोराणि तै रक्षास्मांस्तथा भुवम् – कवचाय हुम् ॥
ॐ खड्गशूलगदादीनि यानि चास्त्राणि तेऽम्बिके ।
करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः – नेत्रत्रयाय वौषट्
ॐ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते – अस्त्राय फट् ॥

ध्यानम्

ॐ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणाम् ।
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ॥
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीम् ।
बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥

इति नवार्णविधिः



वेदोक्तं देवीसूक्तम्

ॐ अहमित्यष्टर्चस्य सूक्तस्य वागाम्भृणी ऋषिः,सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता,द्वितीयाया ऋचो जगती, शिष्टानां त्रिष्टुप्छन्दः, देवीमाहात्म्यपाठे विनियोगः ।

ध्यानम्

ॐ सिंहस्था शशिशेखरा मरकतप्रख्यैश्चतुर्भिर्भुजैः
शङ्खं चक्रधनुः शरांश्च दधती नेत्रैस्त्रिभिः शोभिता ।
आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीरणन्नूपुरा
दुर्गा दुर्गतिहारिणी भवतु नो रत्नोल्लसत्कुण्डला ॥

अथ देवीसूक्तम्[1]

ॐ अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥
अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते ॥२॥
अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भुरिस्थात्रां भूर्य्यावेशयन्तीम् ॥३॥
मया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ॥४॥

---

१ ऋग्वेदः मं. १०, अ. १०, सू. १२५

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥५॥
अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आ विवेश ॥६॥
अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥७॥
अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सम्बभूव ॥८॥

इति वेदोक्तं देवीसूक्तम्



तन्त्रोक्तं देवीसूक्तम्

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणतास्म[२] ताम् ॥१॥
रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः[३] ।
ज्योत्स्नायै चेन्दुरूपिण्यै[४] सुखायै सततं नमः ॥२॥
कल्याण्यै प्रणतां वृद्ध्यै[५] सिद्ध्यै कुर्मो[६] नमो नमः ।
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ॥३॥
दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै[७] ।
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥४॥
अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः ।
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः ॥५॥
या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६॥
या देवी सर्वभूतेषु चेतनेत्यभिधीयते ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७॥
या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥८॥

---

२ प्रणताः स्म इति पाठान्तरम् ।

३ इतः परं नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः इति पद्यार्ध मार्कण्डेयपुराणे अधिकः पठितः ।

४ चन्द्ररूपिण्यै इति मार्कण्डेयपुराणस्थः पाठः ।

५ प्रणता वृद्ध्यै, प्रणतामृध्यै इत्यपि पाठः ।

६ कूर्म्यै: इत्यपि पाठः ।

७ सर्वकारिणी इति मार्कण्डेयपुराणस्थः पाठः ।

या देवी सर्वभूतेषु निद्रारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥९॥
या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१०॥
या देवी सर्वभूतेषु छायारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥११॥
या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१२॥
या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१३॥
या देवी सर्वभूतेषु मोहरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१४॥
या देवी सर्वभूतेषु श्रुतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१५॥
या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१६॥
या देवी सर्वभूतेषु क्षमारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१७॥
या देवी सर्वभूतेषु ऋद्धिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१८॥
या देवी सर्वभूतेषु सिद्धिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
या देवी सर्वभूतेषु तृप्तिरूपेण संस्थिता । +

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२०॥
या देवी सर्वभूतेषु क्रोधरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२१॥
या देवी सर्वभूतेषु मतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२२॥
या देवी सर्वभूतेषु गतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२३॥
या देवी सर्वभूतेषु रीतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२४॥
या देवी सर्वभूतेषु धृतिरूपेण संस्थिता[८] । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२५॥
या देवी सर्वभूतेषु शान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२६॥
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२७॥
या देवी सर्वभूतेषु ज्ञातृरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२८॥
या देवी सर्वभूतेषु जातिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥२९॥
या देवी सर्वभूतेषु श्रद्धारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३०॥
या देवी सर्वभूतेषु स्फूर्तिरूपेण संस्थिता ।

---

८ अयं पाठो मार्कण्डेयपुराणे उपलभ्यते ।

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३१॥
या देवी सर्वभूतेषु मेधारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३२॥
या देवी सर्वभूतेषु प्रज्ञारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३३॥
या देवी सर्वभूतेषु कीर्तिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३४॥
या देवी सर्वभूतेषु लज्जारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३५॥
या देवी सर्वभूतेषु लक्ष्मीरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३६॥
या देवी सर्वभूतेषु सन्ध्यारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३७॥
या देवी सर्वभूतेषु दिवारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३८॥
या देवी सर्वभूतेषु रात्रीरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥३९॥
या देवी सर्वभूतेषु भीतिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४०॥
या देवी सर्वभूतेषु रजोरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४१॥
या देवी सर्वभूतेषु सत्त्वरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४२॥

या देवी सर्वभूतेषु तमोरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४३॥

या देवी सर्वभूतेषु सृष्टिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४४॥

या देवी सर्वभूतेषु स्थितिरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४५॥

या देवी सर्वभूतेषु लयरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४६॥

या देवी सर्वभूतेषु नीतिरूपेण संस्थिता[१] । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४७॥

या देवी सर्वभूतेषु दयारूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४८॥

या देवी सर्वभूतेषु मायारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥४९॥

या देवी सर्वभूतेषु स्वधारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५०॥

या देवी सर्वभूतेषु स्वाहारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५१॥

या देवी सर्वभूतेषु इच्छारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५२॥

या देवी सर्वभूतेषु ज्ञानरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५३॥

---

१ अयं पाठो मार्कण्डेयपुराणे उपलभ्यते, शान्तनव्यां च व्याख्यातः ।

या देवी सर्वभूतेषु क्रियारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५४॥
या देवी सर्वभूतेषु विद्यारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५५॥
या देवी सर्वभूतेषु तुष्टिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५६॥
या देवी सर्वभूतेषु पुष्टिरूपेण संस्थिता[१०] । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५७॥
या देवी सर्वभूतेषु मातृरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५८॥
या देवी सर्वभूतेषु पितृरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥५९॥
या देवी सर्वभूतेषु भ्रातृरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६०॥
या देवी सर्वभूतेषु प्रजारूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६१॥
या देवी सर्वभूतेषु पृथ्वीरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६२॥
या देवी सर्वभूतेषु जलरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६३॥
या देवी सर्वभूतेषु तेजोरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६४॥

---

१० अयं पाठो मार्कण्डेयपुराणे उपलभ्यते ।

या देवी सर्वभूतेषु वायुरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६५॥
या देवी सर्वभूतेषु नभोरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६६॥
या देवी सर्वभूतेषु शब्दरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६७॥
या देवी सर्वभूतेषु स्पर्शरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६८॥
या देवी सर्वभूतेषु रूपरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥६९॥
या देवी सर्वभूतेषु रसरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७०॥
या देवी सर्वभूतेषु गन्धरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७१॥
या देवी सर्वभूतेषु भ्रान्तिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७२॥
या देवी सर्वभूतेषु सर्वरूपेण संस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७३॥
या देवी सर्वभूतेषु मुक्तिरूपेणसंस्थिता । +
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७४॥
इन्द्रियाणामधिष्ठात्री भूतानामखिलेषु[११] या ।

---

११ भूतानां चाखिलेषु इति पाठान्तरम् ।

भूतेषु सततं तस्यै व्याप्तिदेव्यै[१२] नमो नमः ॥७५॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥७६॥

स्तुता सुरैः पूर्वमभीष्टसंश्रयात्
तथा सुरेन्द्रेण दिनेषु सेविता[१३] ।
करोतु सा नः शुभहेतुरीश्वरी
शुभानि भद्राण्यभिहन्तु चापदः ॥७७॥
या साम्प्रतं चोद्धतदैत्यतापितै -
रस्माभिरीशा च सुरैर्नमस्यते ।
या च स्मृता तत्क्षणमेव हन्ति नः
सर्वापदो भक्तिविनम्रमूर्तिभिः ॥७८॥

इति तन्त्रोक्तं देवीसूक्तम्



१२ व्याप्त्यै देव्यै इति पाठान्तरम् ।

१३ तथा सुरेन्द्रैः दिनेषु सेविता इति शान्तनवीयः पाठः ।

अथ रहस्यत्रयम्

ॐ अस्य रहस्यत्रयस्य आद्य पुमान् नारायणऋषिः, अनुष्टुप् छन्दः महालक्ष्मीर्देवता मायार्णोक्ता महाकाली मुख्या देव्यः शक्तयः, महालक्ष्म्यन्ता सिन्धु नानाबीजं छन्दः,रुद्राद्या देवाः पुमास्तत्सिद्ध्यर्थं जपे विनियोगः ।[१४]

राजोवाच

भगवन्नवतारा मे चण्डिकायास्त्वयोदिताः ।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥
आराध्यं यत्मया देव्याः स्वरूपं येन च द्विज ।
विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥

ऋषिरुवाच

इदं रहस्यं परममनाख्येयं प्रचक्षते ।
भक्तोऽसीति न मे किञ्चित्तवाऽवाच्यं नराधिप ॥
सर्वस्याऽऽद्या महालक्ष्मीस्त्रिगुणा परमेश्वरी ।
लक्ष्याऽलक्ष्यस्वरूपा सा व्याप्यं कृत्स्नं व्यवस्थिता ॥
मातुलिङ्गं गदा खेटं पानपात्रं च बिभ्रती ।
नागलिङ्गं[१५] च योनिं च बिभ्रती नृप मूर्धनि ॥

---

१४ ॐ अस्य श्रीसप्तशतीरहस्यत्रयस्य नारायणऋषिरनुष्टुप्छन्दः, महाकालीमहालक्ष्मीमहासरस्वत्यो देवता यथोक्तफलवाप्त्यर्थं जपे विनियोग : इति पाठान्तरम् ।

१५ नागं लिङ्गं इति पाठान्तरम् ॥

तप्तकाञ्चनवर्णाभा तप्तकाञ्चनभूषणा ।
शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥
शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ।
बभार रूपमपरं[१६] तमसा केवलेन हि ॥
सा भिन्नाञ्जनसङ्काशा दंष्ट्राञ्चित[१७] वरानना ।
विशाललोचना नारी बभूव तनुमध्यमा ॥
खड्गपात्रशिरः खेटैरलङ्कृतचतुर्भुजा ।
कबन्धहारशिरसा बिभ्राणा हि शिरः स्रजम् ॥
सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ।
नाना कर्म च मे मातर्देहि तुभ्यं नमो नमः ॥
तां प्रोवाच महालक्ष्मीस्तामसीं प्रमदोत्तमाम् ।
ददामि तव नामानि यानि कर्माणि भूतले[१८] ॥
महामाया[१९] महालक्ष्मीर्महामारी क्षुधा तृषा[२०] ।
निद्रा निशा चैकवीरा कालरात्री दुरत्यया ॥
इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ।
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ॥
तामित्युक्त्वा महालक्ष्मीः स्वरूपमपरं नृप ।
सत्त्वाख्येनातिशुद्धेन गुणेनेन्दुप्रभं दधौ ॥

---

१६ परमं रूपं इति पाठान्तरम् ।
१७ द्रष्ट्राङ्कित इति पाठान्तरम् ।
१८ तानि ते इति पाठान्तरम् ।
१९ महाकाली इति पाठान्तरम् ।
२० तृषा इति पाठान्तरम् ।

अक्षमालाङ्कुशधरा वीणापुस्तकधारिणी ।
सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥
महाविद्या महावाणी भारती वाक् सरस्वती ।
आर्या ब्राह्मी[२१] महाधेनुर्वेदगर्भा च धीश्वरी[२२] ॥
अथोवाच महालक्ष्मीर्महाकालीं सरस्वतीम् ।
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥
इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ।
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥
ब्रह्मन् विधे विरिञ्चेति धातरित्याह तं नरम् ।
श्रीः पद्मे कमले लक्ष्मीत्याह माता स्त्रियं च ताम्[२३] ॥
महाकाली भारती च मिथुने सृजतिस्म ह[२४] ।
एतयोरपि रूपाणि नामानि च वदामि ते ॥
नीलकण्ठं रक्तबाहुं श्वेताङ्गं चन्द्रशेखरम् ।
जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥
स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः ।
त्रयी विद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥
सरस्वतीं[२५] स्त्रियं गौरीं कृष्णं च पुरुषं नृप ।
जनयामास नामानि त्रयोरपि वदामि ते ॥

---

२१ कामधेनुः इति पाठान्तरम् ।
२२ सुरेश्वरी इति पाठान्तरम् ।
२३ च तां स्त्रियम् इति पाठान्तरम् ।
२४ सृजतः सह इति पाठान्तरम् ।

२५ सरस्वती इति पाठान्तरम् ।

विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ।
उमा गौरी सती चण्डी सुन्दरी सुभगा सुखा[२६] ॥
एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ।
चक्षुष्मन्तो न पश्यन्ति नेतरेऽतद्विदो बुधाः[२७] ॥
ब्रह्मणे प्रददौ पत्नीं महालक्ष्मीर्नृप त्रयीम् ।
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥
स्वरया सह संभूय विरिञ्चोऽण्डमजीजनत् ।
बिभेद भगवान् रुद्रस्तद्गौर्या सह वीर्यवान् ॥
अण्डमध्ये प्रधानादिकार्यजातमभून्नृप ।
महाभूतात्मकं सर्वं जगत् स्थावरजङ्गमम् ॥
पुपोष पालयामास तल्लक्ष्म्या सह केशवः ।[२८]
महालक्ष्मीरेव मता राजन् सर्वेश्वरेश्वरी[२९] ॥
निराकारा च साकारा सैव नानाभिधानभृत् ।
नामान्तरैर्निरूप्यैषा नाम्ना नान्येन केनचित् ।

इति श्रीप्राधानिकरहस्यम्

---

२६ शिवा इति पाठान्तरम् ।

२७ जना इति पाठान्तरम् ।

२८ इतः परं अन्यत्र सञ्जहार जगत्सर्वं सह गौर्या महेश्वरः इति अधिकः पाठः प्राप्यते ।

२९ महालक्ष्मीर्महाराज सर्वसत्त्वमयीश्वरी इति पाठान्तरम् ।

वैकृतिकरहस्यम्

ऋषिरुवाच

त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता ।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ।
मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥
दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशाललोचना नारी बभूव तनुमध्यमा ॥[३०]
हिमालयसुता राजन् त्रिंशल्लोचनमालया ।+
स्फुरद्दशनदंष्ट्राभा भीमरूपापि भूमिप ॥
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम्[३१] ।
खड्गबाणगदाशूलशङ्खचक्रभुशुण्डिभृत् ॥
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ।
एषा सा वैष्णवी माया महाकालदुरत्यया[३२] ॥
आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ।
सर्वदेवशरीरेभ्यो याविर्भूताऽमितप्रभा ॥
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ।

---

३० विशालया राजमाना त्रिंशल्लोचनमालया इति अन्यत्र पाठः ।

३१ महाश्रियः इति पाठान्तरम् ।

३२ महाकाली दुरत्यया इति पाठान्तरम् ।

श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ॥
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ।
सुवृत्तजघना[३३] चित्रमाल्याम्बरविभूषणा ॥
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ।
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात् ।
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ।
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ॥
अलङ्कृताभुजामेभिरायुधैः कमलासनाम् ।
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयेत्सर्वदेवानां स लोकानां[३४] प्रभुर्भवेत् ।
गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥
साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिवर्हिणी ।
दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत् ॥
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ।
एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥
निशुम्भमथनी देवी शुम्भासुरनिवर्हणी ।
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥

---

३३ सुचित्रजघना इति पाठोऽन्यत्र ।

३४ देवानां इति पाठान्तरम् ।

वैकृतिकरहस्यम्

ऋषिरुवाच

त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता ।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ।
मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥
दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशाललोचना नारी बभूव तनुमध्यमा ॥[३०]
हिमालयसुता राजन् त्रिंशल्लोचनमालया ।+
स्फुरद्दशनदंष्ट्राभा भीमरूपापि भूमिप ॥
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम्[३१] ।
खड्गबाणगदाशूलशङ्खचक्रभुशुण्डिभृत् ॥
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ।
एषा सा वैष्णवी माया महाकालदुरत्यया[३२] ॥
आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ।
सर्वदेवशरीरेभ्यो याविर्भूताऽमितप्रभा ॥
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ।

---

३० विशालया राजमाना त्रिंशल्लोचनमालया इति अन्यत्र पाठः ।

३१ महाश्रियः इति पाठान्तरम् ।

३२ महाकाली दुरत्यया इति पाठान्तरम् ।

श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ॥
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ।
सुवृत्तजघना[३३] चित्रमाल्याम्बरविभूषणा ॥
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ।
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात् ।
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ।
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ॥
अलङ्कृताभुजामेभिरायुधैः कमलासनाम् ।
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयेत्सर्वदेवानां स लोकानां[३४] प्रभुर्भवेत् ।
गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥
साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिवर्हिणी ।
दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत् ॥
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ।
एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥
निशुम्भमथनी देवी शुम्भासुरनिवर्हणी ।
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥

---

३३ सुचित्रजघना इति पाठोऽन्यत्र ।

३४ देवानां इति पाठान्तरम् ।

वैकृतिकरहस्यम्

ऋषिरुवाच

त्रिगुणा तामसी देवी सात्त्विकी या त्रिधोदिता ।
सा शर्वा चण्डिका दुर्गा भद्रा भगवतीर्यते ॥
योगनिद्रा हरेरुक्ता महाकाली तमोगुणा ।
मधुकैटभनाशार्थं यां तुष्टावाम्बुजासनः ॥
दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशाललोचना नारी बभूव तनुमध्यमा ॥[30]
हिमालयसुता राजन् त्रिंशल्लोचनमालया ।+
स्फुरद्दशनदंष्ट्राभा भीमरूपापि भूमिप ॥
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियाम्[31] ।
खड्गबाणगदाशूलशङ्खचक्रभुशुण्डिभृत् ॥
परिघं कार्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ।
एषा सा वैष्णवी माया महाकालदुरत्यया[32] ॥
आराधिता वशीकुर्यात्पूजाकर्तुश्चराचरम् ।
सर्वदेवशरीरेभ्यो याविर्भूताऽमितप्रभा ॥
त्रिगुणा सा महालक्ष्मीः साक्षान्महिषमर्दिनी ।

---

३० विशालया राजमाना त्रिंशल्लोचनमालया इति अन्यत्र पाठः ।
३१ महाश्रियः इति पाठान्तरम् ।
३२ महाकाली दुरत्यया इति पाठान्तरम् ।

श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ॥
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ।
सुवृत्तजघना[३३] चित्रमाल्याम्बरविभूषणा ॥
चित्रानुलेपना कान्तिरूपसौभाग्यशालिनी ।
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ॥
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधः करक्रमात् ।
अक्षमाला च कमलं बाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ।
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः ॥
अलङ्कृताभुजामेभिरायुधैः कमलासनाम् ।
सर्वदेवमयीमीशां महालक्ष्मीमिमां नृप ॥
पूजयेत्सर्वदेवानां स लोकानां[३४] प्रभुर्भवेत् ।
गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया ॥
साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिवर्हिणी ।
दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत् ॥
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ।
एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति ॥
निशुम्भमथनी देवी शुम्भासुरनिवर्हणी ।
इत्युक्तानि स्वरूपाणि मूर्तीनां तव पार्थिव ॥

---

३३ सुचित्रजघना इति पाठोऽन्यत्र ।

३४ देवानां इति पाठान्तरम् ।

उपासनं जगन्मातुः पृथगासां निशामय ।
महालक्ष्मीर्यदा पूज्या महाकाली सरस्वती ॥
दक्षिणोत्तरतः[३५] पूज्या पृष्ठतो मिथुनत्रयम् ।
विरिञ्चिः स्वरया मध्ये रुद्रो गौर्या च दक्षिणे ॥
वामे लक्ष्म्या हृषिकेशः पुरतो देवतात्रयम् ।
अष्टादशभुजा मध्ये वामे चास्या दशानना ॥
दक्षिणेऽष्टभुजा लक्ष्मीर्महतीति समुच्यते[३६] ।
अष्टादशभुजा चैषा यदा पूज्या नराधिप ॥
दशानना चाष्टभुजा दक्षिणोत्तरयोस्तथा[३७] ।
यदा दशानना पूज्या दक्षिणोत्तरयोस्तदा ॥ +
कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशान्तये ।
यदा चाष्टभुजा पूज्या शुम्भासुरनिवर्हिणी ॥
पूर्वादिदलतः पूज्या असिताङ्गादिभैरवाः । +
नवास्याः शक्तयः पूज्यास्तथा रुद्रविनायकौ ॥
नमो देव्या इति स्तोत्रैर्महालक्ष्मीं समर्चयेत् ।
अवतारत्रयार्चायां स्तोत्रमन्त्रास्तदाश्रया ॥
अष्टादशभुजा चैका[३८] पूज्या महिषमर्दिनी ।
महालक्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती ॥[३९]

---

३५ दक्षिणोत्तरयोः पूज्ये इति पाठान्तरम् ।
३६ समर्चयेत् इति पाठान्तरम् ।
३७ तदा इति पाठान्तरम् ।
३८ चैषा इति पाठान्तरम् ।

३९ ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी इत्यधिकः पाठोऽन्यत्र पठितः ।

महिषान्तकरी येन पूजिता सा जगत्प्रभुः ।
पूजयेज्जगतां धात्रीं चण्डिकां भक्तवत्सलाम् ॥
अर्घ्यादिभिरलङ्कारैर्गन्धपुष्पैस्तथोत्तमैः[४०] ।
पुष्पैर्दीपैश्च[४१] नैवेद्यैर्नानाभक्ष्यसमन्वितैः ॥
रुधिराक्तेन विधिना[४२] मांसेन सुरया नृप ।
प्रणामाऽऽचमनीयेन चन्दनेन सुगन्धिना ॥
सकर्पूरैश्च ताम्बूलैर्भक्तिभावसमन्वितैः ।
वामभागेऽग्रतो देव्याश्छिन्नशीर्षं महासुरम् ॥
पूजयेन्महिषं येन प्राप्तं सायुज्यमीशया ।
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरम् ॥
वाहनं पूजयेद्देव्या धृतं येन चराचरम् ।
ततः कृताञ्जलिर्भूत्वा स्तुवीत चरितैरिमैः ॥[४३]
एकेन वा मध्यमेन नैकेनेतरयोरिह ।
चरितार्धं तु न जपेज्जपँश्छिद्रमवाप्नुयात् ॥
स्तोत्रमन्त्रैः स्तुवीतैषां यदि वा जगदम्बिकाम् । +
प्रदक्षिणा नमस्कारान् कृत्वा मूर्ध्नि कृताञ्जलिः ॥
क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतन्द्रितः ।
प्रतिश्लोकञ्च जुहुयात् पायसं तिलसर्पिषा ॥

---

४० तथाक्षतै : पाठः प्राप्यते अन्यत्र तु ।

४१ धूपैश्च इति पाठान्तरम् ।

४२ बलिना इति पाठान्तरम् ।

४३ यः कुर्यात्प्रयतो धीमांस्तस्या एकाग्रमानसः इति श्लोकार्धं न प्राप्यते अत्र ।

जुहुयात्स्तोत्रमन्त्रैर्वा चण्डिकायै शुभं हविः ।
नमो नमः पदैर्देवीं पूजयेत्सुसमाहितः ॥
प्रयतः प्राञ्जलिः प्रह्वः प्रणम्याऽऽरोप्य चात्मनि ।
सुचिरं भावयेदीशां चण्डिकां तन्मयो भवेत् ॥
एवं संपूजयेद् [४४] भक्त्या प्रत्यहं परमेश्वरीम् ।
भुक्त्वा भोगान् यथाकामं देवीसायुज्यमाप्नुयात् ॥
यो न पूजयते नित्यं चण्डिकां भक्तवत्सलाम् ।
भस्मीकृत्यास्य पुण्यानि निर्दहेत्परमेश्वरी ॥
तस्मात्पूजय भूपाल सर्वलोकमहेश्वरीम् ।
यथोक्तेन विधानेन चण्डिकां सुखमाप्स्यसि ॥

इति श्रीवैकृतिकरहस्यम् ।

---

४४ एवं यः पूजयेत् इति पाठान्तरम् ।

मूर्तिरहस्यम्

ऋषिरुवाच

नन्दा भगवतीनाम या भविष्यति नन्दजा ।
सा स्तुता पूजिता भक्त्या वशीकुर्याज्जगत्त्रयम् ॥१॥
कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ।
देवी कनकवर्णाभा कनकोत्तमभूषणा ॥२॥
कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा ।
इन्दिरा कमला लक्ष्मीः सा श्री रुक्मास्बुजासना ॥३॥
या रक्तदन्तिका नाम देवी प्रोक्ता मयाऽनघ ।
तस्याः स्वरूपं वक्ष्यामि श्रृणु पाप[४५] भयापहम् ॥४॥
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।+
रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा ।
रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥५॥
रक्ततीक्ष्णनखा रक्तदशना रक्तदंष्ट्रिका[४६] ।
पीतं नारीवानुरक्ता देवी भक्तं भजेज्जनम् ॥६॥
वसुधेव विशाला सा सुमेरुयुगलस्तनी ।
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोरमौ[४७] ॥७॥

---

४५ सर्व इति पाठान्तरम् ।

४६ रक्तदन्तिका इति पाठान्तरम् ।

४७ मनोहरौ इति पाठान्तरम् ।

कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी ।
भक्तान् सम्पाययेद्देवी सर्वकामदुघौ स्तनौ ॥८॥
खड्गं पाशं[४८] च मुसलं लाङ्गलं च बिभर्ति सा ।
आख्याता रक्तचामुण्डा देवी योगेश्वरीति च ॥९॥
अनया व्याप्तमखिलं जगत्स्थावरजङ्गमम् ।
इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरम् ॥१०॥
अधिते य इमं नित्यं रक्तदन्त्या वपुः स्तवम् ।
तं सा परिचरेद्देवी पतिं प्रियमिवाङ्गना ॥११॥
शाकम्भरी नीलवर्णा नीलोत्पलविलोचना ।
गम्भीरनाभिस्त्रिवलीविभूषिततनूदरी ॥१२॥
सुकर्कशासमोत्तुङ्गवृत्तपीनघनस्तनी ।
मुष्टिं शिलीमुखापूर्णं कमलं कमलालया ॥१३॥
पुष्पपल्लवमूलादिफलाढ्यं शाकसञ्चयम् ।
काम्यानन्तरसैर्युक्तं क्षुत्तृणमृत्युजरापहम्[४९] ॥१४॥
कार्मुकं च स्फुरत्कान्तिर्बिभ्रती परमेश्वरी ।
शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥१५॥[५०]
उमा गौरी सती चण्डी कालिका साऽपि पार्वती ॥१६॥
शाकम्भरीं स्तुवन् ध्यायञ्जपन् सम्पूजयेन्नमन्[५१] ।

---

४८ पात्रं इति पाठान्तरम् ।
४९ भयापहम् इति पाठान्तरम् ।
५० विशोका दुष्टदमनी शमनी दुरितापदाम् । इति श्लोकार्धमत्र न पठ्यते ।
५१ सपूजयेत् इति पाठान्तरम् ।

अक्षय्यमश्नुते शीघ्रमन्नपानामृतं फलम् ॥१७॥
भीमापि नीलवर्णा सा दंष्ट्रादशनभास्वरा[५२] ।
विशाललोचना नारी वृत्तपीनपयोधरा ॥१८॥
चन्द्रहासं च डमरुं शिरः पात्रं च बिभ्रती ।
एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥१९॥
तेजोमण्डलदुर्धर्षा भ्रामरी चित्रकान्तिभृत् ।
चित्रानुलेपना देवी चित्राभरणभूषिता ॥२०॥
चित्रभ्रमरपाणिः सा महामारीति गीयते ।
इत्येता मूर्तयो देव्या व्याख्याता वसुधाधिप ॥२१॥
जगन्मातुश्चण्डिकायाः कीर्तिताः कामधेनवः ।
इदं रहस्यं परमं न वाच्यं कस्यचित्त्वया ॥२२॥
व्याख्यानं दिव्यमूर्तीनामधीष्वाऽवहितः स्वयम्[५३] ।
तस्मात् सर्वप्रयत्नेन देवीं जप निरन्तरम् ॥२३॥[५४]

इति मूर्तिरहस्यम्

रहस्यत्रयं सम्पूर्णम्

---

५२ दंष्ट्रा दशनभासुरा इति पाठान्तरम् ।

५३ दिव्यमूर्तीनामभीष्टफलदायकम् इति पाठान्तरम् ।

५४ सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्यासमैरपि । पाठमात्रेण मन्त्राणां मुच्यते सर्वकिल्विषैः । २४ । देव्या ध्यानं मया ख्यातं गुह्याद् गुह्यतरं महत् । तस्मात् सर्वप्रयत्नेन सर्वकामफलप्रदम् ॥ २५ ॥ (एतस्यास्त्वं प्रसादेन सर्वमान्यो भविष्यसि । सर्वरुपमयी देवी सर्वं देवीमयं जगत् । अतोऽहं विश्वरुपां तां नमामि परमेश्वरीम् ॥) इति श्लोकद्वयमत्र न पठ्यते । अतिरिक्त श्लोकाः च न पठ्यते ।

अथ देव्यपराधक्षमापनस्तोत्रम्

न मन्त्रं नो यन्त्रं तदपि च न जाने स्तुतिमहो ।
न चाह्वानं ध्यानं तदपि च न जाने स्तुतिकथाः ॥
न जाने मुद्रास्ते तदपि च न जाने विलपनं ।
परं जाने मातस्त्वदनुसरणं क्लेशहरणम् ॥१॥

विधेरज्ञानेन द्रविणविरहेणालसतया ।
विधेयाशक्यत्वात्तव चरणयोर्या च्युतिरभूत् ॥
तदेतत् क्षन्तव्यं जननि सकलोद्धारिणि शिवे ।
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥२॥

पृथिव्यां पुत्रास्ते जननि बहवः सन्ति सरलाः ।
परं तेषां मध्ये विरलतरलोऽहं तव सुतः ॥
मदीयोऽयं त्यागः समुचितमिदं नो तव शिवे ।
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥३॥

जगन्मातर्मातस्तव चरणसेवा न रचिता ।
न वा दत्तं देवि द्रविणमपि भूयस्तव मया ॥
तथापि त्वं स्नेहं मयि निरुपमं यत्प्रकुरुषे ।
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥४॥

परित्यक्ता देवा विविधविधसेवाकुलतया ।
मया पञ्चाशीतेरधिकमपनीते तु वयसि ॥
इदानीं चेन्मातस्तव यदि कृपा नापि भविता ।
निरालम्बो लम्बोदरजननि कं यामि शरणम् ॥५॥

श्वपाको जल्पाको भवति मधुपाकोपमगिरा ।
निरातङ्को रङ्को विहरति चिरं कोटिकनकैः ॥
तवापर्णे कर्णे विशति मनुवर्णे फलमिदम् ।
जनः को जानीते जननि जपनीयं जपविधौ ॥६॥

चिताभस्मालेपो गरलमशनं दिक्पटधरो ।
जटाधारी कण्ठे भुजगपतिहारी पशुपतिः ॥
कपाली भूतेशो भजति जगदीशैकपदवीम् ।
भवानि त्वत्पाणिग्रहणपरिपाटीफलमिदम् ॥७॥

न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे ।
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः ॥
अतस्त्वां संयाचे जननि जननं यातु मम वै ।
मृडानी रुद्राणी शिव शिवभवानीति जपतः ॥८॥

नाराधितासि विधिना विविधोपचारैः ।
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ॥
श्यामे त्वमेव यदि किञ्चन मय्यनाथे ।
धत्से कृपामुचितमम्ब परं तवैव ॥९॥

आपत्सु मग्नः स्मरणं त्वदीयं ।
करोमि दुर्गे करुणार्णवेशि ॥
नैतच्छठत्वं मम भावयेथाः ।
क्षुधातृषार्ता जननीं स्मरन्ति ॥१०॥

जगदम्ब विचित्रमत्र किं परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परापरं न हि माता समुपेक्षते सुतम् ॥११॥

मत्समः पातकी नास्ति पापघ्नी त्वत्समा न हि ।
एवं ज्ञात्वा महादेवि यथायोग्यं तथा कुरु ॥१२॥

इति श्रीशङ्कराचार्यविरचितं देव्यपराधक्षमापनस्तोत्रं सम्पूर्णम् ।



सिद्धकुञ्जिकास्तोत्रम्

श्रीशिव उवाच

श्रृणु देवि प्रवक्ष्यामि कुञ्जिकास्तोत्रमुत्तमम् ।
येन मन्त्रप्रभावेण चण्डीजापः शुभो भवेत् ॥१॥
न कवचं नार्गलास्तोत्रं कीलकं न रहस्यकम् ।
न सूक्तं नापि ध्यानं च न न्यासो न च वार्चनम् ॥२॥
कुञ्जिकापाठमात्रेण दुर्गापाठफलं लभेत् ।
अति गुह्यतरं देवि देवानामपि दुर्लभम् ॥३॥
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति ।
मारणं मोहनं वश्यं स्तम्भनोच्चाटनादिकम् ॥४॥
पाठमात्रेण संसिद्ध्येत् कुञ्जिकास्तोत्रमुत्तमम् ।

अथ मन्त्रः

ॐ ऐँ ह्रीं क्लीं चामुण्डायै विच्चे ॥ ॐ ग्लौं हूं क्लीं जूं सः ज्वालय ज्वालय ज्वल ज्वल प्रज्वल ऐँ ह्रीं क्लीं चामुण्डायै विच्चे ज्वल हं सं लं क्षं फट् स्वाहा ॥ इति मन्त्रः ॥


नमस्ते रुद्ररूपिण्यै नमस्ते मधुमर्दिनि ।
नमः कैटभहारिण्यै नमस्ते मधुमर्दिनि ॥१॥
नमस्ते शुम्भहन्त्र्यै च निशुम्भासुरघातिनि ।
जाग्रतं हि महादेवि जपं सिद्धं कुरुष्व मे ॥२॥
ऐँकारी सृष्टिरूपायै ह्रींकारी प्रतिपालिका ।

क्लींकारी कामरूपिण्यै बीजरूपे नमोऽस्तु ते ॥३॥
चामुण्डा चण्डघाती च यैकारी वरदायिनी ।
विच्चे चाभयदा नित्यं नमस्ते मन्त्ररूपिणि ॥४॥
धां धीं धूं धूर्जटेः पत्नी वां वीं वूं वागधीश्वरी ।
क्रां क्रीं क्रूं कालिका देवि शां शीं शूं मे शुभं कुरु ॥५॥
हुं हुं हुंकाररूपिण्यै जं जं जं जम्भनादिनी ।
भ्रां भ्रीं भ्रूं भैरवी भद्रे भवान्यै ते नमो नमः ॥६॥
अं कं चं टं तं पं यं शं वीं दुं ऐं वीं हं क्षं
धिजाग्रं धिजाग्रं त्रोटय त्रोटय दीप्तं कुरु कुरु स्वाहा ॥७॥
पां पीं पूं पार्वती पूर्णा खां खीं खूं खेचरी तथा ।
सां सीं सूं सप्तशतीदेव्यामन्त्रसिद्धिं कुरुष्व मे ॥८॥
इदं तु कुञ्जिकास्तोत्रं मन्त्रजागर्तिहेतवे ।
अभक्ते नैव दातव्यं गोपितं रक्ष पार्वति ॥९॥
यस्तु कुञ्जिकया देवि हीनां सप्तशतीं पठेत् ।
न तस्य जायते सिद्धिररण्ये रोदनं यथा ॥१०॥

इति श्रीरुद्रयामले गौरीतन्त्रे शिवपार्वतीसंवादे कुञ्जिकास्तोत्रं सम्पूर्णम् ॥



कलौ न चण्डीसदृशी
सिद्धिदा भुवनत्रये ।
वामदक्षिणमार्गाभ्याम्
अधिकारिफलप्रदा ॥
-मारीचकल्पः





शैलपुत्री




ब्रह्मचारिणी



चन्द्रघण्टा



महागौरी





कुष्माण्डा




कालरात्री



कात्यायनी



स्कन्दमाता



सिद्धिदात्री

प्रकाशक:



[illegible]

काठमाडौं

